ग. ७/११

॥ छांदोग्योपनिषत्खंडार्थप्रारंभः ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॐ ॥ अशेषगुणपूर्णायदोषदूरायविष्णवे ॥ नमःश्रीप्राणनाथायभक्ताभीष्टप्रदायिने ॥ १ ॥ श्रीमच्छांदोग्याभिमताभाष्यकाराद्युदीरिताः ॥ अर्थायेसंग्रहस्तेषांक्रियतेसाधुतुष्टये ॥ २ ॥ इहामुत्रफलभोगविरक्तस्यशमदमादिमतोमुमुक्षोरधिकारिणोऽनिष्टनिवृत्तीष्टप्राप्तिसाधनप्रतिपादनायप्रवृत्तायाअस्याःछंदोगोपनिषदोहयग्रीवःप्रथमऋषिः । रमादेवीतदनंतरऋषिः । शेषशायीहरिर्देवता । वाक्यरूपत्वान्नछंदश्चिंता ।

हरिः ॐ ॥ (आप्यायंतुममांगानिवाक्प्राणश्चक्षुःश्रोत्रमथोबलमिंद्रियाणिचसर्वाणिसर्वंब्रह्मौपनिषदंमाहंब्रह्मनिराकुर्यांमामाब्रह्मनिराकरोदनिराकरणमस्त्वनिराकरणंमेअस्तुतदात्मनिनिरतेयउपनिषत्सुधर्मास्तेमयिसंतुतेमयिसंतु ॥) ॐशांतिश्शांतिश्शांतिः ॥ ओमित्येतदक्षरमुद्गीथमुपासीतोमितिह्युद्गायतितस्योपव्याख्यानं ॥ १ ॥

साम्नःप्रस्तावप्रतिहारोद्गीथोपद्रवनिधनभेदेनपंचभक्तयः । अंशाइतियावत् ॥ तत्रादावुद्गीथलक्षणसामैकदेशेसर्ववेदार्थप्रतिपादकप्रणवार्थभूतभगवन्निष्ठोपासनामाह ॥ ओमित्यादिना ॥ उद्गीथमुच्चत्वगीतत्वसर्वस्थानत्वहेतुभिरुद्गीथनामानंहरिमुपासीत तद्विषयश्रवणमननध्यानरूपोपासनाकार्येत्यर्थः ॥ उद्गीथंविशिनष्टि ॥ ओमितीति । अवरक्षणगतिकांतिप्रवेशेत्याद्यनेकार्थस्यावतेः अवतेष्टिलोपश्चेतिसूत्रेणोमितिरूपसिद्धेरुक्तत्वात् ॥ ओतमस्मिन्जगदितिसर्वोपजीव्यमितिवाओतं नियाम ॥ १ ॥

कतयाजगतिप्रविष्टमितिवाअवतिमातिजानातीतिव्युत्पत्त्याजगद्रक्षकंसर्वज्ञमितिवाअधिकोच्चमितिवाअधिकोच्चत्वेनवेदैर्मितमितिवा ॥ आनंदौजोभर्तृरूपमितिवाहेतोः । ओमितिअव्ययपदेनोच्यमानंएतत्सर्वत्रसन्निहितत्वात्एतदित्युच्यमानंअक्षरशब्दितचतुर्विधनाशहीनत्वाद्वाअक्षयाद्रतिरूपत्वाद्वाअक्षेष्विंद्रियेषुरमणाद्वाअक्षरशब्दितमुद्गीथमुपासीतेत्यर्थः॥ यद्वाउद्गीथमेतत्सर्वसन्निहितमक्षरमोमित्युपासीत ॥ ओंकारार्थगुणयुक्ततयोपासीतेतियोजना । इत्योमितिसदोपास्यःसोक्षरइतिभाष्योक्तेः । पदानामवयवार्थःप्राग्वदेव ॥ ओंनामार्थत्वंहरेःकुतइत्यतआह ॥ ओमितिहीति । उद्गातागानंकुर्वन्नादावोमि

एषांभूतानांपृथिवीरसःपृथिव्याआपोरसोऽपामोषधयोरसओषधीनांपुरुषोरसःपुरुषस्यवाग्रसो वाचऋग्रसऋचःसामरसःसाम्नउद्गीथोरसःसएषरसानांरसतमःपरमःपराध्योऽष्टमोयउद्गीथः ॥ २ ॥

त्युच्चार्यैनंहरिमुद्दिश्यगायतिहियतोतओंनामकत्वंहरेः । अन्यथाहरिमुद्दिश्यगायन्ओमितिआदौकुतउच्चारयेदितिभावः ॥ अधिकोच्चत्वेनवेदैःप्रमितत्वहेतुनाओमित्युच्यतेहरिरित्युक्तंतद्व्यक्तीकर्तुंप्रतिजानीते ॥ तस्येति ॥ तस्यओन्नाम्नोहरेरुपउपपन्नंव्याख्यानंसर्वस्माद्विशिष्टत्वरूपंसर्वोत्तमत्वस्याख्यानंनिरूपणंक्रियतइत्यर्थः ॥ यद्वातस्याक्षरस्यउपवाचकतयासमीपस्थस्योमित्यस्याधिकोच्चार्थकत्वेनव्याख्यानंक्रियतइत्यर्थः ॥ १ ॥ तच्चाधिकोच्चत्वंतारतम्यांतगतत्वेनज्ञातमेवपुमर्थहेतुरितिभावेनसंक्षेपेणतारतम्योक्तिपूर्वकमुच्चत्वमाह ॥ एषामिति । एषांप्रमितानांस्थावरभूतानांसकाशादितिशेषः ॥ पृथिवीधरादेवीरसः

श्रेष्ठा। एवमग्रेपि। आपःअबभिमानीवरुणः ओषधयओषधिमानीचंद्रः पुरुषःपौंस्याभिमानीसदाशिवः वाक्वागभिमानिनी सरस्वती ऋकृऋगभिमानिनीसरस्वत्येव एकापिवाणीप्राणसंयोगविशेषवत्त्वदशायांऋगभिमानिनीसतीतद्धीनत्वदशायांवाग भिमानिरूपात्स्वकीयात्श्रेष्ठेत्यवस्थाभेदेनवरावरभावोवाण्यायुक्तइतिध्येयं ॥ सर्वभूतेषुसमत्वहेतुनासामनामासाममानीप्रा णःउद्गीथःप्रागुक्तनिरुक्त्योद्गीथनामाहरिःरसःश्रेष्ठइत्यर्थः ॥ यथासामनाम्नःप्राणस्यवागादितःश्रैष्ठ्यमेवमुद्गीथनाम्नोहरेःप्रा णादितःश्रैष्ठ्यंनकिंतुनिरवधिकमितिभावेनैषांभूतानामित्यादेःसंग्रहरूपवाक्येनहरेर्महांतंविशेषमाह ॥ सइति ॥ अत्रपरम इतिपूर्वत्रोत्तरत्रचान्वेति ॥ तथाचरसतमइत्यत्ररस रसतर रसतम परमरसतमेतिचतस्रःकक्ष्याः। परमपरार्ध्य इत्यत्रापि पर मर्ध परमपरर्ध परमपरार्ध परमपरार्ध्येतिचतस्रःकक्ष्याः। वाक्यद्वयमेलनेनेयंवचनव्यक्तिः। परमपरार्ध्यरसतमइति ॥ तथाचायमर्थः। योष्टमोष्टमकक्ष्यात्वेनोक्तउद्गीथः ॥ सएषहरिःरसानांश्रेष्ठानांसकाशात्परमपरार्ध्यरसतमः ॥ आसमंताद्द द्धोर्धःपृथिव्यारसत्वंवरुणस्यरसतरत्वंचंद्रस्यरसतमत्वंपुरुषस्यपरमरसतमत्वंवाचःपरमर्धरसतमत्वंप्राणस्यपरमपरर्धरसतमत्व मुद्गीथनाम्नोहरेस्तुपरमपरार्धरसतमत्वंभवति ॥ तर्हिपरार्धइत्येववाच्येपरार्ध्यइतिकिमर्थमुच्यतइतिचेत् ॥ प्राणस्यवागादि तःश्रैष्ठ्यवन्नहरेःप्राणात्श्रैष्ठ्यंकिंतुपरमपरार्धरसतमात्श्रीतत्वादप्यसंख्यागोचरत्वेनज्ञेयोभगवानितिवक्तुंपरार्ध्यइत्युक्तिः ॥ लोकेहिपरार्धपर्यंतमेवसंख्यापरिगणनं ॥ ततऊर्ध्वंनसंख्याव्यवहारः अतोऽसंख्यागोचरत्वलाभायपरार्ध्यइत्युक्तिरितिभा वः ॥ वागृचोरवस्थाभेदेनभेदविवक्षायांतुभूतेभ्यःपृथिव्यारसत्वं ततोवरुणस्यरसतरत्वं ततःसोमस्यरसतमत्वं ततःशिव

स्यपरमरसतमत्वं ततोवाचःपरमर्धरसतमत्वं । ततऋचःपरमपरार्धरसतमत्वं । ततःप्राणस्यपरमपरार्धरसतमत्वं । ततःश्रीतत्त्वस्यपरमपरार्धिरसतमत्वं । ततोऽसंख्यागोचरत्वेनपरार्धिनाज्ञेयतयापरमपरार्ध्यरसतमउद्गीथोहरिरितिज्ञेयं ॥ २ ॥ तरतमभावेननिर्दिष्टेषुपृथिव्यादिषुपृथिव्याःतथाओषध्यब्देवतयोःसोमवरुणयोःरुद्रस्यलिंगदेवस्यवाचःसरस्वतीत्वेनचप्रसिद्धत्वात्तत्रप्रश्नमकृत्वाऋगादेरप्रसिद्धेस्तज्ज्ञानस्यविशिष्टफलहेतुत्वाच्चतत्रप्रश्नंकरोति ॥ **कतमेति** । द्विरुक्तिः ऋगादिस्वरूपज्ञानकुतूहलनिमित्ता इतिविमृष्टंविचारविषयीकृतंभवति । जिज्ञासितंभवतीतियावत् । ऋगादिस्वरूपमाह ॥ **वागेवेति** । ऋगिति

> **कतमाकतमर्क्कतमत्कतमत्सामकतमःकतमउद्गीथइतिविमृष्टंभवतिवागेवर्क्प्राणःसामोमित्येतदक्षरमुद्गीथः ॥ ३ ॥ तद्वाएतन्मिथुनंयद्वाक्प्राणश्चर्क्सामचतदेतन्मिथुनमोमित्येतस्मिन्नक्षरेसंसृज्यते ॥ ४ ॥**

वाङ्मानिनीवाण्येव । ऋगताविति धातोःप्राणेनसंगतासतीऋगित्युच्यतइत्यर्थः । सर्वभूतेषुसमत्वात्साममानित्वाच्चप्राणोमुख्यवायुःसामेत्यर्थः । प्रागुक्तव्युत्पत्त्याओमित्युच्यमानं एतत्सर्वसन्निहितं अक्षरं प्रागुक्तव्युत्पत्त्याअक्षरमित्युक्तोहरिरेवोद्गीथइत्यर्थः ॥ ३ ॥ उद्गीथस्यऋक्सामभ्यांरसत्वोक्तिरयुक्तातयोरतिमहत्त्वादित्यतोमुक्तौतदायतनत्वादित्याह ॥ **तद्वा एतदिति** । वाक्प्राणश्चऋक्सामचेतियत्तदेतद्द्वयंमिथुनंवै । नित्यंदांपत्यरूपेणावियुक्तं । वैप्रसिद्धं । अवस्थाभेदमादाय

वाणीवाणीशयोर्वाक्प्राणश्चऋक्सामचेतिपृथगुक्तिः। तदेतन्मिथुनं दंपती । ओमित्युच्यमानेसर्वसन्निहितेअक्षरनाम्निह रौ । संसृज्येतेसंगतौभवतः मुक्ताविति शेषः। शेषादीनांहरौसंसर्गसत्त्वेपिएतंप्राणंप्रविश्यैतत्प्रसादेनैवनसाक्षात् । अनयो स्तुनान्यद्वाराकिंतुसाक्षादेवेत्यनयोर्विशिष्यतत्संसर्गोक्तिः ॥ ४ ॥ वाक्प्राणयोर्मुक्तौभगवत्प्राप्त्यनंतरंकिंभवतीत्यतआह । यदावैमिथुनौ(ने)दंपतीसमागच्छतः हरिंप्राप्नुतःतदातौवाक्प्राणौअन्योन्यस्यकाममभीष्टमापयतःप्रापयतःप्राप्नुतइतिवा इति वाक्प्राणयोरुद्गीथसंसर्गज्ञानिनःफलमाह ॥ आपयितेति । योधिकारी । एतदक्षरमुद्गीथंसर्वत्रसन्निहितमविनाशादिगुण

यदावैमिथुनौसमागच्छतआपयतोवैतावन्योन्यस्यकाममापयिताहवैकामानांभवतियएतदेवं विद्वानक्षरमुद्गीथमुपास्ते ॥ ५ ॥ तद्वाएतदनुज्ञाक्षरंयद्धिकिंचानुजानात्योमित्येवतदाहैषोएवस मृद्धिर्यदनुज्ञासमर्द्धयिताहवैकामानांभवतियएतदेवंविद्वानक्षरमुद्गीथमुपास्ते ॥ ६ ॥

कतयाक्षरमित्युक्तमुद्गीथनामकंहरिमेवंमुक्तौवाक्प्राणायतनत्वेनतदभीष्टदातृत्वेनविद्वानुपास्ते । सःकामानामापयिताप्राप्ता भवति। हवैप्रसिद्धं ॥ ५ ॥ पूर्वंहरेरोन्नामकत्वमोमितिह्युद्गायतीतिसाधितं इदानींप्रकारांतरेणतत्साधयति ॥ तद्वाएत दिति। तदेतदोमित्यक्षरमनुज्ञा अनुज्ञाप्रदंवै। कथमनुज्ञाक्षरत्वमस्येत्यतआह ॥ यद्धीति । इदंमयाक्रियतेभवाननुज्ञा नात्विवितिकेनचित्पृष्टोन्यःप्राज्ञःहरिस्त्वयाक्रियमाणंतथाकुर्यादितियत्किंचिदनुजानातिअनुज्ञांदत्ते। तत् तत्र तादृशानुज्ञा

र्थविषये । ओमित्येतदेवाक्षरमाह । हियस्मात्तस्मादोन्नामाहरिरितियोज्यं । हरेरोन्नामकत्वाभावेतादृशानुज्ञार्थविषयेओमितिकथंब्रूयादसंगतिप्रसंगादिति । ओमित्यस्यानुज्ञाप्रदोहरिरर्थइतिसमर्थ्यइदानींहरेःपूर्णत्वमप्योमित्यस्यार्थइत्याह । एषो इति । यदनुज्ञायानुज्ञायदोमित्यनुज्ञाक्षरं एषोएषा उएवसमृद्धिः । एतत्समृद्धिवाचि तवकामंसमृद्धंहरिःकरोत्विति वानुज्ञादानविषये । ओमित्यनुजानातिप्राज्ञः । समृद्ध्यर्थताभावेसमृद्धिदोस्तुहरिरित्यस्मिन्नर्थेओमितिकथमनुजानीयादि तिभावः । समृद्धिदोहरिरोमित्यस्यार्थइतिजानतःफलमाह ॥ समर्द्धयितेति । कामितप्राप्तौशक्तोभवतीत्यर्थः ॥ ६ ॥

तेनेयंत्रयीविद्यावर्ततओमित्याश्रावयत्योमितिशꣳसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्यैम हिम्नारसेनतेनोभौकुरुतोयश्चैतदेवंवेदयश्चनवेद ॥ ७ ॥

ओमित्यस्यसर्ववेदार्थबोधकत्वमप्यस्तीतिभावेनाह ॥ तेनेति । तेनओमित्येतदर्थभूतेनविष्णुनास्वप्रतिपाद्यतयाविद्यमानेने यंत्रयीविद्या । ऋग्यजुःसामरूपाप्रणवार्थविष्णुंप्रतिपादयंत्येववर्ततेप्रवर्ततइत्यर्थः । तद्व्यनक्ति ॥ ओमितीति । एतस्यैवा क्षरस्यहरेरपचित्यैपूजार्थंऋगादिवेदः । ओमित्युक्त्वाआश्रावयतितदर्थंव्याख्याति । शास्त्ररूपोमंत्रराशिरोमित्युक्त्वाशंसतित दर्थंव्याख्याति । सामवेदोप्योमित्युक्त्वातदर्थमेवोद्गायति । एतस्यैवापचित्याइतिवाक्यत्रयेप्यन्वेति । एवमोन्नाम्नोहरेःसर्वो त्तमत्वंसर्ववेदार्थत्वंचोक्त्वासर्वप्रवर्तकत्वंचाह ॥ महिम्नेति । सर्ववेदार्थत्वादिमहिमवतारसेनसारभूतेनतेनोन्नामकेनहरिणा ।

उभौ कर्मकुरुतः । काउभौयश्चतदक्षरंएवमुक्तमहिमयुक्ततयावेद । यश्चनवेद तावुभौज्ञाज्ञावित्यर्थः ॥ ७ ॥ सर्वोजनस्तेन कर्मकरोतीत्यनुक्त्वाज्ञाज्ञविभागोक्तिःकुतइत्यतोविद्याविद्ययोर्विलक्षणत्वादित्याह ॥ **नानात्विति** । विद्याचाविद्याचेति । नाना विलक्षणफलहेतू । अतोविभागेनोक्तिरिति । विलक्षणफलहेतुत्वंकथमित्यतःप्राधान्यादन्योपलक्षणत्वेनविद्याफलं दर्शयति ॥ **यदेवेति** । उपनिषदास्वयोग्यया विद्यया यदेवकरोति । तदेवकर्मापरोक्षज्ञानात्पूर्वतनंचेत् साक्षात्कारद्वा

नानातुविद्याचाविद्याचयदेवविद्ययाकरोतिश्रद्धयोपनिषदातदेववीर्यवत्तरंभवतीतिखल्वेतस्यैवाक्षरस्योपव्याख्यानंभवति । अथहयएवायंमुख्यःप्राणस्तमुद्गीथमुपासीततस्येतरैःप्राणैरुपव्याख्यानंभवति ॥ ८ ॥ १ ॥

रावीर्यवत्तरं मुक्तिहेतुर्भवति । भाक्तंवानात्मवित्त्वादित्युक्तेः । साक्षात्कारानंतरभाविचेत् मुक्तावतिशयफलहेतुर्भवतीत्यर्थः । यदेवविद्ययेतिहीतिसूत्रात् । पुरुषार्थनयेतुतच्छ्रुतेरितिसूत्रेऽपरोक्षिणाकृतंकर्ममोक्षेतरफलंवीर्यवत्करोतीत्युक्तं । यदविद्ययाकरोतिनतस्यवीर्यवत् मुक्तिहेतुर्नेत्यप्युपलक्ष्यते । तस्योपव्याख्यानमित्युपक्रम्यकृतंप्रणवव्याख्यानमुपसंहरति ॥ इतिखल्विति । एवमुक्तदिशाखल्वेतस्यैवाक्षरस्योपसमीपे वाचकतयास्थितस्योमित्यस्यव्याख्यानं । अधिकोच्चत्वाद्यर्थ

कथनरूपंव्याख्यानमित्यर्थः ॥ ८ ॥ १ ॥ उद्गीथमुपासीतेत्युक्तंप्राक् । तदुपासनंकुत्रेत्यतःवायोरेवोद्गीथाख्यविष्णोर्मुख्यप्रतिमात्वात्तस्यसर्वजीवोत्तमत्वज्ञानपूर्वकंतस्मिन्नेवततउत्तमत्वेनोपासनंकार्यं । तत्रतथोपासितएवेष्टफलप्रदइतिदर्शयितुंतदुत्तमत्वंआख्यायिकयाह ॥ देवासुराहइति । प्राजापत्याःकश्यपप्रजापतिपुत्रा उभये वर्गद्वयरूपादेवासुराः यत्र यदा संयेतिरे युद्धसन्नद्धाबभूवुःहवैतद्ध तदा देवाःउद्गीथमुपास्याजह्रुरभीष्टदंचक्रुरनेनोद्गीथेनोपासितेनएनान्असुरानभिभविष्यामः । पराभू

देवासुराहवैयत्रसंयेतिरउभयेप्राजापत्यास्तद्धदेवाउद्गीथमाजह्रुरनेनैनानभिभविष्यामइति॥१॥

तेहनासिक्यंप्राणमुद्गीथमुपासांचक्रिरे तꣳहासुराःपाप्मनाविविधुस्तस्मात्तेनोभयंजिघ्रतिसुरभिदुर्गंधिचपाप्मनाह्येषविद्धः ॥ २ ॥ अथहवाचमुद्गीथमुपासांचक्रिरेताꣳहासुराःपाप्मनाविविधुस्तस्मात्तथोभयंवदतिसत्यंचानृतंचपाप्मनाह्येषाविद्धा ॥ ३ ॥

तान्करिष्यामइतिबुद्ध्योद्गीथमाजह्रुरित्यन्वयः ॥ १ ॥ तएवंनिर्णयवंतःकुत्रोपास्याजह्रुरित्यपेक्षायां वायावितिवक्तुमुपासनास्थानान्याह ॥ तेहेति । तेदेवानासिक्यंनासिकाभिमानिनंवायुपुत्रंप्राणं सप्तम्यर्थेद्वितीया नासिक्यप्राणेउद्गीथंहरिमुद्दिश्योपासांचक्रिरइत्यर्थः । एवमग्रेप्यर्थोध्येयः । तंहनासिक्यप्राणंपाप्मनाविविधुःपापवंतमकुर्वत । पाप्मनाहियतोविद्धःतस्मात्तेनप्राणेनोभयंजिघ्रतिजीवइत्यर्थः । एवमग्रेपि ॥२॥ अथप्राणस्यासुरकृतपापवेधानंतरंवाचंवाह्निंवाचीत्यर्थः ॥३॥ चक्षुःचक्षुषि

सूर्ये श्रोत्रंश्रोत्रेसोमे मनःमनसिरुद्रे। उपलक्षणं। अहंमानिनिशेषे चित्तात्मनिगरुडेचेत्यपिग्राह्यं॥ **तमिति**। तस्मिन्मुख्य
प्राणेऋत्वाप्राप्यविदध्वसुःविध्वस्ताअभूवन्। कथंयथाआखणंआदारणीयमश्मानमृत्वाप्राप्यलोष्ठइतिशेषः। विध्वंसेत। एवमि

अथहचक्षुरुद्गीथमुपासांचक्रिरेतद्धासुराःपाप्मनाविविधुस्तस्मात्तेनोभयंपश्यतिदर्शनीयंचादर्श
नीयंचपाप्मनाह्येतद्विद्धमथहश्रोत्रमुद्गीथमुपासांचक्रिरेतद्धासुराःपाप्मनाविविधुस्तस्मात्तेनोभय
ꣳशृणोतिश्रवणीयंचाश्रवणीयंचपाप्मनाह्येतद्विद्धमथहमनउद्गीथमुपासांचक्रिरेतद्धासुराःपाप्म
नाविविधुस्तस्मात्तेनोभयंसंकल्पयतेसंकल्पनीयंचासंकल्पनीयंचपाप्मनाह्येतद्विद्धमथहयएवायं
मुख्यप्राणस्तमुद्गीथमुपासांचक्रिरेतꣳहासुराऋत्वाविदध्वसुर्यथाश्मानमाखणमृत्वाविध्वꣳसेतै
वं(स)यथाश्मानमाखणमृत्वाविध्वꣳसतएवंहवैसविध्वꣳसतेयएवंविदिपापंकामयतेयश्चैनमभि
दासतिसएषोश्माखणः ॥ ४ ॥

तिप्राणप्राप्तासुरविध्वंसनवेदिनःफलमाह॥ **सयथेति**। वक्ष्यमाणदृष्टांतोयथेत्यर्थः। विध्वंसतेलोष्ठइतिशेषः। एवंहैवसवैविध्वं ॥ ५ ॥
सते सकःयएवंविदिप्राणप्राप्तासुरविध्वंसनवेदिनिपापंप्रतीपकरणंकामयतेयश्चैनंप्राणविदमभिदासतिहंतुमिच्छतिसइत्यर्थः।

सएषप्राणमहिमज्ञानीआखणोश्मा ॥४॥ प्राणविदः फलांतरंचाह ॥ **नैवेति** । एतेनप्राणमहिमज्ञानेनसुरभिदुर्गंधिचनैवविजानाति सुरभ्येवजानातीत्यर्थः।तेनज्ञानेनापहतपाप्माह्येषप्राणज्ञानीभवति। पापाविद्धत्वाद्देहस्थोमुख्यप्राणोमहानित्युक्तंअशनादिनाइतरप्राणरक्षकत्वाच्चमहानितिभावेनाह ॥ **यदिति** । सर्वप्राणिशरीरस्थोमुख्यप्राणोयदश्नातियत्पिबतितेनाशनादिनाइतरान्घ्राणादिप्राणान्अवति ततश्चमहानितियोज्यं । किंचएतंमुख्यप्राणमेवांततःसर्वजीवोत्तमत्वेनविदित्वोत्क्रामतिमु

नैवैतेनसुरभिनदुर्गंधिविजानात्यपहतपाप्माह्येषतेनयदश्नातियत्पिबतितेनेतरान्प्राणानवत्येतमु एवांततोवित्त्वोत्क्रामतिव्याददात्येवांततइति ॥ ५ ॥ तꣳहांगिराउद्गीथमुपासांचक्रएतमुएवांगिरसंमन्यंतेंगानांयद्रसस्तेनतꣳहबृहस्पतिरुद्गीथमुपासांचक्रएतमुएवबृहस्पतिंमन्यंतेवाग्घिबृहतीतस्याएषपतिस्तेनतꣳहायास्यउद्गीथमुपासांचक्रएतमुएवायास्यंमन्यंतआस्याद्यदयतेतेनतंहबकोदाल्भ्योविदांचकार ॥ ६ ॥

क्तोभवति। मुक्तिहेतुज्ञानविषयत्वाच्चमहान्प्राणइत्यर्थः। ननुनान्यःपंथाअयनायेत्युक्तेःकथमेतदित्यतआह ॥ **व्याददात्येवांततइति** । विविशिष्टंविष्णुंअंततःसर्वोत्तमत्वेनाददात्येवस्वीकरोत्येव मुख्यप्राणप्रसादाज्ज्ञानात्येवेतिहेतोर्नदोषइत्यर्थः ॥५॥ नकेवलंदेवाएवस्वकार्यसिद्धयेप्राणमुद्गीथमुपासितवंतःकिंतुऋषयोपीत्याह ॥ **तंहेति** । तस्मिन्मुख्यप्राणेहअंगिरानामऋषिः उद्गीथमुपास्तेत्यर्थः । अन्येचमुनयउपासतेत्यप्युपलक्ष्यते । प्राणेउद्गीथमुपास्यऋषयोनकेवलमभीष्टसिद्धिमाप्ताःकिंतुस्वस्वना

मानिचभेजिरइतिफलवाक्यमप्यत्रग्राह्यं। अंगिरःप्रभृतिमुनिनामानिमुख्यतोवायोरेव तत्प्रसादेनैषांनामानिप्राप्तानीतिभावे नाह ॥ एतमुएवेति । मुख्यप्राणमेवमन्यंतेप्राज्ञाः। कुतः यत् यस्मादंगानांसर्वप्राणिशरीराणांरसोनियंतातेनकारणेनेति। एवमन्यमुनिनामनिर्वचनमपिप्राणेग्राह्यं। एवंदेवाअपिप्राणेउद्गीथोपासनयास्वस्वनामानिभेजिरे। तस्यैवतुतानिनामानिमुख्यानीत्याह ॥ तंबृहस्पतिरिति । तस्मिन्प्राणइत्यर्थः। चकइत्यनंतरंबृहस्पतिरितिचनामलेभइतिशेषः। कुतइत्यतोवायावेवतन्नाम्नोमुख्यत्वादित्याह ॥ एतमिति । मुख्यप्राणमितिप्राग्वदर्थः तमितितस्मिन्नित्यर्थः। चकइत्यनंतरंअयास्येतिनामलेभे

सहनैमिशीयानामुद्गाताबभूवसहस्मैभ्यःकामानागायत्यागाताहवैकामानांभवतियएतदेवंविद्वानक्षरमुद्गीथमुपास्तइत्यध्यात्मं ॥ ७ ॥ २ ॥

इतिशेषः। कुतः वायावेवतन्नाम्नोमुख्यत्वादित्याह ॥ एतमिति । आस्यान्मुखादयतेगच्छति। दाल्भ्योदल्भ्यपुत्रोबकोनाममुनिःतमुक्तमहिमयुक्तंप्राणंविदांचकारज्ञातवान् ॥ ६ ॥ सप्राणज्ञानीबकःनैमिशीयानांनैमिशारण्यवासिनामुद्गाताबभूव। सहएभ्यःकामान्कामितान्आगायत गानेनप्रापितवान्। अतःकारणात्। यएवंप्राणमाहात्म्यंततोतिमाहात्म्यंचहरेःविद्वान ॥ ६ ॥
क्षरंउद्गीथंहरिमुपास्तेसकामानामागाताभवतिगानेनकामितप्राप्ताभवति । इत्यध्यात्मंदेहस्थप्राणादिगतोद्गीथोपास्तिमाहात्म्यं

निरूपितमित्यर्थः ॥ ७ ॥ २ ॥ अथाध्यात्मोद्गीथोपास्त्युक्त्यनंतरं अधिदैवतगतोद्गीथोपास्तिरुच्यतइत्यर्थः । तदाह ॥ **यएवेति** । यएवासौसूर्यमंडलस्थोवायुस्तपतिप्रकाशते । तं द्वितीयासप्तम्यर्थे । तस्मिन्नुद्गीथंहरिमुपासीत एषमुख्यवायुः स्वतउदयास्तमयहीनोपि उद्यन्मंडलोदयेनप्रजाभ्यउद्यन्निवसन्नुद्गायति । हरिमितिशेषः । उद्यन्मंडलद्वारोद्यन्नुभयंतमः । बाह्याभ्यंतरंतमोपहंति एवंवेदिनःफलमाह ॥ अपहंतेति । एवंउभयतमोहंतृत्वेनप्राणंवेदसउभयस्यतमसोपहंताहवैभवति ॥ १ ॥ अध्यात्माधिदैवतोद्गीथोपासनयोर्मध्येकिमुपासनंसाध्वित्यतोद्वयमपिसमानमितिभावेनोभयत्रस्थितवाय्वोरुष्णत्वादि

अथाधिदैवतंयएवासौतपतितमुद्गीथमुपासीतोद्यन्वाएषप्रजाभ्यउद्गायत्युद्यंस्तमोभयमपहंत्यप हंताहवैउभयस्यतमसोभवतियएवंवेद ॥ १ ॥ समानउएवायंचासौचोष्णोयमुष्णोसौस्वरइतीम माचक्षतेस्वरइतिप्रत्यास्वरइत्यमुंतस्माद्वाएतमिममुंचोद्गीथमुपासीत ॥ २ ॥

नासाम्यमाह ॥ **समानइति** । अयंदेहस्थः । असौमंडलस्थश्चसमानएव उ खलु कथमुष्णोयंदेहस्थोवायुः । उष्णोसौसूर्यमंडलगः । इमंदेहस्थंवायुंस्वरइति । स्वेस्वतंत्रेरमतइतिस्वरइत्याचक्षतेप्राज्ञाः । अमुंसूर्यमंडलगंप्रत्यास्वरइति । आसमंतात्मांप्रतिमांप्रतीतिप्रतिपुरुषाभिमुख्येनस्थितमंडलस्थत्वात्स्वेविष्णौरतत्वाच्चप्रत्यास्वरइत्याचक्षते तस्मादध्यात्माधिदैवगतवाय्वोरुष्णत्वादिनासमत्वात् । एतमित्यस्यविवरणमिममुंचेतिसप्तम्यौ देहस्थेसूर्यगेचवायावुद्गीथमुपासीतेति॥२॥

व्याननिष्ठोद्गीथोपास्तिमाह ॥ अथखल्विति । स्थलांतरेउपास्त्युक्त्यारंभार्थोथशब्दः । व्यानस्यातिशयद्योतकःखलुशब्दः व्यानंव्यानाख्यमुख्यवायुरूपमेव । उद्गीथंहरिमुपासीत । कोविशेषस्तस्येत्यतोहेतुत्रयंविवक्षुरादौप्राणापानसंधिप्रवर्तकत्वंहेतुं तावदाह । यउद्गीथेनानुप्रविष्टःसन्प्राणापानयोस्संधिःसंधिप्रवर्तकःसव्यानइति कौप्राणापानावित्यतःतल्लक्षणोक्तिपूर्वंतावाह ॥ यद्वाइति । यत्यःप्राणितिऊर्ध्वंप्राणनंकरोतिसप्राणः यत्योअपानितिअधोमलादिनयतिसोपानइति वागृक्सामो

अथखलुव्यानमेवोद्गीथमुपासीतयद्वैप्राणितिसप्राणोयदपानितिसोपानोथयःप्राणापानयोःसं
धिःसव्यानोयोव्यानःसावाक्तस्मादप्राणन्ननपानन्वाचमभिव्याहरतियावाक्सर्क्तस्मादप्राणन्न
नपानन्नृचमभिव्याहरतियर्क्तत्सामतस्मादप्राणन्ननपानन्त्सामगायतियत्सामसउद्गीथस्तस्माद
प्राणन्ननपानन्नुद्गायत्यतो ॥ ३ ॥

द्गीथप्रवर्तकत्वंद्वितीयंहेतुमाह योव्यानः । व्यानेनुप्रविष्टःप्राणापानसंधिकर्तोद्गीथः । सा वाक् वाचि तिष्ठति विधेयापेक्षयासेतिस्त्रीलिंगं । वाग्व्यवहारःप्राणादिनाकिंनस्यादित्यतोनेत्याह ॥ तस्मादिति । व्यानगस्यवाग्गतत्वेनवाग्व्यवहारहेतुत्वादेवाप्राणन्ननपानन्प्राणापानौनिरुध्यवाचमभिव्याहरत्यतोव्यानगएववाचिगतःसन्वाग्व्यवहारप्रवर्तकइति । यावाक् वाचिस्थः । सा ऋक् ऋचिस्थः । तस्मात्व्यानेवाचिचानुगतस्योद्गीथस्यैवऋचिस्थिततयाऋगभिव्याहरणहेतुत्वादेव

अप्राणन्नित्यादिप्राग्वत् याऋक्कऋचिस्थोयउद्गीथनामाहरिः । तत्साम ससामगतः । तस्मात्व्यानवाग्गृगनुगतस्यैवसामगत्वे नसामगानप्रवर्तकत्वादित्यर्थः । यत्साम । यः सामगः सउद्गीथः सामभेदरूपोद्गीथस्थः तस्माद्व्यानादिष्वनुगतस्यैवोद्गीथरूपसाम भेदस्थत्वेनउद्गानप्रवर्तकत्वादित्यर्थः ॥ अतइति । अतोव्यानस्यप्राणादितोतिशयितत्वात्तत्रोद्गीथमुपासीतेतियोजना ॥३॥ व्यानेउद्गीथोपास्तौतृतीयमपिहेतुमाह ॥ यानीत्यादिना । यान्यन्यानिवीर्यवंतिबलवंतिकर्माणि तान्याह ॥ अग्नेरि

यान्यन्यानिवीर्यवंतिकर्माणियथाग्नेर्मथनमाजेःसरणंदृढस्यधनुषआयमनमप्राणन्ननपानंस्तानिक रोत्येतस्यहेतोर्व्यानमेवोद्गीथमुपासीत ॥ ४ ॥ अथखल्वुद्गीथाक्षराण्युपासीतोद्गीथइतिप्राणएवो त्प्राणेनह्युत्तिष्ठतिवाग्गीर्वाचोहिगिरइत्याचक्षतेऽन्नंथमन्ने(न)हीदंसर्वंस्थितंद्यौरेवोदंतरिक्षंगीःपृ थिवीथमादित्यएवोद्वायुर्गीरग्निस्थंसामवेदएवोद्यजुर्वेदोगीर्ऋग्वेदस्थंदुग्धेस्मैवाग्दोहंयोवाचोदो होन्नवानन्नादोभवतियएतान्येवंविद्वानुद्गीथाक्षराण्युपास्तउद्गीथइति ॥ ५ ॥

त्यादिना । मथनंअरणिभ्यांमथनं आजेःयुद्धस्यसरणंगमनं दृढस्यधनुषआयमनंअवनमनं ज्यारोपणमितियावत् । तानिचकर्माणिअप्राणन्ननपानन्करोतीत्येतस्यहेतोः । एतस्मात्कारणात् व्यानं व्याने उद्गीथमुपासीतेत्युपसंहारः ॥ ४ ॥ उद्गीथाक्षरप्रतिपाद्यप्राणादिस्थितभगवदुपास्तिमाह ॥ अथखल्वित्यादिना । अक्षराणिअक्षरप्रतिपाद्यप्राणा

दिस्थितोद्गीथंउपासीतेत्यर्थः । तान्यक्षराणिनिर्दिशति ॥ उद्गीथइति । अक्षरप्रतिपाद्यान्याह ॥ प्राणएवोदिति । तदुपपादयति । प्राणेनोत्तिष्ठत्युत्पत्त्यादिमद्भवतिहियतोतःप्राणउदित्युच्यतइति वाक्वाणी । गीरित्युक्तंव्यनक्ति ॥ वाचो हीति । वाचइतिद्वितीयांतंहेतिप्रसिद्धिमाह । अन्नंथमित्युक्तंव्यनक्ति ॥ अन्ने(न)हीति । सर्वंप्राणिजातंस्थितंस्थितिमत् हियतोतइति । तस्मादेतद्ब्रह्मनामरूपमन्नंचजायतइत्यादावन्नाभिमानीब्रह्माप्रसिद्धइतिभाष्येतदनुक्तिः । द्यौरित्यादिपदैरभि

अथखल्वाशीःसमृद्धिरुपसरणानीत्युपासीतयेनसाम्नास्तोष्यन्त्स्यात्तत्सामोपधावेद्यस्यामृचिता मृचंयदार्षेयंतमृषिंयांदेवतामभिष्टोष्यन्त्स्यात्तां देवतामुपधावेद्येनच्छंदसास्तोष्यन्त्स्यात्तच्छंद उपधावेद्येनस्तोमेनस्तोष्यमाणः स्यात्तꣳस्तोममुपधावेद्यांदिशमभिष्टोष्यन्त्स्यात्तांदिशमुपधावे दात्मानमंततउपसृत्यस्तुवीत कामंध्यायन्नप्रमत्तोभ्याशोहयदस्मैसकामःसमृध्येतयत्कामस्तुवी तेतियत्कामस्तुवीतेति ॥ ६ ॥ ३ ॥

मानिनयन्यायेनतत्तदभिमानिनउदाद्यक्षरवाच्याध्येयाः वायुःभूतवायुमानी ज्ञानिनःफलमाह ॥ दुग्धइति । योधिकारी उत् गी थ इतिएतान्युद्गीथाक्षराणिएतेषूद्गीथाक्षरेषुउदाद्यक्षरवाच्येषुप्राणादिषुचतुर्वर्गेष्वितियावत् । स्थितंहरिमुपास्ते अस्मै उपासकाययोवाचोदोहोस्तिप्रसिद्धः तंवाग्दोहं । दुग्धे ददाति । उपासितउद्गीथनामाहरिरितियोजना अन्नवानन्नादश्चभवतीत्यर्थः ॥ ५ ॥ आशिषांसमृद्ध्यर्थं तत्कारणं । तत्कारणस्थितभगवदुपासनमाह ॥ अथखल्विति । आ ॥ ८ ॥

शीस्समृद्धिः । आशिषामाशास्यमानानांसमृद्धिःसमृद्धिकारणान्युच्यंतइत्यर्थः । तानिकानीत्यतआह ॥ **उपसरणानीति** । उपसारयंत्यभीष्टमित्युपसरणानि । सामदेवताप्रभृतीनि आशीस्समृद्धिकारणानि । उपसरणानीतिमत्वातान्युपासीत । उपसरणान्याह ॥ **येनेत्यादिना** । येनबृहद्रथंतरादिनासाम्नास्तोष्यन्स्तोत्रंकरिष्यन्स्यात्तत्सामोपधावेत्आददीततत्सामगंहरिंसर्वोत्तमत्वेनज्ञात्वातत्सामगायेदित्यर्थः ॥ **यस्यामृचीति** । साम्नास्तोष्यन्स्यादित्यनुषज्यतेतामृचमुपधावेदित्यप्यनुषज्यते। एवमग्रेपि।तदृक्स्थितंहरिंसर्वोत्तमत्वेनज्ञात्वातदृगध्यूढंसामगायेदित्यर्थः।यदार्षेयंयदृषिकंसामादितमृषिंतदृषिगतंसर्वोत्तमत्वेनज्ञात्वातदृषिकमभिव्याहरेदित्यर्थः । यद्देवतांयांदेवतामभिष्टोष्यन्स्यात् तांदेवतामुपधावेत् तद्देवतास्थंहरिंसर्वोत्तमत्वेनज्ञात्वास्तुवीतेत्यर्थः ॥ **तच्छंदउपधावेदिति** । तच्छंदोभिमानिदेवतास्थंहरिंसर्वाधिक्येनज्ञात्वातच्छंदआददीतेत्यर्थः। तंस्तोमं । सामोपेतत्रिवृत्पंचदशादिऋग्विशेषसमुदायं उपधावेत् । तत्रत्यंहरिमुक्तरूपेणज्ञात्वातंस्तोममभिव्याहरेदित्यर्थः । यांदिशं अभि प्रति तांदिशंतद्दिगवस्थितंहरिमुक्तरूपेणज्ञात्वोपधावेत्आददीतेति । पूर्वत्रव्यानमुद्गीथमुपासीतेत्यादौतांदिशमित्येतदंतंहरेस्तदात्मकत्वेनोपास्तिःप्रतीयते। तांप्रतीतिंउपनिषत्स्वयमेवनिवारयति ॥ **आत्मानमिति** । आत्मानंपरमात्मानंअंततःसर्वोत्तमत्वेनसर्वत्रसर्वासूपास्तिषुउपसृत्यज्ञात्वास्तुवीतउपासीतेतियावत् । कथं कामं स्वकामितंध्यायन्नुद्दिश्येतियावत् । अप्रमत्तः प्रमादहीनःसन्स्तुवीतेत्यर्थः। यद्यस्मादस्मैस्तोत्रेसकामःअभ्याशःसमीपएवशीघ्रमितियावत्। समृध्येत यत्कामः

छांदोग्य० स्तुवीतसकामइत्यर्थः।द्विरुक्तिस्तात्पर्यद्योतनार्थासमाप्त्यर्थावा ॥६॥३॥ पूर्वमुद्गीथैकदेशप्रणवोपास्तेःफलानुक्तेस्तामनुवदन्मो खंडार्थ.
॥ ९ ॥ क्षरूपफलमाख्यायिकयाह॥ ओमित्यादिना।पूर्ववदर्थोध्येयः । तस्य अक्षरस्यहरेःउप वाचकतयासमीपस्थस्योमित्यस्य १।४
व्याख्यानं तदर्थोपासनस्यमुक्तिहेतुत्वनिरूपणमाख्यायिकापूर्वंक्रियतइत्यर्थः । देवावै देवाःखलु मृत्योः मारकत्वहेतुनामृ
त्युनाम्न्यादुर्गायास्सकाशाद्बिभ्यतोभीतियुक्ताःसंतः । त्रयींविद्यांप्राविशन् शरणमितिशेषः। प्रणवेनविनाकेवलंऋगादिवेदा
ध्ययनतदर्थोपासनादिचक्रुरित्यर्थः । अग्निमीळे वायवायाहीत्यादि । स्वनाम्नावेदोपबद्धाइत्यर्थइत्येके। तेदेवाःछंदोभिर्वेदैरा

**ओमित्येतदक्षरमुद्गीथमुपासीतोमितिह्युद्गायतितस्योपव्याख्यानंदेवावैमृत्योर्बिभ्यतस्त्रयींविद्यां
प्राविशꣳस्तेच्छंदोभिराच्छादयन्यदेभिराच्छादयꣳस्तच्छंदसांछंदस्त्वंतानुतत्रमृत्युर्यथामत्स्य
मुदकेपरिपश्येदेवंपर्यपश्यदृचिसाम्नियजुषितेनुवित्त्वोर्ध्वाऋचःसाम्नोयजुषःस्वरमेवप्राविशन्॥१॥**

त्मानमाच्छादयन् नित्यंतदेकशीलाअभूवन्। कथमेतज्ज्ञायतइत्यतआह॥ यदिति। एभिः छंदोभिःआच्छादयन्नितियत्तदे
वछंदसांछंदस्त्वंछंदःपदप्रवृत्तिनिमित्तमितिकृत्वाज्ञायतइत्यर्थः। तानु तान् उ तत्रेत्यस्यविवरणंऋचीत्यादि ऋगादित्रयी
विद्यायांस्थितान्पर्यपश्यत्उ पर्यपश्यदेवमृत्युः । कथं यथामत्स्यंउदकेपरिपश्येदेवमिति । ऊर्ध्वाउत्तमास्तेदेवाः । ॥ ९ ॥
वित्त्वा विदित्वा मृत्युरस्मानपश्यदितिविदित्वा । ऋचःसाम्नोयजुषःल्यब्लोपेपंचम्यः । ऋगादिपरित्यज्यस्वरमेवप्रावि

शन् स्वातंत्र्यात्स्वोविष्णुःतद्रतेःस्वरोवायुः । तत्र स्वराख्ये वायौस्थितं । स्वरमणतयास्वराख्यं । विष्णुमेवस्वराख्यप्रण वप्रतिपाद्यं । शरणंप्राविशन्नित्यर्थः ॥१॥ कथमेतज्ज्ञायतइत्यतआह ॥ यदेति । केवलऋगादीनांमृत्युतोरक्षणेशक्त्यभावादे वखलुइदानींतनोयदाऋचमाप्नोति अधीते तदाओमित्येवाभिस्वरति । प्रणवपूर्वकमेवाधीतइत्यर्थः । एवंप्रणवपूर्वकमेव सामाधीते । यजुरधीतइत्यर्थः । कःस्वरवाच्यइत्यतःश्रुतिःस्वयमेवाह एषउ एषएव । स्वरःस्वराख्यप्रणववाच्यः । यदेत

यदाऋचमाप्नोत्योमित्येवातिस्वरत्येवꣳसामैवंयजुरेषउस्वरोयदेतदक्षरमेतदमृतमभयंतत्प्रविश्य देवाअमृताअभवन्त्सयएतदेवंविद्वानक्षरंप्रणौत्येतदेवाक्षरꣳस्वरममृतमभयं प्रविशतितत्प्रवि श्ययदमृतादेवास्तदमृतोभवति ॥ २ ॥ ४ ॥

दक्षराख्यंब्रह्मतस्यमहिमानमाह ॥ **एतदमृतमभयमिति** । तत्प्रविश्यतदुपास्यदेवाःअमृतामुक्ताअभयाअभवन्निति नके वलंदेवाएवप्रणवार्थोपासनयाअमृतत्वमाप्ताः किंत्वन्यस्यापितदुपासनयाऽमृतत्वंभवतीत्याह ॥ **सयइति** । योधिकारी एतदक्षरंब्रह्म । एवंप्रणवार्थतयोपासितंसत् देवानांमुक्त्यादिदमिति विद्वान् प्रणौति प्रणवेनस्तौति । सएतदेवाक्ष रंस्वरं स्वरप्रतिपाद्यममृतंअभयंहरिंप्रविशति । तदक्षरंप्रविश्यदेवाः यदमृताःयस्मान्मृत्युतोमृतिहीनाःअभवन् तदमृतः

तस्मान्मृत्युतोमृतिहीनोभवति । मुक्तोभवतीतियावत् ॥ २ ॥ ४ ॥ द्वितीयखंडेसमग्रोद्गीथोपासकस्यएतमुएवांततोविदि
त्वोत्क्रामतीतिमोक्षाख्यफलमुक्तमिदानींबहुपुत्रावाप्तिफलांसमग्रोद्गीथनिष्ठामुपास्तिमाख्यायिकयाह ॥ अथखल्वित्या
दिना । अथशब्दोविद्यांतरारंभार्थः । यउद्गीथउच्चैर्गेयत्वहेतुनाउद्गीथनामाहरिः सप्रणवःप्रकृष्टत्वनेतृत्वसर्वगतित्वहेतुभिः
प्रणवनामासन्प्रणवाख्यवायुस्थः यःप्रणवःप्रणवाख्यवायुगःसउद्गीथइतिपुनरुक्तिरभेदोपचारनिवृत्त्यर्था । इतिखलुप्रसि
द्धमित्यर्थः । यद्वा । इत्युपास्यन्निनितिशेषः । उद्गीथोवायुगइत्युक्तं । कुत्रस्थितेवायौप्रणवनामोद्गीथस्तिष्ठतीत्यतआह ॥ अ

अथखलुयउद्गीथःसप्रणवोयःप्रणवःसउद्गीथइत्यसौवाआदित्यउद्गीथएषप्रणवओमितिह्येषस्वर
न्नेति ॥ १ ॥ एतमुएवाहमभ्यगासिषंतस्मान्ममत्वमेकोसीतिहकौषीतकिःपुत्रमुवाचरश्मीꣳस्त्वं
पर्यावर्तयताद्बहवोवैतेभविष्यंतीत्यधिदैवतं ॥ २ ॥

सावितिि । असावादित्यआदित्यस्थउद्गीथोहरिःएषउद्गीथःप्रणवः । आदित्यस्थप्रणवशब्दितमुख्यवायुगतइत्यर्थः । एषआ
दित्यस्थवायुगतउद्गीथोहरिः । ओमितिस्वरन्जपन् एतिसंचरति । हिप्रसिद्धं ॥ १ ॥ एतमुएवादित्यगतमुख्यवायुस्थमो
मितिस्वरंतमुद्गीथमेकमहमभ्यगासिषं गानेनस्तुतवानभूवं । तस्मादेकस्योपासनात्ममत्वमेकोसीतिहकौषीतकिर्नाममुनिःपु
त्रमुवाच । पुत्रंप्रत्यन्यदप्युक्तवानित्याह ॥ रश्मीनिति । हेपुत्र त्वं रश्मीन् रश्मिषुस्थितवायुगतभगवद्रूपाणि । प

॥ १० ॥

तस्मान्मृत्युतोमृतिहीनोभवति । मुक्तोभवतीतियावत् ॥ २ ॥ ४ ॥ द्वितीयखंडेसमग्रोद्गीथोपासकस्यएतमुएवांततोविदि
त्वोत्क्रामतीतिमोक्षाख्यफलमुक्तमिदानींबहुपुत्रावाप्तिफलांसमग्रोद्गीथनिष्ठामुपास्तिमाख्यायिकयाह ॥ अथखल्वित्या
दिना । अथशब्दोविद्यांतरारंभार्थः । यउद्गीथउच्चैर्गेयत्वहेतुनाउद्गीथनामाहरिः सप्रणवःप्रकृष्टत्वनेतृत्वसर्वगतित्वहेतुभिः
प्रणवनामासन्प्रणवाख्यवायुस्थः यःप्रणवःप्रणवाख्यवायुगःसउद्गीथइतिपुनरुक्तिरभेदोपचारनिवृत्त्यर्था । इतिखलुप्रसि
द्धमित्यर्थः । यद्वा । इत्युपास्यन्निति शेषः । उद्गीथोवायुगइत्युक्तं । कुत्रस्थितेवायौप्रणवनामोद्गीथस्तिष्ठतीत्यतआह ॥ अ

अथखलुयउद्गीथःसप्रणवोयःप्रणवःसउद्गीथइत्यसौवाआदित्यउद्गीथएषप्रणवओमितिह्येषस्वर
न्नेति ॥ १ ॥ एतमुएवाहमभ्यगासिषंतस्मान्ममत्वमेकोसीतिहकौषीतकिःपुत्रमुवाचरश्मींस्त्वं
पर्यावर्तयताद्बहवोवैतेभविष्यंतीत्यधिदैवतं ॥ २ ॥

सावि ति । असावादित्यआदित्यस्थउद्गीथोहरिःएषउद्गीथःप्रणवः। आदित्यस्थप्रणवशब्दितमुख्यवायुगतइत्यर्थः । एषआ
दित्यस्थवायुगतउद्गीथोहरिः । ओमितिस्वरन्जपन् एतिसंचरति । हिप्रसिद्धं ॥ १ ॥ एतमुएवादित्यगतमुख्यवायुस्थमो
मितिस्वरंतमुद्गीथमेकमहमभ्यगासिषं गानेनस्तुतवानभूवं । तस्मादेकस्योपासनात्ममत्वमेकोसीतिहकौषीतकिर्नाममुनिःपु ॥ १० ॥
त्रमुवाच । पुत्रंप्रत्यन्यदप्युक्तवानित्याह ॥ रश्मीनिति । हेपुत्र त्वं रश्मीन् रश्मिषुस्थितवायुगतभगवद्रूपाणि । प

र्यावर्त्तयतात् उपास्स्व । ते एवंध्यायतस्तवबहवःपुत्राभविष्यंति । अंततोविमुक्तिश्चभविष्यतीतिचपुत्रमुवाचेतियोजना इत्य धिदैवतं पुत्रफलकोपास्तिरुक्तेत्यर्थः ॥ २ ॥ अथाध्यात्मं । सैवोपास्तिरुच्यतइत्यर्थः । यएवायंदेहगोमुख्यप्राणस्तंतस्मि न्नुद्गीथंहरिमुपास्यन्अभ्यगासिषमित्यन्वयः । एषप्राणगओमितिस्वरन्जपन्नेति ॥ ३ ॥ एतमुएवदेहस्थप्राणगतमुद्गीथमहम भ्यगासिषंतस्मादित्यादिप्राग्वत् । प्राणान्प्राणेषुस्थितंभूमानंपरिपूर्णंहरिं । इतिपुत्रमुवाचेत्यनुषंगः ॥ ४ ॥ अथखल्विति वि

अथाध्यात्मंयएवायंमुख्यप्राणस्तमुद्गीथमुपासीतोमितिह्येषस्वरन्नेति ॥ ३ ॥ एतमुएवाहमभ्यगा सिषंतस्मान्ममत्वमेकोसीतिहकौषीतकिःपुत्रमुवाचप्राणांस्त्वंभूमानमभिगायताद्बहवोवैतेभ विष्यंतीति ॥ ४ ॥ अथखलुयउद्गीथःसप्रणवोयःप्रणवःसउद्गीथइतिहोतृषदनाद्धैवापिदुरुद्गी तमनुसमाहरतीत्यनुसमाहरतीति ॥ ५ ॥ ५ ॥

इयमेवर्गग्निःसामतदेतदेतस्यामृच्यध्यूढꣳसामतस्मादृच्यध्यूढꣳसामगीयतेइयमेवसाग्निरमस्त त्साम ॥ १ ॥

द्यासमाप्तौपुनरुक्तिः । दुरुक्त्यादिहेतुकपापनिवृत्त्यर्थामुपास्तिमाह ॥ होत्रिति । अग्निर्वैहोतेत्युक्तेर्होतासदनमाश्रयोयस्यस होतृषदनोग्निः । होतृषदनात् होतृषदनाख्याग्निस्थितात् । ल्यब्लोपेपंचमी । होतृषदनस्थंहरिमुपास्यैवदुरुद्गीतमनुसमाहरति । अनुरूपमेवकरोतीष्टहेतुंकरोतीत्यर्थः । द्विरुक्तिरादरार्था विद्यासमाप्त्यर्थावा ॥ ५ ॥ ५ ॥ वाचऋग्रसःऋचःसामरसइति प्रकृ

तऋक्सामयोश्चेश्वरवर्गत्वात् अधिदैवमध्यात्मंचतदुपास्तिपूर्वंतत्परिवृतोद्गीथोपास्तिमाह ॥ इयमेवेत्यादिना । इयमेव पृथिवीस्थैववाणीऋगित्युच्यते । अग्निरग्निस्थोग्निनामावायुःसाम । साममानीवायुःसर्वत्रसमत्वात्सामेत्युच्यते तदेतस्यामृचिऋग्देव्यांवाण्यांअध्यूढमारूढंसामतस्मात्ऋग्देव्यांसामनाम्नोवायोरध्यूढत्वादेवाखिलैर्जनैर्ऋच्यध्यूढंबाह्यंसामगीयते । वाणीवाणीशावित्येतद्द्वयंएकशरीरंसामनामकंवर्ततइत्याह ॥ इयमित्यादिना । इयमेवपृथिवीस्थैववाग्देवीसेत्युच्यते । अग्निस्थोवा

अंतरिक्षमेवर्ग्वायुःसामतदेतदेतस्यामृच्यध्यूढꣳसामतस्माहृच्यध्यूढꣳसामगीयतेंतरिक्षमेवसावा
युरमस्तत्साम ॥ २ ॥ द्यौरेवर्गादित्यःसामतदेतदेतस्यामृच्यध्यूढꣳसामतस्माहृच्यध्यूढꣳसामगी
यतेद्यौरेवसादित्योऽमस्तत्साम ॥ ३ ॥ नक्षत्राण्येवर्क्चंद्रमाःसामतदेतदेतस्यामृच्यध्यूढꣳसामत
स्माहृच्यध्यूढꣳसामगीयतेनक्षत्राण्येवसाचंद्रमाअमस्तत्साम ॥४॥ अथयदेतदादित्यस्यशुक्लंभाः
सैवर्गथयन्नीलंपरःकृष्णंतत्सामतदेतदेतस्यामृच्यध्यूढꣳसामतस्माहृच्यध्यूढꣳसामगीयतेऽथयदे
वैतदादित्यस्यशुक्लंभाःसैवसाथयन्नीलंपरःकृष्णंतदमस्तत्साम ॥ ५ ॥

युरमः तदुभयंमिथुनंसामेत्युच्यते ॥ १ ॥ एवमंतरिक्षद्युनक्षत्रादित्यघटितेवाक्यचतुष्टयेपियोजनाध्येया । अंतरिक्षमंतरिक्षस्थावाग्देवी वायुःभूतवायुस्थःप्राणः ॥ २ ॥ द्यौरेवद्युलोकस्थावाणी । आदित्यआदित्यस्थःप्राणः ॥ ३ ॥ नक्षत्राण्येवनक्षत्रस्थावाणी। चंद्रमाः चंद्रमस्थःप्राणः ॥ ४॥ शुक्लंभाःशुक्लेभासिप्रकाशेस्थितावाणी परःकृष्णंअत्यंतकृष्णंयन्नीलंतत्रस्थःप्राणः ।

॥ ११ ॥

सैवेतितत्रस्थेत्यर्थः ॥ ५ ॥ किमेतौवाणीवाणीशौप्रधानपूज्यावित्यतोऽन्यसेवकतयेतिवक्तुंतत्सेव्यंतन्महिमानंचाह ॥ अथय इति । अर्थांतरेअथशब्दः । यएषआदित्यांतःपुरुषोहिरण्मयःविलक्षणसुखरूपःस्वर्णवर्णइतिवा दृश्यतेज्ञानदृष्ट्याहिरण्यश्मश्रुः आप्रणखात् नखपर्यंतं । सर्वएवविग्रहःसुवर्णःअत्यंतसुखरूपइत्यर्थः ॥ ६ ॥ तस्यादित्यस्थस्यहरेः यथा कप्यासं कमुदकंपिबन्नालंकपितत्रास्तइतिकप्यासंपुंडरीकंरक्तपद्मंयथाएवमेतस्यादित्यस्थस्याक्षिणी । कंपिबन्नालसंबंधिनलिनायतलोचन

अथयएषोंतरादित्येहिरण्मयःपुरुषोदृश्यतेहिरण्यश्मश्रुर्हिरण्यकेशआप्रणखात्सर्वएवसुवर्णः६
तस्ययथाकप्यासंपुंडरीकमेवमक्षिणीतस्योदितिनामसएषसर्वेभ्यःपाप्मभ्यउदितउदेतिहवैसर्वेभ्यःपाप्मभ्योयएवंवेद ॥ ७ ॥ तस्यर्क्सामचगेष्णौतस्मादुद्गीथस्तस्मात्त्वेवोद्गातैतस्यहिगातासएषयेचामुष्मात्परांचोलोकास्तेषांचेष्टेदेवकामानांचेत्यधिदैवतं ॥ ८ ॥ ६ ॥

इत्यर्थः । तस्योदितिनामकुतइत्यतआह ॥ **सएषइति** । उदितःउद्गतः । ज्ञानिनःफलमाह ॥ **उदेतीति** ॥ ७ ॥ एवंसेव्यमुक्त्वातत्सेवकावेतावित्याह ॥ **तस्येति** । आदित्यस्थस्य ऋक्साम वाक्प्राणौ । गेष्णौगायकौतस्मात्वाक्प्राणाभ्यामुद्गीतत्वादादित्यस्थः उद्गीथःउच्चोसौगीयतेचेत्युद्गीथः । तस्मादेववाक्प्राणयोरेतद्गायकत्वादेवोद्गाताऋत्विक् । एतस्यादित्यस्थस्यगाता हिप्रसिद्धं । सएषआदित्यस्थःयेचअमुष्मात्स्वर्गात्परांचउपरितनलोकास्तेषांचेष्टेदेवकामानांस्व

र्ग्यकामानांचेष्टेईशोवर्ततइत्यधिदैवतमुद्गीथोपास्तिरुक्तेत्यर्थः ॥ ८ ॥ ६ ॥ अथाध्यात्मंदेहस्थाक्षिगतस्योपास्तिरुच्यतइत्य
र्थः । वागेव वागिंद्रियस्थावाणी । प्राणः देहस्थप्राणेषुविद्यमानोमुख्यप्राणः । वागेवेत्यारभ्यमनुष्यकामानांचेत्यंतस्यपूर्ववत्रे
वार्थोध्येयः ॥१॥ चक्षुःचक्षुस्थआत्माजीवःजीवस्थप्राणःसामेत्यर्थः ॥ २ ॥ श्रोत्रंश्रोत्रस्थंमनःमनोगतःप्राणः ॥ ३ ॥ शुक्लं

अथाध्यात्मंवागेवर्क्प्राणःसामतदेतदेतस्यामृच्यध्यूढꣳसामतस्माद्दच्यध्यूढꣳसामगीयतेवागेव
साप्राणोमस्तत्साम ॥१॥ चक्षुरेवर्गात्मासामतदेतदेतस्यामृच्यध्यूढꣳसामतस्माद्दच्यध्यूढꣳसा
मगीयतेचक्षुरेवसात्मामस्तत्साम ॥ २ ॥ श्रोत्रमेवर्ङ्मनःसामतदेतदेतस्यामृच्यध्यूढꣳसामत
स्माद्दच्यध्यूढꣳसामगीयतेश्रोत्रमेवसामनोमस्तत्साम ॥ ३ ॥ अथयदेतदक्ष्णःशुक्लंभाःसैवर्ग
थयन्नीलंपरःकृष्णंतत्सामतदेतदेतस्यामृच्यध्यूढꣳसामतस्माद्दच्यध्यूढꣳसामगीयतेऽथयदेवैतद
क्ष्णःशुक्लंभाःसैवसाथयन्नीलंपरःकृष्णंतदमस्तत्साम ॥ ४ ॥ अथएषोंतरक्षिणिपुरुषोदृश्यतेसै
वर्क्तत्सामतदुक्थंतद्यजुस्तद्ब्रह्मतस्यैतस्यतदेवरूपंयदमुष्यरूपंयावमुष्यगेष्णौतौगेष्णौयन्नामतन्नाम॥५

भाः शुक्लभासिस्थितावाणी । परःकृष्णंनीलगतःप्राणःसामेत्यर्थः । सैवेतितत्रस्थेत्यर्थः ॥ ४ ॥ ताभ्यांसेव्यंभगवंतमाह ॥ ॥ १२ ॥
अथेति । दृश्यतेज्ञानदृष्ट्या सैवचक्षुःस्थःपुरुषः । विधेयापेक्षयास्त्रीलिंगनिर्देशः । ऋक्ज्ञानरूपत्वात्ऋगित्युक्तः ।

नित्यंसमत्वात्तत् अक्षिस्थःपुरुषःसामेत्युच्यतेउत्थापकत्वादुक्थं याज्यस्वरूपत्वाद्यजुः पूर्णरूपत्वाद्ब्रह्म तस्यैतस्या क्षिस्थस्यतदेवरूपं यदेवहिरण्मयत्वादिकममुष्यआदित्यगतस्यरूपंतदेवेत्यर्थः । यौ वाक्प्राणावमुष्यसूर्यस्थस्यगेष्णौतौगे ष्णौगायकौ । एतस्येत्यनुषज्यते अमुष्ययन्नामउदिनितिदेवैतस्यनाम ॥ ५ ॥ सएषएवाक्षिस्थःपुरुषोहरिःएतस्माद्भूलोका दर्वांचोधस्तनलोकास्तेषांचमनुष्यकामानांचेष्टइत्यर्थः । नकेवलंवाक्प्राणावेवतस्यगायकौकिंतुलोकेगायकाःसर्वेपितद्गाय काइत्याह ॥ तद्यइति । यइमेलौकिकाराजादिपुरतःवीणायांगायंतीतियत्‌तत्‌एतमेवहरिंतेगायंतितस्माद्भगवद्गानादे

सएषचैतस्मादर्वांचोलोकास्तेषांचेष्टेमनुष्यकामानांचेतितद्यइमेवीणायांगायंत्येतंतेगायंतित स्मात्तेधनसनयः ॥ ६ ॥ अथयएतदेवंविद्वान्त्सामगायत्युभौसामगायतिसोमुनैवसएषयेचामु ष्मात्परांचोलोकास्ता१ँश्चाप्नोतितदेवकामा१ँश्च ॥ ७ ॥

वप्रसन्नाद्राजादौसन्निहिताद्धरेःसकाशाद्धनसनयोधनप्राप्तिमंतोभवंति । अन्यथाराजादेरस्वातंत्र्यात्‌धनप्राप्तिमंतोनस्यु रितिभावः ॥ ६ ॥ एवमधिदैवमध्यात्मंचोक्तप्रमेयज्ञानपूर्वगानंकुर्वतःफलमाह ॥ अथयइति । योधिकारीएतत् ऋक्सामयोर्हरेश्चमाहात्म्यमेवमुक्तरूपेणविद्वान् जानन् सामगायतिसउभौआदित्याक्षिस्थौतद्विषयमितियावत्‌सामगाय ति । तस्यफलांतरमाह । सएषएवज्ञानपूर्वंभगवद्गायकःअमुष्मात्स्वर्गात्परांचोयेलोकास्तांश्चाप्नोति देवकामांश्च । लोक

कामयोर्जयःकिंस्वसामर्थ्येन नेत्याह । सोमुनैवलोककामयोर्जयोमुनैवगानविषयेणादित्यस्थेनैवेति ॥ ७ ॥ अथानेनैवाक्षिस्थहरिणैवयेचैतस्माद्भूलोकादर्वाचोलोकास्तांश्चाप्नोतिमनुष्यकामांश्चेत्यन्योन्यसमुच्चयेचशब्दौ । तस्मात्परमात्मगायकस्यातिशक्तत्वादेवह एवंविदुद्गाताब्रूयात् ॥ ८ ॥ ते यजमानस्य कंकामं कामितार्थमागायानीतिब्रूयादित्यन्वयः । एषह्येवएवंब्रुवन्ज्ञानी कामगानस्येष्टेशक्तोभवति । यएवंविद्वान्सामगायति एषह्येवेतिपूर्वेणान्वयः । अत्रतात्पर्यंगायकस्तस्यविष्णोरित्यादि

अथानेनैवयेचैतस्मादर्वांचोलोकास्ता ᳪश्चाप्नोतिमनुष्यकामा ᳪश्चतस्मादुहैवंविदुद्गाताब्रूयात् ॥ ८ ॥ कंतेकाममागायानीत्येषह्येवकामगानस्येष्टेयएवंविद्वान्त्सामगायतिसामगायति ॥ ९ ॥ ७ ॥

त्रयोहोद्गीथेकुशलाबभूवुःशिलकःशालावत्यश्चैकितायनोदाल्भ्यःप्रवाहणोजैबलिरितितेहोचुरुद्गीथेवैकुशलाःस्मोहंतोद्गीथेकथांवदामइति ॥ १ ॥

भाष्याज्ज्ञेयं । द्विरुक्तिरुक्तार्था ॥ ९ ॥ ७ ॥ उद्गीथाख्योभगवान्सर्वोत्तमइत्युक्तंतन्मीमांसारूपाख्यायिकयासमर्थयते ॥ त्रयइत्यादिना । उद्गीथे सामविशेषे ह्प्रसिद्धं । त्रीन्निर्दिशति । शिलकोनामतः शलावत्यांभवःशालावत्यः । दाल्भ्योनामतः चिकितायनस्यापत्यंचैकितायनः । प्रवाहणोनामतः जिबिलस्यापत्यंजैबिलिः । इत्येतेत्रयः उद्गीथेनिपुणतयाप्रसिद्धाइत्यर्थः । तेत्रयःअन्योन्यमूचुःहंतहर्षे । उद्गीथेसामविशेषेवयंकुशलाःस्मः । उद्गीथविषये प्रश्नप्रत्युक्तिरूपांकथांव ॥ १३ ॥

दामः कुर्मइत्यूचुः ॥ १ ॥ तथास्त्वित्युक्त्वासहोपविविशुः सहप्रवाहणःउवाचेत्यस्यश्रोष्यामीत्यन्वयः । ब्राह्मणयोर्भव
तोरितिशेषः । ब्राह्मणयोरित्युक्त्याप्रवाहणःक्षत्रियइतिवदंति शिष्टंव्यक्तं त्वात्वां पृच्छेतिहोवाच दाल्भ्यइत्यनुषंगः । पृ
च्छति । कासाम्नोगतिरिति । साम्नःसामाभिमानिनोग्नेःकागतिःमुक्तौप्राप्यःकइत्यर्थः ॥ २ ॥ उत्तरमाह । स्वरइति स्वरा

तथेतिहसमुपविविशुःसहप्रवाहणोजैबलिरुवाचभगवंतावग्रेवदतांब्राह्मणयोर्वदतोर्वाचꣳश्रो
ष्यामीतिसहशिलकःशालावत्यश्चैकितायनंदाल्भ्यमुवाचहंतत्वापृच्छानीतिपृच्छेतिहोवाच
कासाम्नोगतिरिति ॥ २ ॥ स्वरइतिहोवाचस्वरस्यकागतिरितिप्राणइतिहोवाचप्राणस्यकाग
तिरित्यन्नमितिहोवाचान्नस्यकागतिरित्यापइतिहोवाचापांकागतिरित्यसौलोकइतिहोवाचामु
ष्यलोकस्यकागतिरिति ॥ ३ ॥ नस्वर्गंलोकमतिनयेदितिहोवाचस्वर्गंवयंलोकंसामाभिसं
स्थापयामःस्वर्गसंस्तावंहिसामेतितंहशिलकःशालावत्यश्चैकितायनंदाल्भ्यमुवाचाप्रतिष्ठितंवै
किलतेदाल्भ्यसामयस्त्वेतर्हिब्रूयान्मूर्धातेविपतिष्यतीतिमूर्धातेविपतेदिति ॥ ४ ॥

भिमानीवरुणइत्यर्थः । एवमग्रेपिप्रश्नप्रतिवचनेध्येये । सामादिपदानांदेवतासुनिरुक्तिर्भाष्यादवसेया । प्राणःप्राणवायोरभिमा
नीसूर्यः । अन्नंअन्नाभिमानीदक्षः । आपःअबभिमानीशक्रः । असौलोकोद्युलोकमानीशिवः ॥ ३ ॥ उत्तरमाह । नस्वर्गमि

ति । स्वर्गलोकशब्दितंशिवमतिक्रम्यनननयेत् । प्रश्नमितिशेषः । नपृच्छेदितियावत् । वयंस्वर्गलोकंशिवंप्रतिसामसंस्थापयामः तत्प्रतिपादनेनपर्यवसितंकुर्मइत्यर्थः । कथं सामस्वर्गसंस्तावंस्वर्गाख्यशिवसंस्तुतिपरमेवेतिसंस्थापयामइत्यन्वयः । यद्वाहियतःसामस्वर्गसंस्तावमतःस्वर्गंप्रतिसंस्थापयामइति । एवमग्रेपि । अप्रतिष्ठितंस्वर्गाख्यप्रतिपादनेनपर्यवसितमित्यर्थः । एवंतर्हि इदानींस्वर्गसंस्तावंसामेत्युक्तिकालेयस्तुब्रह्मज्ञानी ते स्वर्गसंस्तावंसामेतिवदतस्तव । मूर्धाशिरः विपतेदितिब्रूयाच्चेत्

हंताहमेतद्भगवत्तोवेदानीतिविद्धीतिहोवाचामुष्यलोकस्यकागतिरित्ययंलोकइतिहोवाचास्य लोकस्यकागतिरितिनप्रतिष्ठांलोकमतिनयेदितिहोवाचप्रतिष्ठांवयंलोकंसामाभिसंस्थापयामः प्रतिष्ठासंस्तावंहिसामेतितंहप्रवाहणोजैबिलिरुवाचांतवद्वैकिलतेशालावत्यसामयस्त्वेतर्हिब्रूयान्मूर्धातेविपतिष्यतीतिमूर्धातेविपतेदितिहंताहमेतद्भगवतोवेदानीतिविद्धीतिहोवाच ॥ ५ ॥ ८ ॥

मूर्धातेविपतिष्यतीत्युवाचशिलकइत्यन्वयः ॥ ४ ॥ एवंप्रत्याख्यातोदाल्भ्योवक्ति ॥ हंतेति । भगवत्तोहमेतद्वेदानि स्वर्गलोकगतिंजानीयामितिदाल्भ्यउवाचेत्यर्थः । एवमुक्तःशिलकआह ॥ विद्धीतिहोवाचेति । दाल्भ्यःपृच्छति ॥ अमुष्येति । स्वर्गलोकमानिनःशिवस्येत्यर्थः । उत्तरमयंलोकइति पृथिवीलोकमानीब्रह्मेत्यर्थः । अस्यलोकस्यचतुर्मुखस्य । प्रतिष्ठांलो

कंभूलोकमानिब्रह्माणं अंतवद्वैअपर्यवसितंवै ॥ ५ ॥ ८ ॥ शालावत्यःपृच्छति ॥ अस्यलोकस्येति । आसमंतात्काशते दीप्यतेइत्याकाशोविष्णुःइत्युवाचह । तस्यमहिमानमाह ॥ सर्वाणीति । इमानि प्रमाणप्रमितानि सर्वाणि ब्रह्मादि भूतानि आकाशादेवसमुत्पद्यंते । आकाशंप्रत्यस्तंयंति तेनप्रलीयंतइतियावत् । एभ्यःसर्वभूतेभ्यः परायणंमुख्याश्रयः ।

अस्यलोकस्यकागतिरित्याकाशइतिहोवाचसर्वाणिहवाइमानिभूतान्याकाशादेवसमुत्पद्यंतेआ काशंप्रत्यस्तंयंत्याकाशोह्येवैभ्योज्यायानाकाशःपरायणंसएषपरोवरीयानुद्गीथःसएषोनंतः॥१॥ परोवरीयोहास्यभवतिपरोवरीयसोहलोकाञ्जयतिउयएतमेवंविद्वान्परोवरीयांसमुद्गीथमुपास्ते तंहैतमतिधन्वाशौनकउदरशांडिल्यायोक्त्वोवाचयावत्तएनंप्रजायामुद्गीथंवेदिष्यंतेपरोवरीयो हैभ्यस्तावदस्मिँल्लोकेजीवनंभविष्यतितथामुष्मिँल्लोकइतिसयएतमेवंविद्वानुपास्तेपरोवरीयएव हास्यास्मिँल्लोकेजीवनंभवतितथामुष्मिँल्लोकेलोकइति लोकेलोकइति ॥ २ ॥ ९ ॥

सर्वभूतानामित्यनुषंगः । सएषआकाशःपरोवरीयान् परमवरीयान् । यद्वापरस्मादुत्तमंप्रोक्तंपरोइतिततःपरं । परोवरंपरंतस्मा त्प्रोक्तंपारोवरीयकमित्युत्तराध्यायेवक्ष्यमाणदिशाउत्तमोत्तमोत्तमइत्यर्थः । उद्गीथः । उच्चत्वेनगीतत्वात्उद्गीथःसएषोनंतोदेश कालगुणैरपरिच्छिन्नः । तदाहसूत्रे । आकाशस्तल्लिंगादिति ॥१॥ एतज्ज्ञानिनःफलमाह ॥ परोवरीयइति । योधिकारी एतं

परोवरीयांसमुद्गीथंहरिमेवंब्रह्मादिगतित्वाद्युक्तप्रकारेणविद्वाञ्ज्ञानन्उपास्तेपरोवरीयोऽस्यवेदिनोरक्षकोभवति । परोवरीयसो
हलोकानुत्तमोत्तमलोकान्विष्णुलोकान् । जयतिउ प्राप्नोत्येव । तमेतमाकाशनामकमुद्गीथंविष्णुं शुनकपुत्रोतिधन्वनामा
मुनिःउदरशांडिल्यायमुनयेउक्त्वाफलमुवाच । तदाह ॥ **यावत्तइति** । एनमुद्गीथंप्रजायांसाधुवर्गेवेदिष्यंतेज्ञास्यंतित्रेतायु
गेएभ्यःवेदितृणांएषांयावत्तःयावत्कालंयावद्वापरादितावत्कालमस्मिँल्लोकेजीवनंभविष्यतीत्युवाचेत्यर्थः । नकेवलमेतावत्
अमुष्मिन्परलोकेचजीवनंभविष्यतीत्यनुषंगः । द्विरुक्तिर्हर्षातिशयात् विद्यासमाप्तौवा । एवमुद्गीथोपासकस्यफलमितिजा

**मटचीहतेषुकुरुष्वाढक्यासहजाययोषस्तिर्हचाक्रायणइभ्यग्रामेप्रद्राणकउवाससहेभ्यंकुल्माषा
न्खादंतंबिभिक्षे ॥ १ ॥**

नतोप्येवंफलमित्याह ॥ **सयइति** । एवंविद्वान् । उद्गीथोपासकस्यैवमुक्तरूपंफलमितिविद्वान्एतमुद्गीथमुपास्तइत्यर्थः ॥२॥
॥ ९ ॥ सामैकदेशप्रस्तावप्रतिहारोद्गीथनिष्ठांभगवदुपास्तिंवक्तुंतदर्थांकांचनाख्यायिकामाह ॥ **मटचीत्यादिना** । उषस्ति
र्नामतः । चक्रमयनंयस्यासौचाक्रायणः । रथचक्राश्रयेणप्रायस्तिष्ठतीतिचाक्रायणइत्युक्तः। अन्नपानार्थंतत्रतत्रप्रद्रवन्प्रद्राण
कइत्युक्तःसःमटचीहतेषुस्थूलोपलशब्दिताभिर्मटचीभिर्हतेषुकुरुषुशिलावर्षहतेषुकुरुदेशस्थेषु आटक्या आसन्नयौवनया ॥ १५ ॥
जाययासह । इभ्यग्रामेधनिकग्रामे गजाधिपतिग्रामइतिवा । उवास । सउषस्तिःइभ्यंधनिकंइभाधिपतिंवाकुल्माषाना

रण्यमाषान्खादंतंबिभिक्षेयाचितवान् ॥ १ ॥ तमुषस्तिमुवाचइभ्यःकिमिति । ये मेभक्षणार्थंउपनिहिताइतोन्येनविद्यंते ।
यच्चयस्मात्तस्माद्दातुंनसंतीत्युवाचेत्यन्वयः। तमिभ्यंउवाचहकिलउषस्तिः । एतेषांमध्येकांश्चनमेदेहीत्युवाचह तानस्मैउषस्तये
प्रददाविभ्यः तान्दत्वाऽनुपानंकरपात्रस्थोदकपानंचकुर्वित्युवाच हंतहर्षे। इत्युक्तःप्रत्युवाचउषस्तिः एतदुदकपानेउच्छिष्टं मे
मया पीतंस्यादतोनपिबेयमितिहोवाच।इभ्योवक्ति। नस्विदेतेकुल्माषाउच्छिष्टा इति। स्विदितिकाकुः उच्छिष्टाभवंतिखल्वि

**तꣳहोवाचनेतोन्येविद्यंतेयच्चयेमइमउपनिहिताइत्येतेषांमेदेहीतिहोवाचतानस्मैप्रददौहंतानुपान
मित्युच्छिष्टंवैमेपीतꣳस्यादितिहोवाचनस्विदेतेप्युच्छिष्टाइति ॥ २ ॥ नवाअजीविष्यमिमान
खादन्नितिहोवाचकामोमउदपानमितिसहखादित्वातिशेषाञ्जायायाआजहारसाग्रएवसुभि
क्षाबभूवतान्प्रतिगृह्यनिदधौसहप्रातःसंजिहानउवाचयद्बतान्नस्यलभेमहिलभेमहिधनमात्राꣳरा
जासौयक्ष्यतेसमासर्वैरार्त्विज्यैर्वृणीतेति ॥ ३ ॥**

त्युवाचइभ्यइत्यर्थः। प्राणात्ययसमयेउच्छिष्टत्वविचारोज्ञानिनोनकार्यइतिभावेनाह॥ २ ॥ **नवाइति** । इमान्त्वदुच्छिष्टान
खादन्नवै नैवाजीविष्यं इतिहोवाचउषस्तिः। उदपानंतुमेकामःइच्छानुसारिसर्वत्रवर्षेणोदकसौलभ्यादित्युवाचउषस्तिः। तदाह
सूत्रे। सर्वान्नानुमतिश्चप्राणात्ययेतद्दर्शनादिति। सहोषस्तिःखादित्वाऽतिशेषान्शिष्टान्जायायैआजहारआहृतवान्। साजाया

ग्रएवप्रागेवसुभिक्षायाच्ञयाक्षुन्निवृत्तिमतीबभूव। अतःतान्पत्युर्हस्तात्प्रतिगृह्यनिदधौसंग्रहंचकार। सहोषस्तिःसंजिहानः श
यनादुत्तिष्ठन्उवाच। भार्याप्रतीतिशेषः। तदाह बतखेदे। अन्नस्यमात्रामल्पंवालभेमहिचेत् तद्भुक्त्वाजीवंतोधनस्यमात्रांभारं
लभेमहि। यद्यस्मादसौराजायक्ष्यते यागंकरिष्यति। स मामांसवैरार्त्विज्यैः सर्वर्त्विक्कर्मभिर्वृणीतेत्युवाचेत्यन्वयः ॥ ३ ॥
तमेवमुक्तवंतंपतिंप्रतिजायोवाच हंतहर्षे। हेपतेइमएवकुल्माषाइतिपूर्वेद्युर्निहितान्प्रदर्श्योवाचेत्यर्थः। तान्खादित्वा अमु

तंजायोवाचहंतपतइमएवकुल्माषाइतितान्खादित्वामुंयज्ञंविततमेयायतत्रोद्गातॄनास्तावेस्तो
ष्यमाणानुपोपविवेशसहप्रस्तोतारमुवाचप्रस्तोतर्यादेवताप्रस्तावमन्वायत्तातांचेद्विद्वान्प्रस्तो
ष्यसिमूर्धातेविपतिष्यतीत्येवमेवोद्गातारमुवाचोद्गातर्यादेवतोद्गीथमन्वायत्तातांचेदविद्वानुद्गा
स्यसिमूर्धातेविपतिष्यतीत्येवमेवप्रतिहर्तारमुवाचप्रतिहर्तर्यादेवताप्रतिहारमन्वायत्तातांचेदवि
द्वान्प्रतिहरिष्यसिमूर्धातेविपतिष्यतीतितेहसमारतास्तूष्णीमासांचक्रिरे ॥ ४ ॥ १० ॥

ष्ययज्ञंविततंविस्तृतंएयाय जगाम। तत्रयज्ञेआस्तावे आस्तावाख्येकर्मणि स्तोष्यमाणान् उद्गातॄन्उपोपविवेश स
मीपेउपविष्टवान्। उपविष्टःसमुनिःप्रस्तोतारमुवाच। तदाह हेप्रस्तोतः। यादेवताप्रस्तावंप्रस्तावाक्षरमन्वायत्ताधिष्ठायास्ते ॥ १६ ॥
तांचेद्देवतामविद्वान्प्रस्तोष्यसि तेमूर्धाविपतिष्यतीतिप्रस्तोतारमुवाचेत्यर्थः। एवमेवोद्गातारमुवाचेत्येतद्व्यनक्ति ॥ उद्गात

रिति । उद्गीथंसामभक्तिं एवमेवप्रतिहर्तारमुवाचेत्युक्तंव्यनक्ति ॥ प्रतिहर्तरिति । प्रतिहारंसामभक्तिरूपाक्षरं । प्रतिहरिष्यसि प्रतिहाराक्षरंवक्ष्यसि । तेहप्रस्तोत्रादयः । समारताः स्वस्वकर्मभ्योनिवृत्तास्तूष्णीमासांचक्रिरे तूष्णीमासन् ॥ ४ ॥ १० ॥ यदर्थमाख्यायिकोक्तातामुपास्तिमिदानीमाह ॥ अथहैनमिति । अथानंतरमेनमुषस्तिं यजमानोराजोवाच । भगवंतं पूज्यंत्वामहं विविदिषाणि । किन्नामाभवानिति वेदितुमिच्छामीत्युवाचेत्यन्वयः । मुनिराह ॥ उषस्ति

अथहैनंयजमानउवाचभगवंतंवाअहंविविदिषाणीत्युषस्तिरस्मिचाक्रायणइतिहोवाचसहोवाचभगवंतंवाअहमेभिःसर्वैरार्त्विज्यैःपर्यैषिषंभगवतोवाअहमवित्त्यान्यानवृषिभगवांस्त्वेवमेसर्वैरार्त्विज्यैरिति ॥ १ ॥ तथेत्यथतर्ह्येतएवसमतिसृष्टास्तुवंतांयावत्तेभ्योधनंदद्यास्तावन्ममदद्याइतितथेतिहयजमानउवाच ।२।

रित्यादि । राजाह भगवंतंत्वामहंएतैःसर्वैरार्त्विज्यैःऋत्विक्कर्मभिःवरीतुंपर्यैषिषं । अन्वेषितवानस्मि । भगवतोगतेरवित्त्याअज्ञानेनअन्यानवृषिवृतवानास्मं । इदानींतुभगवान्स्वोचितज्ञानादिमान्भवानेवसर्वैरार्त्विज्यैर्मेवृतइत्युवाचराजेत्यर्थः ॥ १ ॥ तथेतीति । तथास्त्वित्युक्त्वामुनिःपुनरुवाच । तर्हिएवंहिसति । अथसर्वार्त्विज्यस्यमदीयत्वात्मदतिसृष्टामदनुज्ञाताःसंतःएतएवत्वयापूर्ववृताएवस्तुवंतां स्तुवंतु । किंतुयावदेतेभ्योधनंदद्याःतावन्मेदद्याःदेहीत्युवा

चमुनिरित्यर्थः । तथेतिहयजमानउवाच । तावद्धनंदास्यामीत्युवाचेत्यर्थः ॥ २ ॥ एवमनुज्ञाताऋत्विजोमूर्धपातपरिहाराय प्रस्तावादिदेवताज्ञानाय तंमुनिमुपसृत्य क्रमेणपृष्ट्वा देवतांव्यज्ञासिषुरित्याह ॥ अथहैनंप्रस्तोतेत्यादिना । मा मां भगवान् पूज्योभवानवोचत्इतिप्रश्नेनोपससादेत्यन्वयः ॥ ३ ॥ इतिपृष्टोमुनिरुक्तवानित्याह ॥ प्राणइतिहोवाचेति । प्राणनामामुख्यप्राणांतर्यामीप्रस्तावदेवतेत्युवाचेत्यर्थः । प्राणस्यप्रस्तावदेवतात्वंजनिरूपप्रस्तावशब्दा

अथहैनंप्रस्तोतोपससादप्रस्तोतर्यादेवताप्रस्तावमन्वायत्तातांचेदविद्वान्प्रस्तोष्यसिमूर्धातेविप
तिष्यतीतिमाभगवानवोचत्कतमासादेवतेति ॥ ३ ॥ प्राणइतिहोवाचसर्वाणिहवाइमानिभू
तानिप्राणमेवाभिसंविशंतिप्राणमभ्युज्जिहतेसैषादेवताप्रस्तावमन्वायत्तातांचेदविद्वान्प्रास्तो
ष्योमूर्धातेव्यपतिष्यत्तथोक्तस्यमयेति ॥ ४ ॥

र्थोक्त्यासमर्थयते ॥ सर्वाणीति । भूतानिजीवजातानि प्राणमेवाभिसंविशंति सुप्तौप्रलयेचप्रविशंति प्राणमभ्युज्जिहते । प्राणान्निःसरंति उत्पद्यंते । सृष्टिकाले सैषाभूतोत्पत्तिलयहेतुभूताप्राणाख्यदेवता प्रस्तावमन्वायत्ता तांचेदविद्वान्प्रास्तोष्यःप्रस्तावाक्षरमवोचः । तर्हिमयातथोक्तस्य मूर्धातेविपतिष्यतीत्युक्तस्य तेमूर्धाव्यपतिष्यत् । इत्युवाचमुनिरि

त्यर्थः । एवमुपरितनवाक्येप्यर्थोध्येयः ॥ ४ ॥ आदित्यःआदित्यस्थःआदित्यनामाहरिः । तस्योद्गीथदेवतात्वमुद्गीथशब्दार्थोक्त्यासाधयति ॥ सर्वाणीत्यादिना । आदित्यमादित्यस्थमुच्चैःसंतंसर्वोत्तमत्वेनस्थितं अन्नं अद्यमानवस्तुगतोन्ननामाहरिः ॥ ५ ॥ अन्ननाम्नोहरेःप्रतिहारदेवतात्वं । भोजनरूपप्रतिहारशब्दार्थव्युत्पादनेन समर्थयते ॥ सर्वा

अथहैनमुद्गातोपससादोद्गातर्यादेवतोद्गीथमन्वायत्तातांचेदविद्वानुद्गास्यसिमूर्धातेविपतिष्य
तीतिमाभगवानवोचत्कतमासादेवतेत्यादित्यइतिहोवाचसर्वाणिहवाइमानिभूतान्यादित्यमु
च्चैःसंतंगायंतिसैषादेवतोद्गीथमन्वायत्तातांचेदविद्वानुदगास्योमूर्धातेव्यपतिष्यत्तथोक्तस्यमये
त्यथहैनंप्रतिहर्तोपससादप्रतिहर्तर्यादेवताप्रतिहारमन्वायत्तातांचेदविद्वान्प्रतिहरिष्यसिमूर्धा
तेविपतिष्यतीतिमाभगवानवोचत्कतमासादेवतेत्यन्नमितिहोवाच ॥५॥ सर्वाणिहवाइमानि
भूतान्यन्नमेवप्रतिहरमाणानिजीवंतिसैषादेवताप्रतिहारमन्वायत्तातांचेदविद्वान्प्रत्यहरिष्यो
मूर्धातेव्यपतिष्यत्तथोक्तस्यमयेतितथोक्तस्यमयेति ॥ ६ ॥ ११ ॥
अथातःशौवउद्गीथस्तद्धबकोदाल्भ्योग्लावोवामैत्रेयःस्वाध्यायमुद्वव्राजतस्मैश्वाश्वेतःप्रादुर्बभूव
तमन्येश्वानउपसमेत्योचुरन्नंनोभगवानागायत्त्वशनायामवाइति ॥ १ ॥

णिहेत्यादिना । प्रतिहरमाणानि भुंजानानि जीवंति द्विरुक्तिराख्यायिकापूर्वमुक्तविद्यासमाप्त्यर्था ॥ ६ ॥ ११ ॥

पूर्वत्रोद्गीथोपासकस्यपापाविद्धत्वं मुक्तावानंदातिशयः । बहुपुत्रोपलक्षितेष्टान्नपानादिच फलान्युक्तानि । तत्रोद्गीथमुपास्य स्वाभीष्टंप्राप्ताःसंतिकिमित्यतः । संतीत्याख्यायिकयाह ॥ अथातइति । अथविद्यांतरं । अतउद्गीथोपासनयाफलवंतःसंति किमितिपृष्टत्वात् । तत्परिहाराय शौवोद्गीथरूपविद्यांतरमाख्यायिकयोच्यतइत्यर्थः । शुनोक्तः श्वभिरनुष्ठितः शौवउद्गीथः उच्यतइत्यर्थः । दल्भपुत्रोदाल्भ्यः । बकनामामुनिः मित्रयापुत्रार्थमाहूतोग्लाववत्तूष्णींस्थितत्वात् ग्लावनामामित्राहूत

तान्होवाचेहैवमाप्रातरुपसमायातेतितद्धबकोदाल्भ्योग्लावोवामैत्रेयःप्रतिपालयांचकारतेहयथैवेदंबहिष्पवमानेनस्तोष्यमाणाःसꣳरब्धाःसर्पंतीत्येवमाससृपुस्तेहसमुपविश्यहिंचक्रुरो३मदा३मों३पिबा३मोंदेवोवरुणःप्रजापतिःसविता३न्नमिहा३हरदन्नपते ३ न्नमिहा ३ हरा हरोमिति २ ॥ १२ ॥ ॥

त्वान्मैत्रेयइत्युक्तः । स्वाध्यायमुद्दिश्योद्व्राजक्कचिज्जगाम । तस्यानुग्रहार्थंवायुः श्वाश्वरूपःसन् श्वेतः श्वरूपैःरुद्रादिभिरितोयुक्तःसन् प्रादुर्बभूव । तंश्वरूपंवायुमन्येश्वरूपारुद्रादयोदेवा उपसमेत्य समीपंप्राप्योचुः । किमिति । नोस्माकं अन्नमुद्दिश्यभगवान्ज्ञानादिसंपन्नोभवानागायतुअशनायामवै अशनमिच्छामवै इत्यूचुरित्यर्थः ॥ १ ॥ तान् श्वरूप रुद्रादीनुवाचश्वरूपोवायुः इहैवास्मिन्नेवस्थलेश्वःप्रातःकाले मा मां समायात समागच्छतेति एतच्छुनोक्तंश्रुत्वाबकोदा

ल्भ्योग्लावोवामैत्रेयःप्रतिपालयांचकार । प्रातःकालंप्रतीक्ष्यतस्थावित्यर्थः । तेहएवमुक्ताअन्येश्वरूपादेवाः यथैवेदंनिदर्शनं बहिष्पवमानेनस्तोष्यमाणाऋत्विजःसंरब्धाः संरंभवंतः अन्योन्यंकच्छग्रहणेनसंरब्धाःपिपीलिकापंक्त्याकारेणसर्पंत्येवमा सस्तृपुः। पूर्वेद्युर्निर्दिष्टस्थलेप्रसर्पितवंतः। तेह एवमुपसृप्तास्तेश्वानःसमुपविश्यहिंचक्रुःहिमित्यूचुः। हिंकृत्यचओंहेमुख्यप्राणांत र्गतभगवन्नन्नमदाम । ओंभगवन्पिबामोदकं। देवःगत्यर्थत्वाद्दीव्यतेः । यथायोगंसर्वज्ञोहरिःमुख्यवायुर्वरणीयत्वाद्वरुणोह

अयंवावलोकोहावुकारोवायुर्हायिकारश्चंद्रमाअथकारआत्मेहकारोग्निरीकारआदित्यऊकारो निहवएकारोविश्वेदेवाऔहोयिकारःप्रजापतिर्हिंकारःप्राणःस्वरोन्नंयायावाग्विराडनिरुक्तस्त्र योदशस्तोभःसंचरोहुम्कारोदुग्धेस्मैवाग्दोहंयोवाचोदोहोन्नवानन्नादोभवतियएतामेव ँसा म्नामुपनिषदंवेदोपनिषदंवेद ॥ १३ ॥ श्रीमच्छांदोग्योपनिषदिप्रथमोध्यायः ॥ १ ॥

रिःवायुश्च । प्रजानांपतित्वात्प्रजापतिःहरिर्वायुश्च । जगत्प्रसवितृत्वात्सवितेत्युक्तोहरिर्वायुश्चान्नमिहास्मास्वाहरत् । आ नयतुअन्नपतेहरेवायो । अन्नमिहाहराहरोमितिमंत्रंजप्तवंतः। ततश्चाभीष्टंप्राप्तवंतइत्यपिध्येयं ॥ २ ॥ १२ ॥ सामैकदेशोपा स्तेःप्रकृतत्वात्तदेकदेशभूतहावित्यादित्रयोदशस्तोभाक्षरनिष्ठोपास्तिमाह ॥ अयमित्यादिना । अयंलोकःपृथिवीलोकःत न्मानिनीधरादेवी । हूयतेअत्राग्निहोत्रादिकमितिहावु हावुइत्याक्रियतइतिहावुकारइत्युपासीतेतिसर्वत्रध्येयं हावुकार

स्तोभोरथंतरसाम्निप्रसिद्धः। एवमन्येपिहायिकारादयोवामदेवादिसामसुप्रसिद्धाः। वायुराश्चर्यवदायातीतिवाहेतिसुखमस्मा
दायातीतिवाहायिकारोवायुः।चंद्रमाःसूर्यानंतरप्रकाशइत्यथकारः। आत्माव्याप्तोनारायणःसर्वसामीप्यादिहकारउक्तः। अग्निः
सदेंधनादीकारः। सूर्यःउष्टितः। आतपदाह्लादादित्यऊकारः। नितरामाह्वयंत्येनमितिनिहवइंद्रः एतीत्येकारोविश्वेदेवाः सर्वे
सुराःऔहोयिकारउक्ताः। कथं उच्चत्वादुर्विष्णुः तस्यसप्तमीऔइति तस्मिन्विष्णौहूयंतेस्थाप्यंतेमुक्ताविति व्युत्पत्त्याऔ
होयिनः तथाऽऽक्रियंतेइत्यौहोयिकारइतिध्येयं। प्रजापतिर्ब्रह्मा निश्चयज्ञानवत्त्वाद्धिंकारः। प्राणःशरीरस्थोमुख्यप्राणः
स्वेविष्णौरमयत्येनंजीवमितिस्वरः। अन्नं अन्ना भक्षकेणवायुनानीयतइत्यन्नमित्युक्तान्नदेवतासरस्वतीयाया नित्यंगतिम

समस्तस्यखलुसाम्नउपासनꣳसाधुयत्खलुसाधुतत्सामेत्याचक्षतेयदसाधुतदसामेति ॥ १ ॥

त्त्वहेतुनाययिरित्युक्तंवायुंगतेतिहेतोर्याया। वाक्सर्ववागात्मिकाश्रीःविशेषेणराजनाद्विराट् स्तोभदेवता। अनिरुक्तःसाकल्येन
निर्वचनायोग्यःसम्यक्करतीतिसंचरोहरिः आहूतएवपातीतिहुप्। हुबित्याक्रियतइतिहुप्कारः। त्रयोदशस्तोभदेवता। इत्युपा
सीतेतिसर्वत्रध्येयं। एतदुपास्तिफलमाह ॥ दुग्धइति। योधिकारीसाम्नां सामभक्तिभूतस्तोभाक्षराणामेतामुक्तविधामुप
निषदं रहस्यप्रतिपाद्यं वेद अस्मैवेदिने योवाचोदोहस्तंवाग्दोहंवेदादिवाग्लभ्यंफलं दुग्धे क्षरति। उपासनमितियो
ज्यं। यद्वा योवाचोदोहस्तंदोहंवाग्वाचिस्थोवाङ्नामाहरिः दुग्धेइति। द्विरुक्तिःसमाप्त्यर्था ॥१३॥ इतिश्रीमच्छांदोग्यो ॥ १९ ॥
पनिषदर्थसंग्रहेराघवेंद्रयतिकृतेप्रथमोध्यायःसमाप्तः ॥ १ ॥ ओं सामैकदेशोद्गीथस्तोभनिष्ठामुपास्तिमुक्त्वापंचभ

क्तिकसप्तभक्तिकसमस्तसामनिष्ठामुपास्तिमाह द्वितीयाध्यायेन(ओं) समस्तस्य पूर्णस्यसाम्नःसामनाम्नः । समग्रभक्तिसहित सामप्रतिपाद्यस्यहरेःउपासनं कार्यमितिशेषः । कुतः यतःसामसाधु अतइतियोजना । कुतःसामसाध्वित्यतः साम्नः साधुत्वंवृद्धसंमत्याह ॥ यदिति । यत्खलुसारत्वेनधार्यं तदेवहिसारत्वेनमेयंसामेति सामसाध्वितिएकएवार्थइत्या चक्षतेवृद्धाः । तत्रव्यतिरेकंचाह ॥ यदिति । यदसाधुसारत्वेनाधार्यंतत्सारत्वेननमेयमित्याचक्षते इतिपूर्वेणान्वयः ॥ १ ॥ तेपिवाकिं बलादेवमाहुरित्यतो वृद्धांतराणांसाधौसामशब्दप्रयोगादित्याह ॥ तदुताप्याहुरिति । तत्साम

तदुताप्याहुःसाम्नैनमुपागादितिसाधुनैनमुपागादित्येवतदाहुरसाम्नैनमुपागादित्यसाधुनैनमुपा गादित्येवतदाहुः ॥ २ ॥ अथोताप्याहुःसामनोबतेतियत्साधुभवतिसाधुबतेत्येवतदाहुरसाम नोबतेतियदसाधुभवत्यसाधुबतेत्येवतदाहुः ॥ ३ ॥

साधुशब्दयोरेकार्थतामुताप्याहुः । वक्ष्यमाणदिशाप्याहुर्वृद्धाः । कथंसाम्नाएनंबुद्धिस्थंराजगुर्वादिकमुपागात्प्राप्नोदितियल्लो केसाधुनैनमुपागादित्येवतदाहुः । असाम्नेत्यादिना व्यतिरेकोक्तिः ॥ २ ॥ तेपिवृद्धाःकिंबलादेवमाहुरित्यतोवृद्धांतराणांसा धौसामशब्दप्रयोगदृष्टेरित्याह ॥ अथोताप्याहुरिति । अन्येपिवृद्धाआहुरित्यर्थः । कथंयत्साधुभवतितत्नोस्माकंसाम बतहर्षे । तस्यार्थोक्तिःसाधुनोबतेत्येवतदाहुरार्याइति । उक्तमेवव्यतिरेकेणाह ॥ असामनोबतेति । यदसाधुभव

तितत्नोस्माकं असाधुबतेतितस्यव्याख्यानं ॥ ३ ॥ असाधुबतेत्येवतदाहुरितिज्ञानिनःफलमाह ॥ सयइति ।
सप्रसिद्धोयोधिकारीएवंसारत्वेनधार्यंसाधु सारत्वेनसर्वसामभिर्मेयंसामेत्येवंप्रकारेणैतत्साधुसामशब्दयोरेकार्थत्वंविद्वान्
जानन् साधुसामेत्युपास्ते एनंसमस्तसामप्रतिपाद्यतयाभगवदुपासकं यत्येसाधवोधर्माः तेअभ्याशःसमीपएवशीघ्र
मितियावत् । आगच्छेयुश्च मुक्तौप्राप्नुयुः उपनमेयुश्चस्थिराश्चभवंति । चशब्दावन्योन्यसमुच्चये ॥ ४ ॥ १ ॥ लोके
षुपंचभक्तिकसामप्रतिपाद्यभगवतउपास्तिमाह ॥ लोकेष्विति । लोकेषुपृथिव्यादिषुपंचविधंपंचरूपभेदेनपंचविधतयास्थि

सयएतदेवंविद्वान्त्साधुसामेत्युपास्तेभ्याशोहयदेनꣳसाधवोधर्माआचगच्छेयुरुपचनमेयुः ॥४॥१॥
लोकेषुपंचविधꣳसामोपासीतपृथिवीहिंकारोग्निःप्रस्तावोंतरिक्षमुद्गीथआदित्यःप्रतिहारोद्यौर्नि
धनमित्यूर्ध्वेषु ॥ १ ॥

तं साम सारत्वेनमेयंभगवंतं पंचभक्तिभेदेनपंचविधसामप्रतिपाद्यं पृथिव्यादिषुलोकेषुपंचसुस्थितमुपासीतेत्यर्थः । तत्क्र
मेणव्यनक्ति ॥ पृथिवीति । सस्यादेःप्रथनात्विस्तारात्पृथिवीनामापृथिवीस्थःप्रद्युम्नःहिंकारः । हिमित्याक्रियतइतिहिं
काररूपसामभक्तिप्रतिपाद्यइत्यर्थः । एवमग्रेपि । अग्निःअदनहेतुनाग्निनामाग्निस्थोवासुदेवःप्रस्तावःप्रस्तावाख्यसामभक्तिप्रति
पाद्यः । अंतरीक्ष्यतइतिवाच्यवधानाभावहेतुनावांतरिक्षनामांतरिक्षगोनारायणःउद्गीथः वासुदेवादिमूर्त्युद्गमनहेतुनोद्गीथा

आयूंष्यादत्तइत्यादित्यनामादित्यस्थोऽनिरुद्धः प्रतिहारः इदंजगत्स्वस्वकार्येषुप्रतिहरतिनयतीतिप्रति
यः । द्यौःक्रीडाहेतुत्वात्द्यौरित्युक्तोद्युलोकस्थःसंकर्षणः । निधनं निधनशब्दितसंहृतिहेतुना निध
यः । इत्यूर्ध्वेषूपर्युपरिस्थितलोकस्थभगवन्मूर्तीनांहिंकारादिसामभक्त्यर्थतयोपासनमुक्तमित्यर्थः ॥ १ ॥
ेषु द्युप्रभृतिषुपृथिव्यंतेषुस्थितरूपाणांहिंकारादिसामभक्त्यर्थतयोपासनप्रकारउच्यतइत्यर्थः । तदाहक्रमे
। पदानांप्रागुक्तएवावयवार्थोध्येयः । द्यौःद्युस्थःप्रद्युम्नोहिंकारः आदित्यःवासुदेवःप्रस्तावः अंतरिक्षोनारा

ृसुद्यौर्हिंकारआदित्यःप्रस्तावोंतरिक्षमुद्गीथोग्निःप्रतिहारःपृथिवीनिधनं ॥ २ ॥ कल्पंते
ोकाऊर्ध्वाश्चावृत्ताश्चयएतदेवंविद्वाँल्लोकेषुपंचविधꣳसामोपास्ते ॥ ३ ॥ २ ॥

ग्निःअनिरुद्धःप्रतिहारः पृथिवीसंकर्षणोनिधनं । नचैतद्विरुद्धं नस्थानतोपिपरस्योभयलिंगमित्यत्रोक्तदिशा
ागुणपूर्णत्वात्शक्तिव्यक्त्यात्मनानानागुणव्यवस्थोपपत्तेः । प्राप्तेश्चसमंजसमितिसूत्रोक्तदिशोपासकाधिका
नवाच्चेतिभावः ॥ २ ॥ ज्ञानिनःफलमाह ॥ कल्पंतेहेति । योधिकारी एतत्पंचभक्तिकसामप्रतिपा
ाष्टतयोर्ध्वाधोलोकेषुस्थिततत्वप्रकारेणविद्वान् जानन् लोकेषुपंचविधंसाम । भगवंतमुपास्ते । अस्मै
ाऊर्ध्वाधोलोकगाःभगवन्मूर्तयः मोक्षादिपुमर्थकल्पंतेकल्पयंतीत्यर्थः ॥ ३ ॥ २ ॥ वृष्टाविति ।

रूपात्मकंसाम हरिंपंचभक्तिकसामप्रतिपाद्यमुपासीत । तद्व्यनक्ति ॥ पुरोवातइति । पुरोवातस्थःप्रद्यु र्थोध्येयः । मेघोजायते मिलितोमेघइत्यर्थः । मिलितमेघस्थोवासुदेवःप्रस्तावः । वर्षतिधारासंपातस्थःनारा ाततेस्तनयतिगर्जतिविद्युद्गर्जनगतोऽनिरुद्धःप्रतिहारः ॥ १ ॥ उद्गृह्णातिवृष्टिमुपसंहरतिवृष्ट्युपसंहारस्थः । ज्ञानिनःफलमाह । योधिकारी एतत् पंचभक्तिकसामप्रतिपाद्यं एवं उक्तगुणविशिष्टतया वृष्ट्यादि

वविधꣳसामोपासीतपुरोवातोहिंकारोमेघोजायतेसप्रस्तावोवर्षतिसउद्गीथोविद्योतते
तिसप्रतिहारः ॥ १ ॥ उद्गृह्णातितन्निधनंवर्षतिहास्मैवर्षयतिहयएतदेवंविद्वान्वृष्टौपंचवि
मोपास्ते ॥ २ ॥ ३ ॥

प्सुपंचविधꣳसामोपासीतमेघोयत्संप्लवतेसहिंकारोयद्वर्षतिसप्रस्तावोयाःप्राच्यःस्यंदंते
थोयाःप्रतीच्यःसप्रतिहारःसमुद्रोनिधनं ॥ १ ॥

विद्वान् वृष्टौवृष्ट्यादौपंचविधंसामभगवंतमुपास्ते । अस्मैज्ञानिनेवर्षतिवर्षणादिगतोहरिःवर्षत्यभीष्टंवर्षयति । अन्यत्रापिपंचविधस्यहरेरुपास्तिमाह ॥ सर्वास्विति । सर्वास्वप्सुपंचधास्थितास्वप्सुस्थितंपंचविधंपं भक्तिकसामवेद्यमुपासीत । संप्लवतेसंचरतिसंचरन्मेघस्थःप्रद्युम्नःहिंकारः । यद्वर्षतियद्वर्षणंवर्षणस्थो

॥ २१ ॥

ाच्यः प्राङ्मुख्यः स्यंदंतेप्रवहंतिप्राक्प्रवहन्नदीस्थोनारायणःउद्गीथः। याःनद्यःप्रतीच्यःपश्चिममुख्यःस्यं
हारः। समुद्रःसमुद्रस्थःसंकर्षणणोनिधनं ॥१॥ फलमाह॥नेहेति । योधिकारीएततत्पंचविधसामभक्ति
शिष्टत्वेनविद्वान्सर्वास्वप्सुपंचविधंपंचरूपंसामहरिमुपास्ते सइतिशेषः। न हाअप्सुप्रैतिम्रियते अप्सुमान्
द्लोपेनअप्सुस्थितविष्णुमान्भवतीतिवा। अपःसूतइत्यप्सूर्भगवान्सएवदीर्घलोपेनाप्सुस्तद्वान्भवतीतिवार्थः।

प्रैत्यप्सुमान्भवतियएतदेवंविद्वान्सर्वास्वप्सुपंचविधꣳसामोपास्ते ॥ २ ॥ ४ ॥

ंचविधꣳसामोपासीतवसंतोहिंकारोग्रीष्मःप्रस्तावोवर्षाउद्गीथःशरत्प्रतिहारोहेमंतोनि
॥ कल्पंतेहास्माऋतवऋतुमान्भवतियएतदेवंविद्वानृतुषुपंचविधꣳसामोपास्ते ॥ २ ॥ ५ ॥

वत् ॥ २ ॥ ४ ॥ ऋतुष्विति । ऋतुषुहेमंतशिशिरयोरैक्यविवक्षयापंचस्वृतुषुस्थितंऋतत्वात्सर्वशास्त्राव
पंचरूपंसामहरिंपंचसामभक्तिप्रतिपाद्यमुपासीत। तद्व्यनक्ति॥ वसंतइति । वसंतस्थोवसंतनामाप्रद्युम्नः
ज्ञेयं। वसंतादिशब्दनिरुक्तिर्भाष्ये ॥ १ ॥ फलमाह ॥ कल्पंतइति । यएतदित्यादिप्राग्वत्। अस्मै
तःपंचरूपोभगवान्। कल्पंते मोक्षादीन्दातुंशक्तोभवतीत्यर्थः। रूपबाहुल्यात्बहुवचनं। ऋतुमान्

मान्भवतीत्यर्थः ॥ २ ॥ ५ ॥ पशुष्विति । पातिसुखरूपश्चेतिपशुनामातं पंचविधपशुषुस्थितं
धंपंचरूपंसामहरिमुपासीतेति । उक्तंव्यनक्ति ॥ अजाइति । अजादिशब्दनिर्वचनंभाष्ये । भवंति
द्धपशवएवज्ञेयाः । पशुमान्पशुस्थहरिमान्भवतीत्यर्थः ॥ खं० ॥ ६ ॥ प्राणेष्विति । परोवरीयःपरस्मादु

विधꣳसामोपासीताजाहिंकारोवयःप्रस्तावोगावउद्गीथोश्वाःप्रतिहारःपुरुषोनिधनं भ
स्यपशवःपशुमान्भवतियएतदेवंविद्वान्पशुषुपंचविधꣳसामोपास्ते ॥ खंडः ॥ ६ ॥
चविधंपरोवरीयःसामोपासीतप्राणोहिंकारोवाक्प्रस्तावश्चक्षुरुद्गीथःश्रोत्रंप्रतिहारोमनो
परोवरीयांसिवैतानिपरोवरीयोहास्यभवतिपरोवरीयसोहलोकान्जयतियएतदेवंविद्वा
पंचविधंपरोवरीयःसामोपास्तइतितुपंचविधस्य ॥ खंडः ॥ ७ ॥
विधस्यवाचिसप्तविधꣳसामोपासीतयत्किंचवाचोहुमितिसहिंकारोयत्प्रेतिसप्रस्ता

ंपरोवरं ततोप्युत्तमंपरोवरीयःअत्युत्तमोत्तमोत्तमं सामहरिमित्यर्थः । प्राणःश्वासवायुस्थःप्रद्युम्नः । एता
रोवरीयांसि वैप्रसिद्धिः । अस्यवेदिनःपरोवरीयोब्रह्मभवति रक्षकमित्यर्थः । उपसंहरति ॥ इतितुपंच ॥ २२ ॥
रुक्तेतिशेषः ॥ खं० ॥७॥ अथानंतरंसप्तविधस्यसप्तविधसामभक्तिवेद्यस्यसप्तरूपस्यहरेःउपास्तिरुच्यत

इत्यर्थः। कुत्रेत्यतोवाचितावदाह॥ वाचीति। वाचिसप्तविधायांशब्दरूपायांस्थितंसप्तविधं सप्तरूपं सप्तविधवाक्प्रतिपाद्यंसामहरिमुपासीत। कथमित्यतोव्यनक्ति॥ यत्किंचेति। वाचःशब्दस्यहुमितिवाग्विशेषःहुमित्यनेनोपक्रमेनिबद्धंयद्वाक्यमितियावत्। तद्वाक्यबोध्योयःप्रद्युम्नः। सहिमितिसामभक्तिप्रतिपाद्यः। योहिंकारःप्रद्युम्नःसहुमितिशब्दोपबद्धवाक्यबोध्यइतिवोद्देश्यविधेयभावोध्येयः। यत्प्रेति प्रशब्दोपक्रमंवाक्यं तत्प्रतिपाद्यःप्रस्तावप्रतिपाद्योवासुदेवः। हुमित्युपक्रम्यप्रशब्दश्रवणपर्यंतंयावद्वाक्यंतावद्धिंकारार्थप्रद्युम्नार्थकमित्युपासीत। तथाप्रेत्युपक्रम्यआइत्यक्षरपर्यंतंयावद्वाक्यं तावत्प्रस्तावार्थवासुदे

वोयदेतिसआदिर्यदुदितिसउद्गीथोयत्प्रतीतिसप्रतिहारोयदुपेतिसउपद्रवोयन्नीतितन्निधनंदुग्धे
स्मैवाग्दोहंयोवाचोदोहोन्नवानन्नादोभवतियएतदेवंविद्वान्वाचिसप्तविधꣳसामोपास्ते॥खंडः॥८॥

वबोधकमित्येवंरूपेणाग्रेसर्वत्रार्थोज्ञेयः। यत्आइतिवाचःशब्दस्यआइतिवर्णविशेषः तदुपक्रमोपेतवाक्यप्रतिपाद्यःआदिःकल्पादिहेतुत्वात्वराहात्माहरिः। यत्उत्इति वाचःशब्दस्यवर्णविशेषःतदुपनिबद्धवाक्यविशेषप्रतिपाद्यःउद्गीथोनारायणः। यत्प्रतीतिवाचःसंबंधिप्रतीतियत्पदं तदुपक्रमवाक्यबोध्यःप्रतिहाररूपसामभक्तिप्रतिपाद्योनिरुद्धः। यदुपेतिवाचःसंबंधिपदं। तदुपक्रमवाक्यबोध्यःउपद्रवःदुष्टोपद्रवहेतुतयोपद्रवनामाउपद्रवाख्यसामभक्तिप्रतिपाद्योनरसिंहः। यत्नीत्यक्षरंनीत्यक्षरोपक्रमोपेतवाक्यंतद्बोध्योयस्तन्निधनंनिधनाख्यसामभक्तिवेद्यःसंकर्षणः। दुग्धइतिवाक्यमुक्तार्थमाद्याध्यायांते। खंडः॥८॥

आदित्यनिष्ठांसप्तविधसामनामकभगवदुपास्तिमाह ॥ अथखल्विति । अथेतिविद्यांतरमुच्यतइत्यर्थः । खलुशब्दःप्रसिद्ध्य र्थः । आदित्यस्थमादित्यनामानंसप्तविधंसाम सप्तविधसामप्रतिपाद्यंसप्तरूपंभगवंतमुपासीत । सामत्वंहरेर्द्वेधानिरुच्य दर्शयति ॥ सर्वदेति । यतःसर्वदासमरूपस्तेनहेतुनासामेत्युच्यते । किंचमांप्रतिमांप्रतिवर्ततइतिसर्वेणलोकेनसमः । मांप्र तिमांप्रतीतिसर्वदृष्टिविषयत्वसाम्यान्मंडलस्यतत्रत्योपिहरिर्मंडलस्यतादृशसर्वसाम्यसंपादकतयासर्वसमइतिसामेत्युच्यतइत्य र्थः ॥ १ ॥ तस्यसर्वभूताश्रयत्वमहिमानमाह ॥ तस्मिन्निति । आदित्यनाम्न्यादित्यस्थेहरौ इमानिप्रमाणसिद्धानि

अथखल्वमुमादित्यꣳसप्तविधंसामोपासीतसर्वदासमस्तेनसाममांप्रतिमांप्रतीतिसर्वेणसमस्ते नसाम ॥ १ ॥ तस्मिन्निमानिसर्वाणिभूतान्यन्वायत्तानीतिविद्यात्तस्ययत्पुरोदयात्सहिंकार स्तदस्यपशवोन्वायत्तास्तस्मात्तेहिंकुर्वंतिहिंकारभाजिनोह्येतस्यसाम्नः ॥ २ ॥

सर्वाणिब्रह्मादिभूतान्यन्वायत्तान्याश्रितानीतिविद्यात् । सर्वभूतानांतदाश्रयत्वंस्पष्टमाह ॥ तस्ययत्पुरोदयादिति । तस्यादित्यस्थस्यआदित्यनाम्नोहरेरुदयात्यत्पुरापूर्वकालः तत्रस्थःसहिंकारःहिमितिसामभक्तिप्रतिपाद्यःप्रद्युम्नःअस्यादित्य नाम्नोहरेःतत्प्रद्युम्नाख्यंरूपंपशवोन्वायत्ताआश्रिताः । तस्मादित्युक्तहेतुंव्यनक्ति ॥ हिंकारेति । हियस्मादस्या नुदितादित्यस्थस्यसाम्नोहरेःसंबंधिहिंकारार्थप्रद्युम्नभाजिनस्तदाश्रयिणस्तस्मात्सुरभ्यादयःपशवोज्ञानिनोहिंकुर्वंतिहिमितिश

ब्दंकुर्वंति । तज्जातित्वादाधुनिकाअपिपशवस्तथाकुर्वंतीत्यर्थः । एवमग्रेपि ॥ २ ॥ अथयत्प्रथमोदितेसूर्येयत्यःस प्रस्तावःप्रस्तावार्थवासुदेवः । अस्यप्रथमोदितस्यादित्यनाम्नोहरेः । तत् । वासुदेवाख्यंरूपंमनुष्याअन्वायत्ताः । तस्मादित्या दिप्राग्वद्योज्यं । प्रस्तुतिकामाःप्रारंभकामाः प्रशंसाकामाश्चभवंतीत्यर्थः । प्रारंभावतारत्वात्प्रशंसादेवतात्वाच्चवासुदेव स्येतिभावः ॥ ३ ॥ अथयदिति । संगववेलायां यत् यः सआदिःवराहःअस्यसंगववेलागतादित्यनाम्नोह

अथयथत्प्रमोदितेसप्रस्तावस्तदस्यमनुष्याअन्वायत्तास्तस्मात्तेप्रस्तुतिकामाःप्रशꣳसाकामाःप्र स्तावभाजिनोह्येतस्यसाम्नः ॥३॥ अथयत्संगववेलायाꣳसआदिस्तदस्यवयाꣳस्यन्वायत्तानितस्मा त्तान्यंतरिक्षेनारंभणान्यादायात्मानंपरिपतंत्यादिभाजीनिह्येत्तस्यसाम्नः ॥ ४ ॥ अथयत्संप्रति मध्यंदिनेसउद्गीथस्तदस्यदेवाअन्वायत्तास्तस्मात्तेसत्तमाःप्राजापत्यानामुद्गीथभाजिनोह्येतस्य साम्नः ॥ ५ ॥

रेःतत्वराहाख्यंरूपंवयांसिपक्षिणःअन्वायत्तानिआश्रितानि तस्मादित्यस्यविवरणमादीत्यादि । अनारंभणानि अना धारणानि आत्मानंस्वदेहमादायपतंति संचरंतिसर्वपक्ष्याधारभूतवराहाश्रयत्वादेवेत्यर्थः ॥ ४ ॥ अथसंप्रतीदानीं मध्यंदिनगतेसूर्येयत् यः सउद्गीथःनारायणःतदस्येत्यादिप्राग्वत् । प्राजापत्यानांऋषिगंधर्वादीनांसकाशादुत्तमादेवाइ

त्यर्थः । नारायणशब्दार्थत्वेनानंतगुणपूर्त्याहरेरुपासनादितिभावः ॥ ५ ॥ अथयदूर्ध्वमिति । मध्यंदिनादूर्ध्वंअपराह्णात्प्राक्मध्यंदिनापराह्णमध्यभागगतादित्येयस्तन्नामाहरिः सप्रतिहारोनिरुद्धः । तस्मादित्यादिपूर्ववद्योज्यं । तेगर्भाःगर्भीभवंतः पदार्थाः । पितृदेहादन्यत्रमातृदेहेप्रतिहृतानीता अपि नावपद्यंते ननश्यंति वर्धंतेचप्रत्युततत्रेत्यर्थः ॥ ६ ॥ अथयदूर्ध्वमपराह्णात्अस्तमयात्प्राक्तन्मध्यभागगतादित्ये यत् यः सः उपद्रवोनरसिंहः । अरण्याअरण्येभवाःमृगाःकक्षंक्षुद्रतरुसंघः

अथयदूर्ध्वंमध्यंदिनात्प्रागपराह्णात्सप्रतिहारस्तदस्यगर्भाअन्वायत्तास्तस्मात्तेप्रतिहृतानावपद्यंतेप्रतिहारभाजिनोह्येतस्यसाम्नः ॥६॥ अथयदूर्ध्वमपराह्णात्प्रागस्तमयात्सउपद्रवस्तदस्यारण्याअन्वायत्तास्तस्मात्तेपुरुषंदृष्ट्वाकक्षꣳश्वभ्रमित्युपद्रवंत्युपद्रवभाजिनोह्येतस्यसाम्नः ॥ ७ ॥ अथयत्प्रथमास्तमितेतन्निधनंतदस्यपितरोन्वायत्तास्तस्मात्तान्निदधतिनिधनभाजिनोह्येतस्यसाम्नएवंखल्वमुमादित्यꣳसप्तविधꣳसामोपास्ते ॥ ८ ॥ ९ ॥

श्वभ्रंनामतन्मध्यावकाशःबिलंवा पुरुषंदृष्ट्वाभीतामृगाःकक्षश्वभ्रयोःस्थितनरसिंहस्यरक्षकस्याज्ञानेपिताभ्यांरक्षणंमत्वाकक्षंश्वभ्रमितिमत्वातदुद्दिश्योपद्रवंति तत्समीपंगच्छंति ॥ ७ ॥ अथप्रथमास्तमितेआदित्येयत् यः सःनिधनं निधनाख्यसामभक्तिप्रतिपाद्यःसंकर्षणः। एवंसर्वत्रज्ञेयं ।तान्पितॄन्प्रतिनिदधतिनिक्षिपंतिपिंडादीनितिशेषः । एवंखल्उक्तरूपेणख

लुसप्तधास्थितादित्यगतमादित्यनामकं सप्तविधसामभक्तिप्रतिपाद्यं सप्तरूपं सामाख्यं भगवंतमुपास्ते साधुलोकः । तेनचपरमपदंचाप्नोतीतिग्राह्यं ॥ ८ ॥ ९ ॥ सप्तविधस्यसाम्नोहरेःज्ञानानंदादिभिर्ब्रह्माद्यसमत्वस्वात्मरूपसमत्वविषयामुपास्तिमाह ॥ अथखल्वित्यादिना । अथेतिविद्यांतरमुच्यतइत्यर्थः । खल्वितिअस्याविद्यायाःपरमपुमर्थहेतुत्वेनात्यपूर्वार्थत्वेनचप्रसिद्धतोच्यते । आत्मसंमितं आत्मनामूलरूपेणसंमितंसमानमेव नतुब्रह्मादिसदृशमित्यर्थः । अतिमृत्युमृत्युमतिक्रांतं अमृत्युं इतियावत् । सप्तविधंप्रद्युम्नवासुदेववराहनारायणानिरुद्धनरसिंहसंकर्षणरूपेणसप्तधास्थितंसप्तविधसामभक्तिप्रतिपाद्यंसा

अथखल्वात्मसंमितमतिमृत्युसप्तविधꣳसामोपासीतहिंकारइतित्र्यक्षरंप्रस्तावइतित्र्यक्षरंतत्समं १
आदिरितिद्व्यक्षरंप्रतिहारइतिचतुरक्षरंततइहैकंतत्समं ॥ २ ॥

मभगवंतमुपासीत । रूपाणांज्ञानानंदबलैःसमत्वंदर्शयति ॥ हिंकारइति त्र्यक्षरमिति । हिंकारइतित्रीण्यक्षराणिक्रमात्ज्ञानानंदबलवाचीनि । एवमेवप्रस्तावादिपदान्यपिसर्वाणित्र्यक्षराणिक्रमात्ज्ञानानंदबलवाचीनि । तथाचतत्तत्प्रतिपाद्यरूपाण्यपिज्ञानानंदबलैःसमान्येवेतिभावेनहिंकारादिसप्तभक्तीनांत्र्यक्षरत्वेनसाम्यमाह ॥ प्रस्तावइति । त्र्यक्षरं तत्सममिति ॥ १ ॥ आदिरितिवराहनाम्नोद्व्यक्षरत्वेप्यनिरुद्धनाम्नःप्रतिहारेत्यतश्चतुरक्षरात्प्रशब्दआदिनाम्नियोज्यः । तथाचवराहानिरुद्धौद्वावपिज्ञानानंदबलैरक्षरत्रयवाच्यैःसमौभवतइतिभावेनाह ॥ आदिरितिद्व्यक्षरमिति । ततःप्रतिहारनामत इह

आदिनाम्नि एकंप्रेत्यक्षरंयोज्यमितिशेषः । तत् नामद्वयं त्रिभिस्त्रिभिर्नारायणनरसिंहवाच्युद्गीथोपद्रवेतिनामद्वयं समं ज्ञानादिगुणत्रयवाचितयासममित्यर्थः ॥ २ ॥ अक्षरं वइत्यक्षरमतिशिष्यते अतिरिच्यते तदक्षरंवकाराकारविसर्गभेदेन त्र्यक्षरात्मकतयाज्ञानानंदबलवाचिसत्क्षीराब्धिशायिनोनारायणस्याष्टमरूपस्यनामेति तदपीतरनामसममित्यर्थः ॥ ३ ॥ सप्तविधस्यहरेरुपास्त्युक्त्यानुषंगसिद्धमुपास्त्यंतरमाह ॥ तानीति । सप्तविधमपिहरेरूपंप्रत्येकंत्रिविधंसदेकविंशतिर्भवति क्षीराब्धिशायीचैकइतिद्वाविंशतिर्मूर्तयः । तथाचतानीत्यादेरयमर्थः । तान्येतानिहिंकारादीन्यक्षराण्युक्तविधयाद्वा

उद्गीथइतित्र्यक्षरमुपद्रवइतिचतुरक्षरंत्रिभिस्त्रिभिःसमंभवत्यक्षरमतिशिष्यतेत्र्यक्षरंतत्समं॥३॥ निधनमितित्र्यक्षरंतत्सममेवभवतितानिहवैतानिद्वाविꣳशतिरक्षराणि ॥ ४ ॥ एकविंशत्यादित्यमाप्नोत्येकविंशोवाइतोसावादित्योद्वाविꣳशेनपरमादित्याज्जयतितन्नाकंतद्विशोकं ॥ ५ ॥

विंशतिसंख्याकानीतिद्वाविंशतिमूर्तिवाचकानि । हवैप्रसिद्धमिति ॥ ४ ॥ तत्रैकविंशद्वाविंशमूर्त्युपास्त्योःफलमाह ॥ एकविंशत्येति ॥ नमित्येकविंशाक्षरेण तद्वाच्यकल्किसंकर्षणाख्यरूपोपासनयेतियावत् । आदित्यमादित्यस्थमादित्यनामानं कल्किसंकर्षणाख्यं रूपमाप्नोतीत्यर्थः । एकविंशत्युपास्त्याकथमादित्यस्यप्राप्तिरित्यतः उपास्यरूपसाम्यादित्याह ॥ एकविंशोवाइति ॥ इतःपृथिव्यांस्थितरूपापेक्षयाऽसावादित्यएकविंशोवै । द्वाविंशेन वइत्यक्षरेण वइतिद्वावि

शाक्षरवाच्यक्षीराब्धिशायिहर्युपासनयेतियावत् । आदित्यात्आदित्यस्थरूपात्परमन्यत्क्षीराब्धिशायिरूपं जयति । प्राप्नोति । उपलक्षणमेतत् । इतरविंशत्यक्षरवाच्यविंशतिरूपोपासनयातानिरूपाण्याप्नोतीत्यपिग्राह्यं ॥ ७ ॥ इदमत्रज्ञातव्यं। हिंकारइत्यारभ्यनिधनमित्यंतानिसप्तभक्त्यक्षराण्युक्तदिशाएकैकभक्तेःत्रित्र्यक्षरत्वेनैकविंशत्यक्षराणि । अतिरिच्यमानंवइत्येकमक्षरंद्वाविंशं । सप्तभक्तिप्रतिपाद्यानिप्रद्युम्नवासुदेववराहनारायणानिरुद्धनरसिंहसंकर्षणभेदेनसप्तरूपाणि । तत्राद्यानिचत्वारिरूपाणिकेशवादिदामोदरांतद्वादशात्मनाप्रत्येकमेकैकंरूपंक्रमात्त्रेधात्रेधाभिन्नानिभूत्वाचतुर्भक्तिगतहिमादिप्रेत्यंत द्वादशाक्षरप्रतिपाद्यानि केशवप्रद्युम्न नारायणप्रद्युम्न माधवप्रद्युम्न गोविंदवासुदेव विष्णुवासुदेव मधुसूदनवासुदेव त्रिविक्रमवराह वामनवराह श्रीधरवराह हृषीकेशनारायण पद्मनाभनारायण दामोदरनारायणेत्याख्यायमानानिचैत्रादिफाल्गुनांतेषुद्वादशमासेषुतिष्ठंति। प्रतिहारोपद्रवनिधनरूपावशिष्टसामभक्तित्रयप्रतिपाद्यान्यनिरुद्धनरसिंहसंकर्षणरूपाणि बुद्धंहित्वामत्स्यादिकल्क्यंतनवरूपात्मनाप्रत्येकंत्रेधात्रेधाभिन्नानिभूत्वा क्रमात्हीतीत्यादि नमित्यंताक्षरनवकेनोच्यमानानि मत्स्यानिरुद्ध कूर्मानिरुद्ध वराहानिरुद्ध नरसिंहनरसिंह वामननरसिंह भार्गवनरसिंह रामसंकर्षण कृष्णसंकर्षण कल्किसंकर्षणेत्याख्यायमानानिसंति । हेमंतशिशिरयोरैक्येनक्रमात्वसंतादिऋतुपंचकेपृथिव्यंतरिक्षद्युसूर्येषुतिष्ठंतीति। एवंचसत्यादित्यस्थोनमित्येकविंशाक्षरार्थःकल्किसंकर्षणः पृथिवीमासऋत्वंतरिक्षद्युलोकापेक्षयाएकविंशोभवति। द्वादशमासाःपंचर्तवस्त्रयइमेलोकाअसावादित्यएकविंशइतिश्रुतेः। केशवादिरूपेणललाटादिषुस्थितेरितिएकविंशइतिवा। अतिरिक्तवइत्यक्षरंतुद्वाविंशमितितदर्थ

भूतक्षीराब्धिगतरूपोपासनयाक्षीराब्धिगतप्राप्तिरिति । एवंतत्तदक्षरवाच्यतत्तद्गततत्तद्रूपोपासनयातत्तन्निष्ठरूपप्राप्तिर्भवतीति ॥ ४ ॥ द्वाविंशतिरूपजातस्यमहिमानमाह ॥ तदिति ॥ तत्द्वाविंशतिरूपजातंअसुखवर्जनात्पूर्णानंदस्वरूपत्वाद्वा नाकमिति भक्तानांशोकनाशनाद्विशोकमितिचोच्यते ॥ ५ ॥ ननुतत्तद्रूपोपासनयातत्रतत्रस्थितरूपप्राप्त्युक्तौतत्तद्रूपाणांस्वस्वप्राप्तिमात्रदातृत्वप्राप्त्यारूपेषुगुणानांव्यवस्थितत्वात्कथंसर्वरूपाणामात्मसम्मितत्वोक्तिरित्याशंकांपरिहरन्नुपासकस्यफलमाह ॥ आप्नोतीत्यादिना ॥ योधिकारी एतत्सर्वसन्निहितं द्वाविंशतिभेदभिन्नरूपजातमितिवा एवंद्वाविंशत्यक्षर

आप्नोतीहादित्यस्यजयंपरोहास्यादित्यजयाज्जयोभवतियएतदेवंविद्वानात्मसंमितमातिमृत्युसप्तविधꣳसामोपास्तेसामोपास्ते ॥ ६ ॥ १० ॥

वेद्यत्वरूपेणविद्वान्जानन्आत्मसम्मितमतिमृत्युंसप्तविधंप्रद्युम्नादिसप्तरूपं साम सप्तविधभक्त्युपेतसामप्रतिपाद्यंहरिमुपास्तेसइतिशेषः। सःउपासकःइह पृथिव्यादिस्थितभार्गवादिभगवद्रूपमाप्नोतितत्प्राप्त्याचादित्यस्यादित्यस्थस्यादित्यनाम्नःकल्किसंकर्षणाख्यरूपस्येतियावत् । जयंप्राप्तिंह्याप्नोतिलभतेरूपाणामैक्यात् । आदित्यस्यादित्यस्थस्यउक्तरूपहरेर्जयात्प्राप्त्या अस्योपासकस्यपरोजयःपृथिव्यादिस्थितरूपांतरजयोभवतिरूपाणामैक्यादेव । अतोनात्मसंमितत्वोक्त्ययुक्तिरिति

भावः । द्विरुक्तिरुक्तार्थेतात्पर्यज्ञप्त्यर्था ॥ ६ ॥ १० ॥ पूर्वसामविशेषनामोक्तिंविनापंचविधसप्तविधसामभक्तिप्रतिपा
द्यस्यहरेरुपास्तिरुक्ता । अधुनासामविशेषनामोक्तिपूर्वपंचविधतत्तद्भक्तिप्रतिपाद्यस्यहरेरुपास्तिमैहिकामुष्मिकफलेतद्ब्र
तंचाहमनइत्याद्येकादशपर्वभिः । तत्रगायत्रसामनिष्ठामुपास्तिमाह ॥ **मनइति** ॥ मनस्थंमनोनामकंहिंकारःहिमित्या
क्रियतइतिहिंकाराख्यप्रथमभक्तिप्रतिपाद्यःप्रद्युम्नः । एवमग्रेपिसर्वत्रयोजना । वाक्वाङ्नामाप्रस्तावःवासुदेवः । चक्षुश्चक्षु
स्थःचक्षुर्नामाउद्गीथःनारायणः । श्रोत्रंश्रोत्रस्थःश्रोत्रनामकःप्रतिहारोऽनिरुद्धः । प्राणःप्राणस्थःप्राणनामानिधनंसंकर्ष

मनोहिंकारोवाक्प्रस्तावश्चक्षुरुद्गीथःश्रोत्रंप्रतिहारःप्राणोनिधनमेतद्गायत्रंप्राणेषुप्रोतꣳसयएव
मेतद्गायत्रंप्राणेषुप्रोतंवेदप्राणीभवतिसर्वमायुरेतिज्योग्जीवतिमहान्प्रजयापशुभिर्भवतिमहा
न्कीर्त्यामहामनाःस्यात्तद्व्रतं ॥ खंडः ॥ ११ ॥

णः । एतत्प्राणस्थविष्णुवाचितयातत्सन्निहितंगायत्राख्यंसामप्राणेषुप्राणस्थेप्राणनाम्निहरौप्रोतं । तद्वाचकंतन्नियम्यंचेत्य
र्थः । ज्ञानिनःफलमाह ॥ **सयइति** । योऽधिकारी एवमित्यस्यविवरणमेतदित्यादि । यद्वाहिंकारादिपंचभक्तिभिर्मनःप्रभृ
तिपंचस्थानगतप्रद्युम्नादिभगवद्रूपप्रतिपादकत्वादिप्रकारेणैतद्गायत्रं प्राणेषु प्राणस्थहरौप्रोतं तद्वाचकंतन्नियम्यंचेतिवेद स
वेदी प्राणीभवति प्राणस्थप्राणनामकविष्णुलाल्यतयातद्वान्भवति सर्वमायुर्मोक्षमेति । ऐहिकफलमाह । ज्योक्स्वयोग्य
सर्ववित्सञ्जीवतीत्यादि । तस्यव्रतमाह ॥ **महामनाइति** । गायत्रसामवेदिनोमहामनस्त्वंव्रतमित्यर्थः ॥ खंडः ॥ ११ ॥

रथंतरसामप्रतिपाद्यभगवदुपास्तिमाह ॥ अभीति । योहिंकारःप्रद्युम्नःसःअभिमंथतिअरणिमथनगतः । प्रस्तावोवासुदेवो यः सः धूमोजायते जायमानधूमगतः । उद्गीथोनारायणोज्वलति ज्वालागतः । प्रतिहारोनिरुद्धोंगारावस्थापन्नवह्निगतः । निधनंसंकर्षणःउपशमसंशमशब्दितसावशेषनाशनिःशेषनाशोभयगतः । एतत्अग्निस्थहरिवाचितयातत्समीपस्थं रथंतराख्यं

अभिमंथतिसहिंकारोधूमोजायतेसप्रस्तावोज्वलतिसउद्गीथोंगाराभवंतिसप्रतिहारउपशाम्यतितन्निधनꣳसꣳशाम्यतितन्निधनमेतद्रथंतरमग्नौप्रोतं ॥ १ ॥ सयएवमेतद्रथंतरमग्नौप्रोतंवेदब्रह्मवर्चस्यन्नादोभवतिसर्वमायुरेतिज्योग्जीवतिमहान्प्रजयापशुभिर्भवतिमहान्कीर्त्या(नप्रत्यंचम) नप्रत्यङ्ङग्निमाचामेन्ननिष्ठीवेत्तद्व्रतं ॥ २ ॥ १२ ॥

उपमंत्रयतेसहिंकारोज्ञपयतेसप्रस्तावःस्त्रियासहशेतेसउद्गीथःप्रतिस्त्रीसहशेतेसप्रतीहारःकालंगच्छति(प्रतिस्त्रिया)तन्निधनंपारंगच्छतितन्निधनमेतद्वामदेव्यंमिथुनेप्रोतं ॥ १ ॥

सामाग्नौ अग्निस्थेग्निनाम्निहरौप्रोतं । तद्वाचकंतन्नियम्यंचेत्यर्थः ॥ १ ॥ सयइत्यादिफलवाक्यंप्राग्वत् । एतत्सामार्थवेदिनोव्रतमाह ॥ नप्रत्यंचमग्निमिति । अग्न्यभिमुखतयानाचामेत्ननिष्ठीवेत्किंचित्प्रत्यपिश्लेष्मनिरसनंनकुर्यात् । प्रत्यंचमग्निंननिष्ठीवेदितिवा ॥ २ ॥ १२ ॥ वामदेवसामार्थविष्णूपास्तिमाह ॥ उपेति । उपमंत्रयते रंतुंसंभाषतेज्ञपयतेसुखमनुभ ॥ २७ ॥

वति । स्त्रियासहशेतेएकपर्यंकगमनं । प्रतिस्त्रीसहशेतेमैथुनकरणं । कालंगच्छतिपारंगच्छतिमैथुनसमाप्तिगमनं । मिथुनेमिथो नयतीतिव्युत्पत्त्यामिथुननाम्निहरौ ॥ १ ॥ मिथुनीमिथुननामकविष्णुलाल्यत्वात्तद्वान्भवति । मिथुनात्मिथुनस्थितभग वतःसकाशात्प्रजायतेप्रकृष्टोजायतेकर्मवशादनेकस्त्रीपरिग्रहेसतितासुकांचन नपरिहरेत्तद्व्रतं ॥ २ ॥ १३ ॥ बृहत्सामवेद्यभ

सयएवमेतद्वामदेव्यंमिथुनेप्रोतंवेदमिथुनीभवतिमिथुनान्मिथुनात्प्रजायतेसर्वमायुरेतिज्योग्जी वतिमहान्प्रजयापशुभिर्भवतिमहान्कीर्त्या नकांचनपरिहरेत्तद्व्रतं ॥ २ ॥ १३ ॥
उद्यन्हिंकार उदितःप्रस्तावो मध्यंदिनउद्गीथोपराह्णःप्रतिहारोस्तंयन्निधनमेतद्बृहदादित्येप्रोत ँसयएवमेतद्बृहदादित्येप्रोतंवेदतेजस्व्यन्नादोभवतिसर्वमायुरेतिज्योग्जीवतिमहान्प्रजयापशु भिर्भवतिमहान्कीर्त्या तपंतंननिंदेत्तद्व्रतं ॥ खंडः ॥ १४ ॥

गवदुपास्तिमाह ॥ उद्यन्निति । उदयंप्राप्नुवन्नादित्येस्थितहिंकाराख्यःप्रद्युम्नः । आदित्यस्यैकत्वेप्युदयाद्यवस्थाभेदाद्भेदः । मध्यंदिनोमध्यंदिनगतः । अपराह्णोपराह्णगतः । अस्तंयन्प्राप्नुवन् बृहत्बृहदाख्यंसाम । उदयाद्यवस्थाभेदेनपंचधाभिन्ना दित्यस्थे आदित्यनाम्निप्रद्युम्नादिपंचधाभिन्नेप्रोतं । बृहत्सामनिष्ठस्यव्रतमाह ॥ तपंतंननिंदेदिति । खंडः ॥ १४॥ वैरूपा ख्यसामवेद्यभगवदुपास्तिमाह ॥ अभ्राणीति । संप्लवंते इतस्ततस्संचरंति इतस्ततोमेघसंचरणक्रियाहेतुस्तन्निष्ठःहिंकारार्थ

प्रद्युम्नइत्यादिरर्थोध्येयः । मेघोजायतेवर्षानुकूलतयाजायते विद्योततइति विद्युत्स्तनयित्नूभयगतः । उद्गृह्णातिवर्षमुपसंहर तीत्यर्थः । पर्जन्येपर्जन्यस्थेपर्जन्यनाम्नि विरूपानजाविप्रभृतीन् सरूपानेकजातीयान्गवादीनवरुंधेप्राप्नोति ॥ खंडः ॥१५॥

अभ्राणिसंप्लवंतेसहिंकारो मेघोजायतेसप्रस्तावोवर्षतिसउद्गीथोविद्योततेस्तनयतिसप्रतिहारउ द्गृह्णातितन्निधनमेतद्वैरूपंपर्जन्येप्रोतꣳसयएवमेतद्वैरूपंपर्जन्येप्रोतंवेदविरूपाꣳश्चसुरूपाꣳश्चपशून वरुंधेसर्वमायुरेतिज्योग्जीवतिमहान्प्रजयापशुभिर्भवतिमहान्कीर्त्यावर्षंतंननिंदेत्तद्व्रतं॥खंडः॥१५॥

वसंतोहिंकारो ग्रीष्मःप्रस्तावो वर्षाउद्गीथः शरत्प्रतिहारो हेमंतोनिधनमेतद्वैराजमृतुषुप्रो तꣳसयएवमेतद्वैराजमृतुषुप्रोतंवेदविराजतिप्रजयापशुभिर्ब्रह्मवर्चसेनसर्वमायुरेतिज्योग्जीवति महान्प्रजयापशुभिर्भवतिमहान्कीर्त्याऋतूनन्ननिंदेत्तद्व्रतं ॥ खंडः ॥ १६ ॥

पृथिवीहिंकारोंतरिक्षंप्रस्तावोद्यौरुद्गीथोदिशः प्रतिहारः समुद्रोनिधनमेताःशक्वर्योलोकेषुप्रो ताःसयएवमेताःशक्वर्योलोकेषुप्रोतावेदलोकीभवतिसर्वमायुरेतिज्योग्जीवतिमहान्प्रजयापशु भिर्भवतिमहान्कीर्त्यालोकान्ननिंदेत्तद्व्रतं ॥ खंडः ॥ १७ ॥

वैराजाख्यसामवेद्यहर्युपास्तिमाह ॥ वसंतइति । हेमंतशिशिरयोरैक्येनाह ॥ हेमंतइति । ऋतुषुऋतुस्थितेऋतुनाम्नि ब हुरूपत्वात्बहुवचनं ॥ खंडः ॥ १६ ॥ शक्वर्याख्यसामवेद्यहर्युपास्तिमाह ॥ पृथिवीहिंकारइति । देशनादाज्ञापनाद्दि

शोदिङ्गामादिग्गतःप्रतिहारोनिरुद्धः समुद्रेकाद्गुणैःसमृद्धत्वात्समुद्रनामासमुद्रस्थः एताःशक्वर्यःशक्वर्याख्यंसाम बहुवचनंरेवत्यइवशब्दस्वाभाव्यात् । लोकेषुप्रकाशरूपतयालोकनाम्निलोकस्थेहरौ बहुवचनंप्राग्वत् । लोकस्थलोकनामकहरिलाल्यत्वात्तद्वान्भवतीत्यर्थः ॥ खंडः ॥ १७ ॥ रेवत्याख्यसामवेद्यहर्युपास्तिमाह ॥ अजाइति । पशुषु पशुनामकेपशुगते

अजाहिंकारो वयःप्रस्तावो गावउद्गीथोश्वाःप्रतिहारः पुरुषोनिधनमेतारेवत्यःपशुषुप्रोताःस यएवमेतारेवत्यःपशुषुप्रोतावेदपशुमान्भवतिसर्वमायुरेतिज्योग्जीवतिमहान्प्रजयापशुभिर्भवतिमहान्कीर्त्या पशून्ननिंदेत्तद्व्रतं ॥ खंडः ॥ १८ ॥

लोमहिंकारस्त्वक्प्रस्तावो माँसमुद्गीथोस्थिप्रतिहारो मज्जानिधनमेतद्यज्ञायज्ञीयमंगेषुप्रोतँसयएवमेतद्यज्ञायज्ञीयमंगेषुप्रोतँवेदांगीभवतिनांगेनविहूर्च्छतिसर्वमायुरेतिज्योग्जीवतिमहान्प्रजयापशुभिर्भवतिमहान्कीर्त्यासंवत्सरंमज्ज्ञोनाश्नीयात्तद्व्रतंमज्ज्ञुनाश्नीयादितिवा ॥ खंडः ॥ १९ ॥

पंचात्मनिहरौ रेवत्यइतिबहुवचनंशब्दस्वाभाव्यात् ॥ खंडः ॥ १८ ॥ यज्ञायज्ञीयाख्यसामवेद्यहर्युपास्तिमाह ॥ लोमेत्यादिना । लोपकत्वहेतुनालोमनामालोमस्थः । तवःशब्दितप्रकाशरूपत्वहेतुनात्वङ्नामात्वचिस्थितः । मादनात्साररूपत्वान्मांसनामामांसस्थः । स्थिरमासनात्उपवेशनात्अस्थिनामास्थिगतः । मदस्यजननात्मज्जानामामज्जागतः । अंगेषुअंगगतत्वहेतु

नादेहावयवभूतांगस्थेंगनाम्निहरौ अंगस्थविष्णुमानितिहेतोरंगीभवतीत्यर्थः। अंगेनांगस्थेनहरिणातत्प्रसादेनेतियावत् । नवि
हूर्च्छेतिकुटिलांगवान्नभवति मज्ज्ञइतिद्वितीयाबहुवचनं मांसविशेषानित्यर्थः । मज्ज्ञुमांसविशेषंकदापिनाश्नीयादित्यर्थः ॥
खंडः ॥ १९ ॥ राजनाख्यसामवेद्यनिष्ठोपास्तिमाह ॥ अग्निरिति । अदनादग्निनामाग्निस्थः वानात्ज्ञानादायुष्ट्वाच्चवा

अग्निर्हिंकारो वायुःप्रस्ताव आदित्यउद्गीथो नक्षत्राणिप्रतिहारश्चंद्रमानिधनमेतद्राजनंदेवता
सुप्रोतꣳसयएवमेतद्राजनंदेवतासुप्रोतंवेदैतासामेवदेवतानाꣳसलोकताꣳसार्ष्टिताꣳसायुज्यं
गच्छतिसर्वमायुरेतिज्योग्जीवतिमहान्प्रजयापशुभिर्भवतिमहान्कीर्त्याब्राह्मणान्ननिंदेत्तद्व्रतं
॥ खंडः ॥ २० ॥

त्रयीविद्याहिंकारस्त्रयइमेलोकाःसप्रस्तावोग्निर्वायुरादित्यःसउद्गीथो नक्षत्राणिवयाꣳसिमरीच
यःसप्रतिहारः सर्पागंधर्वाःपितरस्तन्निधनमेतत्सामसर्वस्मिन्प्रोतꣳसयएवमेतत्सामसर्वस्मिन्प्रो
तꣳवेदसर्वꣳहिभवति ॥ १ ॥

युनामावायुस्थः स्वातंत्र्यहेतुनानक्षत्रनामानक्षत्रस्थः परमानंदत्वाच्चंद्रनामाचंद्रस्थः देवतासुदेवतास्थेहरौ सार्ष्टितां सामी
प्यं ॥ खंडः॥२०॥ सर्वाख्यसामवेद्यभगवदुपास्तिमाह ॥ त्रयीत्यादिना । ज्ञानरूपत्वहेतुनात्रयीविद्यानामा त्रय्यांविद्यायां

स्थितः इमेलोकाः प्रकाशरूपतयालोकनामालोकस्थः प्रागुक्तनिरुक्त्याग्निवाय्वादित्यस्थः। विशब्दार्थोकाशेअयनाद्वयोनामा वयःशब्दितपक्षिषुस्थितः। प्रमितरुक्त्वात्मरीचिनामामरीचिस्थितः। सर्पणहेतुना गोधरत्वहेतुना सृष्टिहेतुत्वहेतुनाच सर्प गंधर्वपितृनामासर्पादिस्थः। एतत्सर्वं सर्वाख्यंसाम सर्वस्मिन् सर्वाख्यसाम्निस्थितेसर्वगुणपूर्णेहरौ। स्वयोग्यसर्वपूर्तिमान् भवतीतिभावेनसर्वंहिभवतीतिफलोक्तिः॥ १॥ उक्तार्थेमंत्रंपठति॥ तदेषइति। ततूतत्र यानिहिंकाराद्यर्थभूतानिपंचवि धप्रद्युम्नादिपंचरूपाणिप्रत्येकंऋगादित्रित्रिस्थानभेदेनत्रिधात्रिधास्थिततयात्रीणित्रीणिवर्तंते तेभ्योभगवद्रूपेभ्यःपरंज्यायो

तदेषश्लोकोयानिपंचधात्रीणित्रीणितेभ्योनज्यायःपरमन्यदस्ति यस्तद्वेदसवेदसर्वꣳसर्वादिशो बलिमस्मैहरंतिसर्वमस्मीत्युपासीततद्व्रतंतद्व्रतं॥ २॥ २१॥

विनर्दिसाम्नोवृणे पशव्यमित्यग्रेरुद्गीथो ऽनिरुक्तःप्रजापतेर्निरुक्तःसोमस्य मृदुश्लक्ष्णंवायोः श्ल क्ष्णंबलवदिंद्रस्य क्रौंचंबृहस्पतेरपध्वांतंवरुणस्य तान्त्सर्वानेवोपसेवेत वारुणंत्वेववर्जयेत्॥ १॥

न्यन्नास्ति त्रयीविद्यादिपंचवर्गेभ्योज्यायःश्रीतत्त्वमस्तीतिपरंज्यायइत्युक्तं। परंज्यायोभगवद्रूपमेवनान्यदितिभावः। यस्त त्परमज्यायोभगवद्रूपंनान्यदित्येतद्वेदससर्ववेद सर्ववेदप्रमेयस्यज्ञानादितिभावः। सर्वादिशःसर्वदिगवस्थिताःप्रजाः बलिं पूजामस्मैज्ञानिने हरंतिसर्वाख्यसामोपासकस्यव्रतमाह॥ सर्वमिति। असनात्मितिरूपत्वादस्मीत्युक्तंभगवद्रूपंसर्वपरि पूर्णमित्युपासीत तद्व्रतं। द्विरुक्तिस्तात्पर्यज्ञप्त्यर्था॥ २॥ २१॥ सामनाम्नोहरेर्व्यस्तसमस्तसामोपास्तिरुक्ता तत्रसाम्नउ

द्गानप्रकारंसप्रभेदमाह ॥ **विनर्दीत्यादिना** । साम्नःसामनाम्नोहरेःविनर्दि गानप्रकारं विशिष्टोनर्दोनादोस्यास्तीतिविनर्दि विशिष्टनादोपेतंगानं सपादैकवर्षवृषभस्वरवद्वामेघस्वरवद्वास्थिरस्वरोपेतं सामनामभगवत्कर्तृकंविनर्दिशब्दितं गानमहं वृणे ।तादृशस्वरोपेतमेवसामगानंकुर्यामित्युषेर्वाक्यं । उद्गातुर्वा । तादृशस्वरस्यैवसर्वोत्तमत्वात्तादृशस्वरेणैवोद्गातासामगायेदितिभावः । तादृशस्वराशक्तौस्वरांतरेणगातव्यमितिभावेनतत्प्रभेदानाह ॥ **पशव्यमित्यादिना** । पशव्यमित्यग्नेः । अग्नेरुद्गीथउद्गानंपशव्यमिति । इतिशब्दःप्रकारवाची । स्त्रीपशुसंबंधिस्वरप्रकारमित्यर्थः । प्रजापतेर्ब्रह्मणउद्गीथउद्गानं अ

अमृतत्वंदेवेभ्यआगायानीत्यागायेत्स्वधांपितृभ्य आशांमनुष्येभ्यस्तृणोदकंपशुभ्यः स्वर्गंलोकं यजमानायान्नमात्मनआगायानीत्येतानिमनसाध्यायन्नप्रमत्तःस्तुवीत ॥ २ ॥

निरुक्तःअनुपमोगंभीरइत्यर्थः । सोमस्योद्गीथः निरुक्तः साक्षात्घंटानिनादवत् । वायोरुद्गीथः मृदुश्लक्ष्णं मृदुमेघस्वरवत् विंशतिवर्षवृषभस्वरवद्वा । इंद्रस्योद्गीथःश्लक्ष्णंबलवत् तीव्रमेघगर्जनवत् । बृहस्पतेः क्रौंचपक्षिस्वरवत्उद्गीथः । वरुणस्योद्गीथः अपध्वांतं विस्वरः । तान्सर्वानेवोपसेवेत एतैःसर्वैरपिस्वरैर्गायेदितियावत् । वारुणंत्वेवापस्वरंवर्जयेत् ॥ १ ॥ गाने इतिकर्तव्यतामाह ॥ **अमृतत्वमित्यादिना** । इतिमनसाध्यायन्निितिसर्वत्रान्वेति । मुख्यवायुश्चेदुद्गातासःदेवेभ्योऽमृतत्वं मुक्तिमागायानि गानेनसाधयामीतिमनसाध्यायन्सामगायेत् । तथागानेहिस्वस्यापिदेवांतर्भावान्मुक्तिसिद्धिरितिभावः ।

मुख्यवायुतोन्यश्चेदुद्गातासमद्भृदिस्थोवायुःदेवेभ्यःअमृतत्वमागायतीतिमनसाध्यायन्गायेदित्यर्थः । एवमग्रेपि । पितृभ्यः स्वधांश्राद्धादिभागमुद्दिश्यागायानीतिमनसाध्यायन्नागायेदित्यनुषंगः । मनुष्येभ्यआशां आशासितमिष्टमितियावत् । पशु भ्यः तृणोदकमितिद्वंद्वैकवद्भावः। आगायानीतिमनसाध्यायन्नागायेदित्यन्वेति । आत्मनेस्वस्मैप्राणस्थविष्णवे । प्राणएवचे दुद्गातातदास्वात्मगतविष्णवेऽन्नगानेऽर्थात्स्वस्यान्नभुजिर्भवति । प्राणादन्यश्चेत्स्वगतमुख्यवायुस्थविष्णवेऽन्नगानेस्वस्याप्य न्नभुजिरर्थसिद्धेतिज्ञेयं। एतानि अमृतत्वमागायानीत्याद्युक्तानि । यद्वासर्वेस्वराइत्यादिनावक्ष्यमाणानि । मनसाध्यायन्अप्र

सर्वेस्वराइंद्रस्यात्मानः सर्वऊष्माणःप्रजापतेरात्मानः सर्वेस्पर्शामृत्योरात्मानस्तंयदिस्वरेषूपा लभेतेंद्रंशरणंप्रपन्नोभूवंसत्वाप्रतिवक्ष्यतीत्येनंब्रूयात् ॥ ३ ॥

मत्तः प्रमादहीनः स्तुवीत सामोपेतार्ग्भिःस्तोत्रंकुर्यात् ॥२॥ ध्यायन्नित्युक्तध्येयान्याह ॥ सर्वइति । सर्वेस्वराःअकाराद्यज्वर्णाः इंद्रस्य इदंरातीतिव्युत्पत्त्यावायोरात्मानःअधिष्ठानभूताः। सर्वेऊष्माणःशषसहाःप्रजापतेःप्रजाःपातीतिप्रजापतिनाम्नोविष्णोः आत्मानः । विष्णुस्वामिकाः । सर्वेस्पर्शाःककारादिमावसानाःपंचवर्गगावर्णाःमृत्योर्मारयितृत्वहेतुनामृत्युनाम्नोरुद्रस्यात्मा नः । अस्वलितेष्वपिस्वरादिषुकेनचिदसुरवर्गेणोपालंभेकृतेवक्तव्यमाह ॥ तंयदीति । तंसम्यक्स्वरानुच्चारयंतंयदिकश्चि दसुरस्वभावःस्वरविषयेउपालभेत निंद्यात्तदेतिशेषः। इंद्रं इंद्रशब्दितंवायुंशरणंरक्षकंप्रपन्नःप्राप्तोभूवं । सइंद्राख्योवायुस्त्वा

त्वांप्रतिवक्ष्यतिप्रत्युत्तरंदास्यतीत्येनंनिंदकंब्रूयात् ॥३॥ एवमूष्मशब्दितवर्णानुच्चारयंतमूष्मसुविषये । प्रजापतिंविष्णुं सप्रजापतिःत्वात्वांप्रतिपेक्ष्यति पिष्टंकरिष्यति । एनंनिंदकं । स्पर्शेषुविषये । मृत्युंरुद्रंसत्वात्वां । प्रतिधक्ष्यतिभस्मसात्करिष्यति ॥४॥ स्वरादेरिंद्राद्यात्मतोक्तेःकृत्यमाह ॥ सर्वइति । अकारादयःसर्वेस्वराःइंद्रेऐश्वर्यादिंद्रनामकेवायौबलंददानीतिमनसाध्यायन्स्वरवंतःध्वनिविशेषयुक्ताःबलवंतोविवृताख्यप्रयत्नवंतोवक्तव्याः । उद्गातुर्वायुत्वेतुवायुपदयोग्यानांबहुत्वात्यजमानभूत

अथयद्येनमूष्मसूपालभेतप्रजापतिंशरणंप्रपन्नोभूवंसत्वाप्रतिपेक्ष्यतीत्येनंब्रूयादथयद्येनꣳस्पर्शेषूपालभेतमृत्युंशरणंप्रपन्नोभूवंसत्वाप्रतिधक्ष्यतीत्येनंब्रूयात् ॥ ४ ॥ सर्वेस्वराघोषवंतोबलवंतोवक्तव्याइंद्रेबलंददानीति सर्वऊष्माणोग्रस्तानिरस्ताविवृतावक्तव्याःप्रजापतेरात्मानंपरिददानीति सर्वेस्पर्शालेशेनानभिहतावक्तव्यामृत्योरात्मानंपरिहराणीति ॥ ५ ॥ २२ ॥

वायुपदयोग्यस्यविष्णुतोमुक्तिदानमेवबलदानंज्ञेयंप्रजापतेर्विष्णोरात्मानंस्वात्मानंपरिददानिसमर्पयेइतिध्यायन्सर्वेऊष्माणःअग्रस्ताअदष्टाअनिरस्ताःअनतिद्रुतोच्चारिताविवृतप्रयत्नकावक्तव्याः । विवृतमूष्मणांस्वराणांचेतिशिक्षाग्रंथोक्तेः । मृत्योरुद्रात्आत्मानंजीवजातं परिहराणि मृत्युवर्जितान्मुक्तियोग्यान्करिष्यामीति ध्यायन्सर्वेस्पर्शाःलेशेनानभिहताः ।

लेशतोप्यसंसृष्टावक्तव्याः । वायुश्चेदुद्गातामुक्तियोग्यंकरोत्येव । अन्यश्चेन्मद्गतोवायुःकरोतीतिध्यायन्स्पर्शानुच्चारयेदि त्यर्थः ॥ ५ ॥ २२ ॥ व्यस्तसमस्तसाम्नासामनाम्नोहरेरुपासकानांस्वर्गमोक्षौफलत्वेनोक्तौतत्रकेषांकिमितिजिज्ञासायांत द्विवेकेनाह ॥ त्रयइति । धर्मस्कंधाःधर्मसंघाःत्रयःतदाह ॥ यज्ञइति । प्रथमस्कंधइत्यन्वेति । तपःकृच्छ्रचां द्रायणेंद्रियजयादिकं द्वितीयस्कंधः । ब्रह्मचार्याचार्यकुलवासीसन्अत्यंतमात्मानमाचार्यकुलेवसादयेदितियत्सतृती

त्रयोधर्मस्कंधायज्ञोध्ययनंदानमितिप्रथमस्तपएवद्वितीयोब्रह्मचार्याचार्यकुलवासीतृतीयोऽत्यंत मात्मानमाचार्यकुलेवसादयेत्सर्वएतेपुण्यलोकाभवंति ब्रह्मसंस्थोमृतत्वमेति ॥ १ ॥ प्रजापति र्लोकानभ्यतपत्तेभ्योभितप्तेभ्यस्त्रयीविद्यासंप्रास्रवत्तामभ्यतपत्तस्याअभितप्तायाएतान्यक्षराणि संप्रास्रवंतभूर्भुवःस्वरिति तान्यभ्यतपत्तेभ्योभितप्तेभ्यओंकारःसंप्रास्रवत्तद्यथाशंकुनासर्वाणि पर्णानिसंतृण्णान्येवमेतेनोंकारेणसर्वावाक्संतृण्णोंकारएवेदꣳसर्वमोंकारएवेदꣳसर्वं ॥ २ ॥ २३ ॥

यस्कंधः । एतेयज्ञादिनिष्ठाःसर्वे पुण्यलोकाःपुण्यःपुण्यप्राप्यःस्वर्गादिलोकोएषांतेपुण्यलोकाभवंति ॥ ६ ॥ तत्रायं विवेकः । यज्ञाध्ययनदानैर्गृहीसोमलोकंयाति । यतिस्तपसासूर्यं । वनस्थोब्रह्मचारीचऋषिलोकमिति । उक्तेषुमध्ये यदिकश्चिद्ब्रह्मसंस्थो ब्रह्मज्ञानी तर्हिअमृतत्वंमुक्तिमेति ॥ १ ॥ प्रायोमुमुक्षुजप्योमंत्रःवेदाद्यर्थतयासर्वसारत्वादोंकारए

वेत्याख्यायिकयाह ॥ प्रजापतिरित्यादिकया । प्रजापतिर्विष्णुःसारान्विवेक्तुंशब्दात्मलोकानभ्यतपत्अपश्यत् । तेभ्यः शब्दात्मकलोकेभ्यअभितप्तेभ्यःदृष्टेभ्यः त्रयीविद्या ऋगादिरूपा संप्रास्रवत् सारत्वेनभगवताव्यज्ञायत । तामित्यादिवाक्यत्रयमप्येवंव्याख्येयं । ॐकारस्योक्तंसर्वसारत्वंदृष्टांतपूर्वव्यनक्ति ॥ तद्यथेति । वक्ष्यमाणंनिदर्शनं । यथाशंकुनासर्वाणिपर्णानि संतृष्णानि प्रोतानि एवमोंकारेणभगवन्नामभूतेन सर्वावाक् संतृष्णाप्रोता । सर्ववाचांतदर्थविवृतिपरत्वात् । इदंप्रकृतमोंकारएवसर्वं । अर्थपूर्तिवाचिनःसर्वपदस्यनपुंसकतयातदन्वितत्वादिदमित्यपिनपुंसकंकृतं अयमों

ब्रह्मवादिनोवदंति यद्वसूनांप्रातःसवनꣳरुद्राणांमाध्यंदिनꣳसवनमादित्यानांविश्वेषांदेवानां चतृतीयसवनं क्वतर्हियजमानस्यलोकइति सयस्तन्नविद्यात्कथंकुर्यादथविद्वान्कुर्यात् ॥ १ ॥

कारःसर्वं अर्थपूर्णइत्यर्थः । द्विरुक्तिरुक्तार्था ॥ २ ॥ २३ ॥ सामनामकभगवदुपास्त्यास्वर्गमोक्षावुक्तौतत्रप्राप्तविघ्नपरिहारहेतुभूतवस्वादिनिष्ठभगवदुपास्तिंशिष्यगुर्वाक्षेपसमाधिरूपाख्यायिकयाह ॥ ब्रह्मवादिनइति । यत् यदि वसूनांप्रातःसवनं भूलोकश्चेत्युपलक्ष्यते । रुद्राणांमाध्यंदिनंसवनं अंतरिक्षलोकश्चेत्यपिग्राह्यं । आदित्यानांविश्वेषांदेवानांचतृतीयसवनं स्वर्गलोकश्च क्वतर्हियजमानस्यलोकः । तेषांवस्वादीनांतत्तल्लोकाधिपत्यादितिब्रह्मवादिनःशिष्याःवदंति । आक्षेपवाचमाहुरित्यर्थः । भूलोकादिस्वामिवस्वादिषुस्थितहरिं लोकद्वारादिवक्ष्यमाणमंत्रैःप्रार्थ्य भूरादिवसुप्रभृतिलोक

मेवयजमानोयातीतिभावेनतत्रगुरुभिरुक्तंसमाधिमाह ॥ सयइत्यादिना । प्रयच्छंतीत्यंतेनखंडत्रयेण । योधिकारीतल्लोकद्वारादिमंत्रैर्वस्वादिस्थहरिप्रार्थनयातत्तद्वस्वादिलोकप्राप्तिरित्येतत्प्रमेयंनविद्यात्तर्हिंसःअज्ञःकथंकुर्यात् । यज्ञादीतिशेषः । अथतस्मात् प्राप्यफलाज्ञानेतद्धेत्वनुष्ठानायोगाद्विद्वानुक्तमर्थंजानन्नेवकर्मकुर्यात् ॥ १ ॥ कर्मकृतौविद्वानित्युक्तज्ञातव्यमाह ॥ प्रातरिति । प्रातरनुवाकस्यशस्त्रस्योपाकरणात् उपक्रमात् । पुरा पूर्वं गार्हपत्यस्यजघनेन पश्चाद्भागे

पुराप्रातरनुवाकस्योपाकरणाज्जघनेनगार्हपत्यस्योदङ्मुखउपविश्य सवासवꣳसामाभिगायतिलो३कद्वारमपावार्णू३पश्येम त्वावयꣳराआआआआहुंआआआज्या३यो३आआआआइत्यथजुहोतिनमोग्नयेपृथिवीक्षितेलोकक्षितेलोकंमेयजमानायविंदैष वैयजमानस्यलोकएताऽस्म्यत्रयजमानःपरस्तादायुषःस्वाहापजहिपरिघमित्युक्त्वोत्तिष्ठतितस्मैवसवःप्रातःसवनꣳसंप्रयच्छंति ॥२॥२४॥

उदङ्मुखः स्थिरमुपविश्य सयजमानःवासवंवसुगतवस्वादिनामकभगवत्संबंधिवासवंसामगायति गायेत् । तत्सामाह ॥ लोकेति । लोकस्य भूलोकस्य द्वारं अपावृणु आवरणंतिरस्कुरु । वयंत्वात्वांपश्येम राइत्यस्यराज्यायेत्यर्थलाभायज्यायेतिपदेनान्वयः । तस्यार्थःभूलोकप्राप्तयइति । इतिवस्वंतर्गतवसुनामकंहरिंप्रार्थ्याथानंतरंजुहोति । अग्नयेऽग्न्यंतर्गतायाग्नि

नाम्नेहरये नमःलोकक्षिते। तस्यविवरणंपृथिवीक्षितइति । भूलोकप्राप्तये यजमानाय। त्वदाराधकाय मेमह्यंलोकंभूलोकंविं दप्रापय । यद्वापृथिवीक्षितइत्यग्नयइत्यस्यविशेषणंभूलोकस्वामिनेइत्यर्थः । एवमग्रेपि यजमानस्यलोकोवैआयुषःपरस्तात् । अत्रभूलोके एतास्मि यजमानोहंगंतास्मि । स्वाहापरिघंभूलोकप्राप्तिप्रतिबंधकमनादिपरिघंभोअग्निगताग्निनामकहरेऽपजहि तस्यहंताभव । इत्युक्त्वाग्निंगंहरिंप्राथ्योत्तिष्ठति । तस्मैयजमानाय वसवोवसुगतास्तन्नामानोभगवद्रूपविशेषाःप्रातःसवनं

पुरामाध्यंदिनस्यसवनस्योपाकरणाज्जघनेनाग्नीध्रीयस्योदङ्मुखउपविश्यसरौद्रꣳसामाभिगायति लो३कद्वारमपावार्णू३पश्येमत्वावयंविराआआआआहुंआआआज्या३यो३आआइत्यथजुहोति नमोवायवेंतरिक्षक्षितेलोकक्षितेलोकंमेयजमानायविंदैषवैयजमानस्यलोकएतास्म्यत्रयजमानः परस्तादायुषःस्वाहापजहिपरिघमित्युक्त्वोत्तिष्ठतितस्मैरुद्रामाध्यंदिनꣳसवनꣳसंप्रयच्छंति।खंडः॥२५

तत्संबंधि भूलोकंप्रयच्छंति ॥२॥२४॥ पुरेत्यादिखंडद्वयमपिप्राग्वदेवयोज्यं। आग्नीध्रीयस्य। आग्नीध्रीयाख्यदक्षिणाग्नेःरौद्रं रुद्रांतर्गतरुद्रनामकहरिविषयंसाम । तत्सामाह ॥ लोकेति ॥ अत्रापिविराइत्यस्यज्यायइत्यनेनविराज्यायांतरिक्षलोकप्राप्तये इत्यर्थलाभायान्वयः । अंतरिक्षलोकप्राप्तिबंधकानादिपरिघनिवृत्तये वायुगतभगवत्प्रार्थनामाह ॥ नमोवायवइति॥

वायुगतायवायुनाम्नेहरये रुद्राःरुद्रस्थाः माध्यंदिनंसवनं अंतरिक्षलोकं ॥ खंडः ॥ २५ ॥ आदित्यमादित्यांतर्गतविषयं वैश्वदेवं विश्वदेवांतर्गतविषयंच स्वाराइत्यस्यज्यायेत्यनेनस्वाराज्यायस्वर्लोकाप्तयइत्यर्थेलाभायान्वयः । आदित्येभ्यः आदित्यांतःस्थेभ्यः एवंविश्वेभ्योदेवेभ्यइत्यत्रापि । प्रवहतप्रवर्तयततृतीयसवनं स्वर्लोकं वस्वाद्युपासनयैवयजमानःस्वर्गादि

पुरातृतीयसवनस्योपाकरणाज्जघनेनाहवनीयस्योदङ्मुखउपविश्य सआदित्यꣳसवैश्वदेवꣳसामाभिगायतिलो३कद्वारमपावार्णू३पश्येम त्वावयꣳस्वाराआआआआहुंआआआज्या३यो३आआइत्यादित्यमथवैश्वदेवंलोकद्वारमपाऽऽवार्णू३पश्येम त्वावयꣳसाम्राआआआआहुंआआआज्या३यो३आआइत्यथजुहोति नमआदित्येभ्यश्चविश्वेभ्यश्चदेवेभ्योदिविक्षिद्भ्योलोकक्षिद्भ्योलोकंमेयजमानायविंदतैषवैयजमानस्यलोकएताऽस्म्यत्रयजमानःपरस्तादायुषःस्वाहापहतपरिघमित्युक्त्वोत्तिष्ठतितस्माआदित्याश्चविश्वेचदेवास्तृतीयसवनꣳसंप्रयच्छंत्येष हवैयज्ञस्यमात्रांवेदयएवंवेदयएवंवेद ॥ खंडः ॥ २६ ॥ ७ ॥ इतिश्रीमच्छांदोग्योपनिषदिद्वितीयोऽध्यायः ॥ २ ॥

लभतेकिमित्यतस्तदंतर्गतभगवदुपास्त्यैवेत्याह ॥ एषहवाइति ॥ योधिकारीएवमुक्तरीत्यावस्वादिस्थभगवदुपास्त्यैवतत्तल्लोकावाप्तिरितिवेद सएवयज्ञस्यमात्रां मातारंत्रातीतिमात्रांशब्दस्वाभाव्यात्स्त्रीत्वं । यज्ञस्यनिर्मातृपुरुषरक्षकंहरिंवेदसएवच

स्वर्गादिभाक्तनान्यइतिभावः ॥ अत्रतात्पर्यंभाष्येव्यक्तं ॥ खंडः २६॥ इतिश्रीमच्छांदोग्योपनिषत्खंडार्थेराघवेंद्रयतिकृतेद्वितीयोध्यायःसंपूर्णः॥२॥ ॥ वस्वादिदेवाउपासिताउपासकस्यनिर्विघ्नंस्वर्गादिप्रयच्छंतीत्युक्तं तेतुनानादितः स्वमहिम्नैववसुपदादिमंतः वसूनामेवैकोभूत्वेत्यादेः । अतःकस्यचिदुपास्त्येतिवाच्यं । कोसौतदुपास्यइत्यतस्तदुपास्यंपंचविधंप्रपंचेनाह ॥ **असौवाइत्यादिना** ॥ असौआदित्वततत्वज्ञानरूपत्वहेतुभिःआदित्यनामादित्यस्थोविष्णुःदेवमधु । मदःसुखानुभवोस्मिन्धीयतेनिधीयतइतिमधु । सुखानुभवपूर्णोमधुशब्दार्थः । देवोपजीव्यत्वाद्देवमधु । प्रसिद्धमधुवदयमादित्यस्थोविष्णुर्देवो

असौवाआदित्योदेवमधु तस्यद्यौरेवतिरश्चीनवंशोंतरिक्षमपूपो मरीचयःपुत्राः ॥ १ ॥

पजीव्यमध्वित्यर्थः । एतद्विद्यायाःहृद्यारोहायप्रसिद्धमधुसादृश्यंसर्वमप्याह ॥ **तस्येति** । आदित्याख्यमधुनोहरेः । द्यौः प्रकाशादिगुणैर्द्युनाम्नीद्युस्थाश्रीः तिरश्चीनवंशःतिर्यक्स्थित्वाप्रणतिंकृत्वावशेकरोतिहरिमितितिरश्चीनवंशइत्युक्तामध्वाश्रयापूपस्थानीयमारुताश्रयत्वात्तिर्यक्स्थितवंशस्थानीया । स्वांतस्सम्यक्हरीक्षणहेतुनांतरिक्षनामांतरिक्षस्थोवायुस्तिर्यग्वंशलग्नमध्वाश्रयापूपः । आप्योहरिरुपतिष्ठत्यत्रेतिभगवत्सन्निधिविशेषयुक्तत्वादपूपइत्युक्तःप्रसिद्धमधुपटलस्थानीयः । आदित्यनाम्नोहरेर्मधुशब्दितस्यांतरिक्षेस्थितेरितिभावः । मरीचयःरश्मयःमरीचिषुस्थिताः । वसुरुद्राद्याःमधुकारिणस्तत्पुत्राःमरी

च्याद्याःमरीचिस्थाइत्यर्थः ॥ १ ॥ तस्यादित्यस्य । येप्रांचः पूर्वदिगवस्थितारश्मयः रश्मिषुस्थिताः रतिशंमानरूपत्वहेतुना रश्मिनामावासुदेवःताएव । विधेयापेक्षयास्त्रीत्वं । बहुवचनमधिष्ठानबहुत्वाद्रूपबाहुल्याद्वा । रश्मिषुस्थितस्तन्नामावासुदेव एवेतियावत् । अस्य मध्वपूपस्य प्राच्योमधुनाड्यः पूर्वदिगवस्थितमधुनाडीषुस्थितः । अंशिनंमूलरूपमाद्युमंशैर्वासुदेवादि भिर्विनानालंनसमर्थः । पुमानितिव्युत्पत्त्यानाडीनामा । लडयोरभेदात् । स्त्रीत्वंशब्दस्वाभाव्यात् । बहुवचनंप्राग्वत् । एवम ग्रेपि । ऋचःऋग्वेदमानिनः । प्रातःसवनेअर्च्यत्वहेतुनाऋङ्नामानोवह्न्याद्यावसवःमधुकृतःमधुनामकविष्णुव्यक्तिकृत्त्वान्मधु

तस्ययेप्राञ्चोरश्मयस्ताएवास्यप्राच्योमधुनाड्य ऋचएवमधुकृतऋग्वेदएवपुष्पं ताअमृताआप स्तावाएताऋचः ॥ २ ॥ एतमृग्वेदमभ्यतपꣳस्तस्याभितप्तस्ययशस्तेजइंद्रियंवीर्यमन्नाद्यꣳरसो जायत ॥ ३ ॥

मक्षिकानिभाः । ऋग्वेदएवपुष्पंज्ञानपोषकत्वात्पुष्पमित्युक्तःप्रसिद्धपुष्पनिभः । ताआपः आसमंतात्पीयंतेविचार्यंतेदेवैरित्य पूशब्दिताऋचएवामृताःनित्यत्वादमृताइत्युक्ताः । प्रसिद्धामृतनिभाः तावाएताऋचो ऋङ्मानिनोऋङ्नामानोवसवः ॥२॥ एतमृग्वेदमभ्यतपन् श्रवणमननादिभिर्व्यचारयन् । अभितप्तस्यविचारितस्यतस्यवेदस्यसकाशात्यशः ज्ञानानंदात्मकः । तेजः प्रकाशरूपः । इंद्रियं परमैश्वर्यरूपः । वीर्यं सर्वानुग्रहशक्तः । अन्नाद्यं बलरूपः । रसः श्रेष्ठः । अन्नाद्यं सर्वानुग्रह

शक्तः । रसोबलरूपइतिवार्थः । वासुदेवाख्योहरिः अजायत अभिव्यक्तोभूत् ॥ ३ ॥ तत् यशःप्रभृतिगुणयुक्तंरसशब्दितं वासुदेवाख्यंब्रह्म धर्ममोक्षादीन्देवानांव्यक्षरत् प्रादात् । तत् वासुदेवाख्यंब्रह्म । आदित्यमभितः आदित्यप्राग्रश्मीन् । आश्रयत् तत्रातिष्ठत् । तद्वै ऋग्वेदोक्तंवासुदेवाख्यंब्रह्म । एतद्वै यदादित्यस्य(रो)लोहितंरूपंलोहिताकारंसत्प्राग्रश्मिगत लोहितरूपगमिति ॥ ४ ॥ १ ॥ अथ संकर्षणाख्यरूपोपासनोक्तिरारभ्यतइत्यर्थः । यएवास्यादित्यस्यदक्षिणाः । दक्षिणदि

**तद्व्यक्षरत्तदादित्यमभितोश्रयत्तद्वाएतद्यदेतदादित्यस्यरोहितꣳरूपं ॥ ४ ॥ १ ॥
अथयेस्यदक्षिणारश्मयस्ताएवास्यदक्षिणामधुनाड्योयजूꣳष्येवमधुकृतोयजुर्वेदएवपुष्पंताअमृता
आपः ॥ १ ॥ तानिवाएतानियजूꣳष्येतंयजुर्वेदमभ्यतपꣳस्तस्याभितप्तस्ययशस्तेजइंद्रियंवीर्य
मन्नाद्यꣳरसोजायत ॥ २ ॥**

गवस्थिताः । रश्मयो रश्मिगताःरतिशंमानरूपतयारश्मिनामकःसंकर्षणः । बहुवचनंप्राग्वत् । ताएव तत्रत्यसंकर्षणएव । अस्य मध्वपूपस्यदक्षिणानाड्यः । दक्षिणमधुनाडीस्थः । प्रागुक्तव्युत्पत्त्यानाडीनामकः । बहुवचनंप्राग्वत् । यजूंष्येव यजुर्मानिनोवायुमुखारुद्राःमध्वाख्यहरिव्यंजकत्वान्मधुमक्षिकानिभाः । यजुर्वेदएवपुष्पं ज्ञानपोषकत्वात्पुष्पमित्युक्तः । प्रसिद्धपुष्पकल्पं तस्यापिभ्रमरपोषकत्वात् । आपःप्रागुक्तनिरुक्त्यायजूंषि ताआपः ॥ १ ॥ तानियजूंषियजुर्वेदइतियावत् ।

अमृताःनित्यत्वादमृतशब्दिताःप्रसिद्धपुष्पामृततुल्याः । तानिवाएतानियजूंषि यजुर्मानिनोवायुमुखारुद्राः एतं यजुर्वेदम भ्यतपन् व्यचारयन् । तस्य विचारितस्यसकाशात् । यशइत्यादिप्राग्वत् । रसः संकर्षणः ॥ २ ॥ तत् संकर्षणाख्यंब्रह्म । आदित्यमभितोदक्षिणरश्मीनश्रयत् । तत्रातिष्ठत् । तत्संकर्षणरूपमेतद्धै । यदादित्यस्यशुक्लंरूपं शुक्लवर्णसत्शुक्लरूप गमेतदित्यर्थः ॥ ३ ॥ २ ॥ अथेति । प्रद्युम्नस्योपास्तिप्रकारउच्यतइत्यर्थः । अस्यादित्यस्ययेप्रत्यंचोरश्मयः प्रत्यग्रश्मि

तद्व्यक्षरत्तदादित्यमभितोश्रयत्तद्वाएतद्यदेतदादित्यस्यशुक्लꣳरूपं ॥ ३ ॥ २ ॥
अथयेस्यप्रत्यञ्चोरश्मयस्ताएवास्यप्रतीच्योमधुनाड्यःसामान्येवमधुकृतःसामवेदएवपुष्पंताअमृ ताआपः ॥ १ ॥ तानिवाएतानिसामान्येतꣳसामवेदमभ्यतपꣳस्तस्याभितप्तस्ययशस्तेजइंद्रियंवी र्यमन्नाद्यꣳरसोजायत ॥ २ ॥ तद्व्यक्षरत्तदादित्यमभितोश्रयत्तद्वाएतद्यदेतदादित्यस्यकृष्णꣳ रूपं ॥ ३ ॥ ३ ॥

स्थोरश्मिनामाप्रद्युम्नः सएवास्यमध्वरूपस्य प्रतीच्योमधुनाड्यः प्रत्यङ्मधुनाडीस्थोमधुनाडीनामकः । सामान्येव सामाभि मानिनःमासेषुसमभोगतयासामनामानःविष्णुवर्जिताःइंद्रमुखाःसर्वेआदित्याः । मधुकृतइत्यादिसर्वप्राग्वत् ॥ १ ॥ सामानि सामाभिमानिनःप्रागुक्ताः ॥२॥ तत् सामवेदोदितंप्रद्युम्नरूपं । एतद्धैयदेतदादित्यस्यकृष्णंरूपंश्यामवर्णसत्कृष्णरूपगं॥३॥३॥

अथेतिप्राग्वत् । अस्यादित्यस्य येउदंचोरश्मयःरश्मिस्थोरश्मिनामकोनिरुद्धः । तावै सोनिरुद्धएवअस्यमध्वपूपस्योदक्दिगवस्थितमधुनाडीगतोनाडीनामकः । अथर्वांगिरसएवअधरंवर्तयंतिवृष्टिं । मनःप्राणाभिमानितयागानांरसश्चेतिअंगिरसोनामकाःइतिहासपुराणाथर्ववेदमानिनःसोममुखामरुतःमधुकृतः । इतिहासपुराणं द्वंद्वैकवद्भावः । ताएवापःआपीयंतइत्य

अथयेस्योदञ्चोरश्मयस्ताएवास्योदीच्योमधुनाड्योथर्वांगिरसएवमधुकृतइतिहासपुराणंपुष्पंता अमृताआपः ॥ १ ॥ तेवाएतेथर्वांगिरसएतदितिहासपुराणमभ्यतपꣳस्तस्याभितप्तस्ययशस्तेजइंद्रियंवीर्यमन्नाद्यꣳरसोजायत ॥ २ ॥ तद्व्यक्षरत्तदादित्यमभितोश्रयत्तद्वाएतद्यदेतदादित्यस्यपरःकृष्णꣳरूपं ॥ ३ ॥ ४ ॥

अथयेस्योर्ध्वारश्मयस्ताएवास्योर्ध्वामधुनाड्योगुह्याएवादेशामधुकृतोब्रह्मैवपुष्पंताअमृताआपः॥१॥

पूशब्दितेतिहासादिवाक्यान्येवामृताःप्रसिद्धामृतनिभानि ॥ १ ॥ तेवाइत्यादिप्राग्वत् ॥ २ ॥ आदित्यमभितःउदग्ररश्मीनश्रयत् । तत् इतिहासपुराणाथर्ववेदोक्तमनिरुद्धाख्यंरूपमेतद्वै । यदादित्यस्यपरःकृष्णं अत्यंतनीलंरूपं । सुनीलवर्णसदत्यंतनीलरूपगतं एतद्वैइति ॥ ३ ॥ ४ ॥ अथेति । ऊर्ध्वारश्मयो रश्मिनामकोनारायणः । गुह्यादेशाः सर्वगुह्योपदेष्टृत

यागुह्यादेशाइत्युक्ताःब्रह्ममुखास्सर्वेऋजवःब्रह्मैववेदराशिरेव । ताएवापोवेदवाचोअमृताः ॥ १ ॥ तत्सर्ववेदोक्तं नारायणाख्यंरूपंप्रोद्यदादित्यवर्णसत्आदित्यस्य(मंडलस्य)मध्येमहामरीचिपुंजेनक्षोभतइवाचलोपिचलतीवास्ते ॥ २ ॥ ३ ॥ तेवा एतेवासुदेवाद्याःपंचभगवद्रूपविशेषा रसानांरसाः । तद्वनक्ति ॥ वेदाहिरसाइति । तानिवाएतानिवासुदेवादिरूपाणितेषाममृतानांनित्यानांवेदानाममृतानिनित्यताप्रदानि ॥ ४ ॥ ५ ॥ एवंपंचरूपिणंभगवंतंमधुतयोक्त्वा अधुना केकस्य सेव

तेवाएतेगुह्याआदेशाएतद्ब्रह्माभ्यतपꣳस्तस्याभितप्तस्ययशस्तेजइंद्रियंवीर्यमन्नाद्यꣳरसोजायत ॥२॥
तद्व्यक्षरत्तदादित्यमभितोश्रयत्तद्वाएतद्यदेतदादित्यस्यमध्येक्षोभतइव ॥३॥ तेवाएतेरसानाꣳरसा
वेदाहिरसास्तेषामेतेरसास्तानिवाएतान्यमृतानाममृतानिवेदाह्यमृतास्तेषामेतान्यमृतानि॥४॥५॥
तद्यत्प्रथमममृतंतद्वसवउपजीवंत्यग्निनामुखेननवैदेवाअश्नंतिनपिबंत्येतदेवामृतंदृष्ट्वातृप्यंति ॥ १ ॥
तएतदेवरूपमभिसंविशंत्येतस्माद्रूपादुद्यंति ॥ २ ॥

काः किंचतेषांतत्फलमित्यतःतत्सर्वंपंचभिःपर्वभिराह ॥ तद्यदिति । तत् प्रागुक्तंयत्प्रथमममृतंवासुदेवाख्यंतद्वसवउपजीवंति । पश्यंत्यग्निनामुखेन । देवावसवःतद्दर्शनपर्यंतंनवैनैवाश्नंति । नपिबंत्यन्यभोगहीनावर्तंते । एतदेवामृतंवासुदेवंदृष्ट्वा तृप्यंति ॥ १ ॥ तेवन्ह्याद्यावसवः एतदेववासुदेवरूपं अभिस्वेच्छया संविशंति मुक्ताःसंतःप्रविशंति । एतस्माद्रूपात्स्वेच्छ

योद्यंति निर्गच्छंति ॥ २ ॥ एवंप्राप्तपदानांवसूनांमुक्तिरूपफलमुक्त्वाधुनाप्राप्स्यमानपदानांतत्पदयोग्यानांमधूपास्त्यातत्प
दप्राप्त्यादिकंफलमाह ॥ **सइति** । योधिकारीएतदेवामृतंवासुदेवाख्यंवेद सज्ज्ञानी वसूनामेवमध्येएकोभूत्वा वसुपदवींप्रा
प्याग्निनैवमुखेनैतदेवामृतंवासुदेवंदृष्ट्वातृप्यति । सपश्चान्मुक्तावेतदेवरूपंवासुदेवंसंविशति । स्वेच्छयैवैतस्माद्रूपादुदेति ।
बहिर्गच्छति ॥ ३ ॥ वसूनामेवैकोभूत्वेतिमधूपासकस्यवसुपदप्राप्तिरुक्ता तत्किंरूपमितिजिज्ञासायामाह ॥ **सयावदिति** ।

**सयएतदेवममृतंवेदवसूनामेवैकोभूत्वाग्निनैवमुखेनैतदेवामृतंदृष्ट्वातृप्यतिसएतदेवरूपमभिसंवि
शत्येतस्माद्रूपादुदेति ॥ ३ ॥ सयावदादित्यःपुरस्तादुदेतापश्चादस्तमेतावसूनामेवतावदाधिप
त्यंस्वाराज्यंपर्येता ॥ ४ ॥ ६ ॥**

अथयद्द्वितीयममृतंतद्रुद्राउपजीवंतींद्रेणमुखेननवैदेवाअश्नंतिनपिबंत्येतदेवामृतंदृष्ट्वातृप्यंति ॥१॥

सवसुपदयोग्योवासुदेवज्ञानी आदित्यःपुरस्तात् उदयाद्रौ । उदेता । दृष्टिविषयोभवन्यावत्कालंयावद्देशंवासंचरन् ।
पश्चादस्ताद्रावस्तमदर्शनंएतागंताभवति वसूनांतावद्देशतावत्कालाधिपत्यंस्वाराज्यंभोगंचपर्येताप्राप्ताभवतीत्यर्थः । अत्रा
वांतरविशेषःपुनर्विशेषतोदत्तमित्यादिभाष्यात्ज्ञेयः ॥ ४ ॥ ६ ॥ अथयद्द्वितीयमित्यादिखंडचतुष्टयेप्येवमेवार्थोध्येयः ।

द्वितीयममृतंसंकर्षणाख्यं उपजीवंतिपश्यंति इंद्रेणमुखेनवायुनामुखेन ॥ १ ॥ २ ॥ सयएतदेवामृतंवेदेत्यादेःपूर्वत्रेवगमनिका तद्वदेवार्थश्चज्ञेयः । इंद्रेणैववायुनैव ॥ ३ ॥ रुद्राणांकियद्देशकियत्कालाधिपत्यमित्यतआह ॥ सइत्यादिना । सद्वितीयामृताख्यसंकर्षणज्ञानी । रुद्राणांतावदाधिपत्यंस्वाराज्यंपर्येतेत्यन्वयः । कियद्देशकालमाधिपत्यंरुद्राणामित्यतोवसुभोज्यदेशकालयोरर्धदेशकालमित्याह॥ दक्षिणतइत्यादिना । आदित्यस्यमेरुंप्रदक्षिणीकृत्यसंचरतोस्तगिरावेतद्देशीयानामदर्श

तएतदेवरूपमभिसंविशंत्येतस्माद्रूपादुद्यंति ॥ २ ॥ सय एतदेवममृतंवेदरुद्राणामेवैकोभूत्वेंद्रेणैवमुखेनैतदेवामृतंदृष्ट्वातृप्यतिसएतदेवरूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥ सयावदादित्यः पुरस्तादुदेतापश्चादस्तमेताद्विस्तावद्दक्षिणतउदेतोत्तरतोस्तमेतारुद्राणामेवतावदाधिपत्यंस्वाराज्यंपर्येता ॥ ४ ॥ ७ ॥

नंप्राप्तस्यमेरोःपश्चिमभागेदक्षिणदेशादुत्तरदेशंगच्छतोदक्षिणोत्तरदेशयोर्यथाक्रमंउदयास्तमयौमेरुपश्चिमभागस्थजनानांभवतः । तत्रतत्रमानसगिरौनिम्नोन्नतस्थलसत्त्वादुदयास्तमयौध्येयौ । तथाचादित्यःयावद्दक्षिणतउदेतोत्तरतोस्तमेता । मेरुपश्चिमदेशगतजनानांदक्षिणतोदृष्टिविषयोभूत्वायावद्देशकालंगच्छन्ततउत्तरदेशेकिंचित्दिशिगतअदर्शनंप्राप्नोतितावद्देशकालंरुद्राणामाधिपत्यं । कियद्देशकालंमेरुपश्चिमभागेदक्षिणतःउत्तरदिग्गमनमित्यतस्तद्देशकालपरिमाणमाह॥यावदिति । उदया

द्रौउदेत्यपश्चिममस्तंयावद्देशकालंयातितावद्देशकालंद्विर्द्विगुणितंभवेदितिरुद्रभोज्यदेशकालाद्विगुणितोभवेत् राद्रोदेशकाल द्विगुणितोवसुकालोयावान् तावान्भवतीतितदर्धदेशः अर्धरात्रकालश्चरुद्रभोज्यावितिफलितोर्थः ॥ ४॥७ ॥ तृतीयममृतं प्रद्यु म्नाख्यं वरुणेनवरणीयत्वहेतुनाइंद्रेण ॥१॥२॥ वरुणेनैवइंद्रेणैव ॥३॥ एवंदक्षिणतउदेत्योत्तरतोस्तंगतोरविर्यदामेरुपश्चिमदेशी यानामस्तंगतो यदास्तंगतदेशात्मेरुवायव्यभागात् पश्चिमात्पूर्वदेशं मेर्वीशान्यभागंप्रत्यायाति तदामेरूत्तरभागस्थानांजना

अथयत्तृतीयममृतंतदादित्याउपजीवंतिवरुणेनमुखेननवैदेवाअश्नंति नपिबंत्येतदेवामृतंदृष्ट्वातृप्यंति ॥ १ ॥ तएतदेवरूपमभिसंविशंत्येतस्माद्रूपादुद्यंति ॥ २ ॥ सयएतदेवममृतंवेदादित्यानामेवैकोभूत्वावरुणेनैवमुखेनैतदेवामृतंदृष्ट्वातृप्यति सएतदेवरूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥ सयावदादित्योदक्षिणतउदेतोत्तरतोस्तमेताद्विस्तावत्पश्चादुदेतापुरस्तादस्तमेताssदित्यानामेवतावदाधिपत्यंस्वराज्यंपर्येता ॥ ४ ॥ ८ ॥

नांपश्चिमपूर्वावुदयास्तमयदेशौतावद्देशकालावादित्यभोग्यौरौद्रदेशकालार्धदेशकालावित्याह ॥ **सयावदित्यादिना** । पश्चादितिवाक्येपियावदितिग्राह्यं पश्चादुदेत्यपुरस्तादस्तंयावद्देशकालंयाति तावद्देशकालमादित्यानामाधिपत्यं । तदेवक्रियदित्यतउक्तं यावदिति । दक्षिणोत्तरयोरुदयास्तमयदेशकालौआदित्यदेशकालाद्विगुणितौसंतौयावंतौभवतःतावदिति ।

रुद्रोपभोग्यदेशकालार्धदेशकालावितियावत् ॥ ४ ॥ ८ ॥ चतुर्थममृतमनिरुद्धाख्यं ॥ १ ॥ २ ॥ ३ ॥ मरुतामादित्योप भोग्यदेशकालार्धदेशकालाधिपत्यमित्याह ॥ सयावदादित्यइत्यादिना । पूर्ववद्योजना । उत्तरतःमेरोरीशान्यभागादु

अथयच्चतुर्थममृतंतन्मरुतउपजीवंति सोमेनमुखेननवैदेवाअश्नंतिनपिबंत्येतदेवामृतंदृष्ट्वातृप्यंति ॥१॥ तएतदेवरूपमभिसंविशंत्येतस्माद्रूपादुद्यंति ॥ २ ॥ सयएतदेवममृतंवेद मरुतामेवैकोभूत्वासो मेनैवमुखेनैतदेवामृतंदृष्ट्वातृप्यति सएतदेवरूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥ सयाव दादित्यःपश्चादुदेतापुरस्तादस्तमेताद्विस्तावदुत्तरतउदेतादक्षिणतोस्तमेतामरुतामेवतावदाधि पत्यंस्वाराज्यंपर्येता ॥ ४ ॥ ९ ॥

अथयत्पंचमममृतंतत्साध्याउपजीवंतिब्रह्मणामुखेननवैदेवाअश्नंतिनपिबंत्येतदेवामृतंदृष्ट्वातृप्यं ति ॥१॥ तएतदेवरूपमभिसंविशंत्येतस्माद्रूपादुद्यंति ॥२॥ सयएतदेवममृतंवेदसाध्यानामेवैको भूत्वाब्रह्मणैवमुखेनैतदेवामृतंदृष्ट्वातृप्यतिसएतदेवरूपमभिसंविशत्येतस्माद्रूपादुदेति ॥ ३ ॥

त्तरदेशीयानामस्तमयदेशात् । दक्षिणतोमेरोःकिंचिदाग्नेयभागेस्तमेता । मेरोःपूर्वदेशीयानांउत्तरदक्षिणयोरुदयास्तमयौ भवतः ॥ ४ ॥ ९ ॥ पंचमममृतंनारायणाख्यं । साध्याःसाध्यनामकाःब्रह्मपदयोग्याःऋजवः । सुपर्णशेषसरस्वतीसुपर्णा

वारुण्यश्च ब्रह्मणाविरिंचेन ॥ १ ॥ २ ॥ ३ ॥ मरुतामुपभोग्यदेशकालार्धदेशकालौसाध्यनामकानामित्याह ॥ सयाव दित्यादिना । मेरोःकिंचिदाग्नेययुक्तपूर्वभागेह्यैंद्रपुरं । तत्रोदयगिरौनिम्नोन्नतभागोस्तितत्रादित्यउदयाद्रेरूर्ध्वभागादधो भागंयदायातितद्देशस्थानामूर्ध्वमुदयोधोस्तमयः । तद्देशकालौ मरुद्देशकालार्धदेशकालौसाध्योपभोग्यौ ॥ ४ ॥ १० ॥ खंप्रलयेतुभगवान्कथंतिष्ठतीत्यतआह ॥ अथेति । स्थित्यनंतरं । ततः सूर्यमंडलादूर्ध्वउदेत्योद्गत्योर्धगतःसन्वैकुंठलोकंप्राप्य ।

सयावदादित्यउत्तरतउदेतादक्षिणतोस्तमेताद्विस्तावदूर्ध्वउदेतार्वाङस्तमेतासाध्यानामेवता वदाधिपत्यंस्वाराज्यंपर्येता ॥ ४ ॥ १० ॥

अथततऊर्ध्वउदेत्यनैवोदेतानास्तमेतैकलएवमध्येस्थातातदेषश्लोकः ॥ १ ॥ नवैतत्रननिम्लोचो नोदियायकदाचन । देवास्तेनाहꣳसत्येनमाविराधिषिब्रह्मणेति ॥ २ ॥ नहवाअस्माउदेतिनिनि म्लोचतिसकृद्दिवाहैवास्मैभवतियएतामेवंब्रह्मोपनिषदंवेद ॥ ३ ॥

नैवोदेतानास्तमेताएकलव एकप्रकारएवअद्वितीयएवेतिवा । मध्ये प्रलये स्थाता । तत्रउक्तेर्थे एषवक्ष्यमाणःश्लोकःसंवादी भवति ॥ १ ॥ नवै (नैव)तत्रवैकुंठलोके । तत्रकिंनैवेत्यतउदयास्तमयौनैवेति । तद्व्यनक्ति । ननिम्लोचो नास्तमयः कदाच ननोदियाय उदयहीनः । हेदेवाः तेनसत्येनब्रह्मणाहरिणा तत्प्रसादेनेतियावत् । अहंमाविराधिषि । देवतात्वसिद्धिराहि त्यंनप्राप्नुयामित्यर्थः । इतिशब्दःश्लोकसमाप्तौ ॥ २ ॥ एतद्विद्यावेदिनःमहत्त्वंप्रकाशयन्मोक्षफलमाह ॥ नहवाइति ।

॥ ३९ ॥

योधिकारी एतांब्रह्मोपनिषदं ब्रह्मप्रतिपादिकां मधुविद्यांवेद अस्मैज्ञानिने नहवाउदेति ननिम्लोचति तस्यतात्पर्योक्तिः सकृद्दिवाहैवास्मैभवतीति । मुक्तस्यवैकुंठंप्राप्तस्यनित्यंदिवैवभवतीत्यर्थः ॥ ३ ॥ महदुपदेशपरंपरागताचैषेतिविद्यांप्रशंसति ॥ तद्धैतदिति । तदेतदादित्याख्यंपंचविधदेवमध्वाख्यंब्रह्मरूपं ब्रह्माभगवान्विष्णुः प्रजापतयेविरिंचयेउवाच । प्रजापति र्मनवे । मनुःप्रजाभ्यः । उवाचेतिसर्वत्रानुषंगः । तद्धैतद्ब्रह्म उद्दालकआरुणयेज्येष्ठायपुत्रायप्रोवाच(स्म) ॥ ४ ॥ ततूतस्मा

तद्धैतद्ब्रह्माप्रजापतयउवाचप्रजापतिर्मनवेमनुःप्रजाभ्यस्तद्धैतदुद्दालकाया(कआ)रुणयेज्येष्ठायपु त्रायपिताब्रह्मप्रोवाच ॥ ४ ॥ इदंवावतज्ज्येष्ठायपुत्रायपिताब्रह्मप्रब्रूयात्प्रणाय्यायवांतेवासि ने ॥ ५ ॥ नान्यस्मैकस्मैचनयद्यप्यस्माइमामद्भिःपरिगृहीतांधनस्यपूर्णांदद्यादेतदेवततोभूयइ त्येतदेवततोभूयइति ॥ ६ ॥ ११ ॥

त्संप्रदायागतत्वात् । अद्यतनोपिपिताप्रणाय्यायप्रणयवते ज्येष्ठपुत्रायअंतेवासिनेवा इदंब्रह्मप्रब्रूयात् ॥ ५ ॥ नान्यस्मैक स्मैचनेति । एतद्विद्योपदेष्टुःसदृशगुरुदक्षिणाभावाच्चैषामहतीत्याह ॥ यदीति । अस्मै एतद्विद्योपदेष्ट्रे । धनस्य धनेनपू र्णांअद्भिः सप्तसमुद्रैः परिगृहीतां परिवृतामपीमांपृथिवीं यदिदद्यात् । एतदेवमधुविद्यादानमेव । ततस्तादृशगुरुदक्षिणातः भूयः अधिकं तद्विद्यादानायदक्षिणानैवपूर्यतइत्यर्थः । इतिशब्दःसमाप्तौ । द्विरुक्तिस्तात्पर्यज्ञस्यार्था ॥ ६ ॥ ११ ॥

छांदोग्य० सूर्यांतर्गतस्यहरेःसर्ववेदप्रतिपाद्यत्वेनप्रकृतस्यवेदमातृगायत्रीनामार्थत्वेनोपास्तिमाह ॥ **गायत्रीत्यादिना** । यदिदंकिंच सर्वं खंडार्थ.
॥ ४० ॥ सर्वांतर्गतं भूतं प्रभूतं परिपूर्णमत्स्याद्यवतारजातं इदंसर्वंगायत्रीवै गायत्र्यांसंस्थितस्सन्गायत्रीनामकःस्त्रीरूपःसूर्यसप्रभो ३।१२
भगवान्वैप्रसिद्धं । गायत्र्यनुषक्तवागादिनिष्ठानिभगवदुपास्त्यंतराण्याह ॥ **वाग्वैगायत्रीति** । गायत्रीनामाहरिः
वाग्वै । वक्तीतिव्युत्पत्त्यावाङ्नामास्त्रीरूपोवाचिस्थितोहयशीर्षोवै । कुतः इदंसर्वंभूतंदेशकालगुणपरिपूर्णमत्स्याद्यवतार
जातं वाग्वै । हयशीर्षाख्यं तदभिन्नंवै । यतोतस्तदभिन्नंगायत्रीरूपात्मकमित्यर्थः । केननिमित्तेनगायत्रीनामाहरिरित्य

गायत्रीवाइदꣳसर्वंभूतंयदिदंकिंचवाग्वैगायत्रीवाग्वाइदꣳसर्वंभूतंगायतिचत्रायतेच ॥ १ ॥
यावैसागायत्रीयंवावसायेयंपृथिव्यस्याꣳहीदꣳसर्वंभूतंप्रतिष्ठितमेतामेवनातिशीयंते ॥ २ ॥

तआह ॥ **गायतिचत्रायतेचेति** । निखिलवेदानुच्चारयति त्रायतेचजगदितिगायत्रीत्यर्थः । एतेनवर्णसमावेशेरूढ
गायत्रीपदस्यकथंयोगेनापहारइति निरस्तं । वाचनिकयोगस्याज्ञरूढितोबलवत्त्वस्यकंपनादित्यत्रसिद्धत्वात् । तदुक्तंसूत्रे
छंदोभिधानादित्यादौ ॥ १ ॥ यावैसाप्रसिद्धागायत्रीगायत्रीनामाहरिः । इयमेवसा । याइयंपृथिवी पृथुत्वहेतुनापृथिवी
नामापृथिव्यांस्थितःस्त्रीरूपः पीतवर्णोहरिः सापृथिवीइयमेव । गायत्रीनामकोभगवानेव । नमात्रयापितद्रूपयोर्भेदोस्तीत्येव ॥ ४० ॥
कारार्थः । कुतोस्यपृथिवीपदनिर्दिष्टस्यब्रह्मतेत्यतस्तांल्लिंगद्वयादितिभावेनलिंगद्वयमाह॥ **अस्यामिति** । पृथिव्यांपृथिवीनाम्नि

हरौइदं प्रमाणप्रमितं सर्वं भूतं जगत् प्रतिष्ठितं तदधीनसत्ताप्रवृत्तिप्रतीत्यादिमत् । एतेन पूर्वत्रभूतपदस्यमत्स्याद्यवतारार्थकत्वादिहजगदर्थत्वस्वीकारेप्रकृतत्यागाप्रकृतस्वीकारौस्यातामितिनिरस्तं । उपजीवकत्वश्रवणरूपबाधकेनप्रकृतत्यागस्यादोषत्वात् । एतामेव पृथिवीमेव पृथिवीनामकंहरिं नातिशीयंते केपिनातिशेरते। अयमेवसर्वातिशायीसर्वोत्तमइतियावत् ॥ सर्वाश्रयत्वसर्वोत्तमत्वलिंगद्वयात्पृथिवीनामाहरिरेवेतिभावः ॥ २ ॥ यावैसाप्रसिद्धापृथिवीपृथिवीनामाहरिःसाइयमेव । यदिदमस्मिन्पुरुषेजीवेअंतःशरीरं शंरूपत्वरतिरूपत्वजगत्प्रेरणहेतुभिःशरीरनामादेहांतःपुरुषशब्दितंजीवमभिव्याप्यस्थितः

यावैसापृथिवीयंवावसायदिदमस्मि(न्नंतः)न्पुरुषेशरीरमस्मिन्हीमेप्राणाःप्रतिष्ठिताएतदेवनातिशीयं ॥ ३ ॥ ते(तद्वाएत)यद्वैतत्पुरुषेशरीरमिदंवावतद्यदिदमस्मिन्नंतःपुरुषेहृदयमस्मिन्हीमे प्राणाःप्रतिष्ठिताएतदेवनातिशीयंते ॥४॥ सैषाचतुष्पदाषड्विधागायत्रीतदेतदृचाभ्यनू(भ्यु)क्तं ॥५॥

योयंवर्तते इयमेवसा अयमेवसः पृथिवीशब्दितइत्यर्थः । शरीरशब्दितस्यविष्णुत्वेपूर्ववदेवलिंगद्वयमाह ॥ अस्मिन्निति । शरीरशब्दिते । प्राणाइंद्रियाणिप्राणादिवायवश्च ॥ ३ ॥ हरेर्जीवहृदयाधिष्ठितत्वंतन्नामकत्वंचाह ॥ (यद्वैतदिति) तद्वाएतदिति। पुरुषे जीवे । जीवंव्याप्यस्थितंशरीरनामकंभगवद्रूपमंतःपुरुषे जीवांतर्हृदयं हृद्ययतेतिष्ठतीतिव्युत्पत्त्याहृदयनामकंहृदयस्थंहरेरूपं तदिदमेवेतियोजना । हृदयनाम्नोविष्णुत्वेपिलिंगद्वयमाह ॥ अस्मिन्निति ॥ ४ ॥ एवंगायत्रीभूतवाक्पृ

थिवीशरीरहृदयलक्षणषड्विधत्वमुतदनुवदंश्चतुर्विधत्वमाह ॥ सैषेति । सैषाषड्विधागायत्रीचतुष्पदा । आत्मनासहषड्रू पोगायत्रीशब्दितहरिश्चतुष्पदा पादचतुष्टयोपेता इतियोजना । छांदसत्वाट्टाबृचीतिसूत्रेऋचीत्युक्तमनादृत्यचतुष्पदेतिटा बेवकृतः । प्रतिज्ञातंचतुष्पात्त्वंव्यनक्ति ॥ तदेतदिति । गायत्रीनाम्नोहरेश्चतुष्पात्त्वंऋचाअभिसम्यगुक्तं ॥ ५ ॥ तदाह ॥ तावानिति । अस्य पुरुषस्य सहस्रशीर्षत्वादिनापूर्वोक्तोमहिमा तावान् । काकुस्वरत्वादेतावानेवनभवतीत्यर्थः । किंतुततो ज्यायांश्चपूरुषः । ज्यायस्त्वमेवाह ॥ पादइति । अस्यपुरुषनाम्नोहरेःसर्वासर्वाणि भूतानिजीवचेतनानिएकःपादः । अस्य

तावानस्यमहिमाततोज्याया ँश्चपूरुषः । पादोऽस्यसर्वाभूतानित्रिपादस्यामृतंदिवीति ॥ ६ ॥
यद्वैतद्ब्रह्मेतीदंवावतद्योयंबहिर्धापुरुषादाकाशोयोवैसबहिर्धापुरुषादाकाशः ॥ ७ ॥

त्रिपात्अमृतं । पादत्रयंनारायणवासुदेववैकुंठनामकं । दिवि द्योतमानतया । चित्प्रकृत्यात्मकत्वेनवालक्षयोजनांतरिक्षलो कादुपरिस्थिततयावा द्युशब्दिते श्वेतद्वीपानंतासनवैकुंठनामकेंदिवि क्रमात्तिष्ठतीत्यर्थः । तदाहसूत्रे । भूतादिपादव्यपदे शोपपत्तेश्चैवमिति । एतेनपुरुषसूक्तोक्तोगायत्रीपदोक्तश्चैकइतिदर्शितं । अन्यथासंगतेः ॥ ६ ॥ प्रकारांतरेणगायत्रीनाम्नो हरेश्चतुष्पात्त्वमाह ॥ यद्वैतदिति । यद्वेतिपक्षांतरे । एतत् गायत्र्याख्यंरूपंब्रह्म । सर्वगतरूपात्मकमित्यर्थः । सएकःपादो गायत्रीनाम्नइत्यर्थः । इदंसर्वगतंब्रह्मवावसर्वगतंब्रह्मैव पुरुषात्जीवात् । बहिर्धाबहिः । शरीरहृदयाकाशःहृदयाकाशगतआ काशनामायोयंवर्ततेअयंतत्सइत्यर्थः । सद्वितीयपादइतिज्ञेयं । एतस्यजीवांतर्व्यापिरूपाभेदमाह । योयंबहिर्धेति । योयंबहिर्धा पुरुषात्शरीरहृदयाकाशगतआकाशनामाअयंवावसः ॥ ७ ॥ सकःयोयमंतःपुरुषेजीवांतःस्थिताकाशगतआकाशनामाजीवां तर्व्याप्तोस्तिसइत्यर्थः । सतृतीयपादोगायत्रीनाम्नः । तस्यचतुर्थपादस्थानीयजीवचैतन्यहृदयाकाशगतेनाभेदमाह ॥ यइति । योवैसोंतःपुरुषआकाशःपुरुषांतर्व्याप्यस्थितआकाशनामाहरिर्योवर्ततेअयंवावसः । सकःसोयमंतर्हृदयआकाशः । जीवहृद यांतर्वर्त्याकाशगतःआकाशनामायोवर्ततेअयंसइत्यर्थः । एवंवाचतुष्पात्त्वमितियद्वेत्यस्यार्थः । मंत्रोक्तचतुष्पात्त्वपक्षेजीवःभि

अयंवावसयोयमंतःपुरुषआकाशोयोवैसोंतःपुरुषआकाशः ॥ ८ ॥ अयंवावसयोयमंतर्हृदयआ
काशोयोवैसोंतर्हृदयआकाशस्तदेतत्पूर्णमप्रवर्तिपूर्णामप्रवर्तिनी ँश्रियंलभेतयएवंवेद ॥ ९ ॥ १२ ॥

न्नपादः । पादत्रयंतुस्वरूपात्मकमितिवैरूप्यं । अस्मिन्पक्षेतुसर्वगतजीवशरीरहृदयाकाशगतजीवांतर्व्याप्यस्थितजीवचैतन्यहृ दयाकाशगतरूपचतुष्टयस्यापिस्वरूपात्मकपादत्वमितिसारूप्यं ॥ ८ ॥ एवंषड्विधत्वादिनानिरूपितस्यहरेःस्वरूपमाह ॥ तदे तदिति । तदेतत् षड्विधत्वादिनोक्तंभगवद्रूपं पूर्णं अप्रवर्ति । अन्यैर्नप्रवर्त्यतइत्यप्रवर्ति । स्वतंत्रमितियावत् । ज्ञानिनःफ लमाह ॥ पूर्णामिति । पूर्णांभगवदन्याप्रवर्तिनींश्रियंलभतेयोधिकारीब्रह्माएवमुक्तरूपेणगायत्र्याख्यंरूपंवेदेति ॥९॥१२॥

यदिदमस्मिन्नंतःपुरुषेहृदयमिति योयमंतर्हृदयआकाशइतिच हृत्पुरगतत्वेनप्रकृतस्यहरेरुपास्तिंतत्पुरद्वारपमहिमोपास्तिफला
नामुक्त्याह ॥ तस्येति । तस्यैतस्यभगवदधिष्ठितहृदयस्य पंचदेवसुषयो देवनिर्गमद्वाराणि । क्रमेणपंचद्वाराणिद्वारपांश्चा
ह ॥ सयइति । सप्रसिद्धोयोस्यहृदयस्यप्राक्सुषिः पूर्वद्वारं । सःतद्वारपःप्राणः श्वासवायुमानी । सोपिकइत्यतआह ॥
तच्चक्षुरिति । विधेयापेक्षयातदितिनपुंसकं । एवमग्रेपि । तत् सप्राणमानीचक्षुश्चक्षुरभिमानीसोपिकःआह ॥ सचक्षुर्मानी ॥

**तस्यहवाएतस्यहृदयस्यपंचदेवसुषयःसयोस्यप्राङ्सुषिःसप्राणस्तचक्षुः सआदित्यस्तदेतत्तेजो
न्नाद्यमित्युपासीततेजस्व्यन्नादोभवतियएवंवेद ॥१॥ अथयोस्यदक्षिणःसुषिःसव्यानस्तच्छ्रोत्रं
सचंद्रमास्तदेतच्छ्रीश्चयशश्चेत्युपासीतश्रीमान्यशस्वीभवतियएवंवेद ॥ २ ॥ अथयोस्यप्रत्यङ्सु
षिःसोपानःसावाक्सोग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्यमित्युपासीतब्रह्मवर्चस्व्यन्नादोभवतियएवंवेद॥३॥**

आदित्यइति । तदेतत् तमेतं प्राणचक्षुर्मान्यादित्यंपूर्वद्वारपं तेजोन्नाद्यं तेजोन्नाद्यभिमानीत्युपासीत । तदुपास्तेःफलमा
ह ॥ तेजस्वीति । व्यक्तोर्थः ॥ १ ॥ अथेत्यर्थांतरे । अस्यहृदयस्ययोदक्षिणःसुषिःदक्षिणद्वारं सतद्वारपः व्यानः व्यानाख्य
वाय्वभिमानी । श्रोत्रमानीच । सचंद्रमाःतदेतत् तमेतं व्यानश्रोत्रमानिनं दक्षिणद्वारपं । श्रीःलावण्यरूपः । दिगंतव्याप्त
कीर्तिमानित्युपासीत । तत्फलोक्तिःश्रीमानित्यादि ॥ २ ॥ अथेत्यादिवाक्यत्रयस्यैवंयोजना । प्रत्यक्सुषिःपश्चिमद्वारं । सो

पानः तद्द्वाराधिपोपानवाय्वभिमानी । वाक्वागिंद्रियमानी । तदेतत् तमेतं । अपानवागभिमानिनंपश्चिमद्वारपमग्निं । ब्रह्मवर्चसंवेदलभ्यतेजोमानीअन्नाद्यमानीत्युपासीत । तत्फलोक्तिर्ब्रह्मवर्चस्वीतिछांदसःसमासांताभावः ॥३॥ उदक्सुषिः उत्तरदिगवस्थितद्वारं । तत्समानःतदधिपःसमानवायुमानीमनोभिमानीच । पर्जन्यःपर्जन्यनामेंद्रः । तदेतत् तमेतं । समानमनोमानिनंउत्तरद्वारपमिंद्रं । कीर्तिः पुरस्तुत्यकीर्तिमान् । व्युष्टिरैश्वर्यवानित्युपासीत । कीर्तिमानित्यादिफलोक्तिः ॥ ४ ॥ ऊर्ध्वः

अथयोस्योदङ्सुषिःससमानस्तन्मनःसपर्जन्यस्तदेतत्कीर्तिश्चव्युष्टिश्चेत्युपासीतकीर्तिमान्व्युष्टिमान्भवतियएवंवेद ॥ ४ ॥ अथयोस्योर्ध्वःसुषिःसउदानःसवायुःसआकाशस्तदेतदोजश्चमहश्चेत्युपासीतौजस्वीमहस्वान्भवतियएवंवेद ॥ ५ ॥ तेवाएतेपंचब्रह्मपुरुषाःस्वर्गस्यलोकस्यद्वारपाःसयएतानेवंपंचब्रह्मपुरुषान्स्वर्गस्यलोकस्यद्वारपान्वेदास्यकुलेवीरोजायतेप्रतिपद्यतेस्वर्गंलोकंयएतानेवंपंचब्रह्मपुरुषान्स्वर्गस्यलोकस्यद्वारपान्वेद ॥ ६ ॥

सुषिः उपरितनंद्वारं । सऊर्ध्वद्वारपःउदानः उदानवायुमानी उन्नतेरुदाननामायःसवायुर्मुख्यवायुः । आकाशःसर्वज्ञत्वादाकाशनामा । तदेतत् तमेतमूर्ध्वद्वारपंउदानमानिनंमुख्यवायुंओजःऊर्जितःमहश्चपूर्णश्चेत्युपासीतओजस्वीऊर्जितःमहस्वान्पूर्तिमान् ॥ ५ ॥ तेवाएतेसूर्यचंद्राग्नींद्रमुख्यवायवः । अध्यात्माधिदेवगताःपंचब्रह्मपुरुषाःहृदयस्थब्रह्मणोद्वारपाःस्वर्ग

लोकस्यविष्णुलोकस्यचद्वारपाः । जयविजयादयोबहिर्द्वारपाःसूर्यादयोंतर्द्वारपाःइतिज्ञेयं । स्वर्गद्वारपज्ञानिनःफलमाह ॥ सइति । सप्रसिद्धो योधिकारी । अस्य ज्ञानिनः । वीरः सुसंततिर्जायते । पुनर्यएतानित्युक्तिःस्वर्गलोकंप्रतिपद्यतइतिविष्णुलोकप्राप्तिरूपफलोक्त्यर्था ॥ ६ ॥ त्रिपादस्यामृतंदिवीतिद्युस्थस्य योयमंतर्हृदयआकाशइत्युक्तहृदयगतस्यचभेदधीनिरासायइदंवावतदित्यादिनाऐक्यंवक्तुं द्युस्थतयाप्रागुक्तमनुवदति ॥ अथेति । अर्थांतरे । यत्यद्रूपत्रयंनारायणवासुदेववैकुंठनामकंश्वेतद्वीपानंतासनवैकुंठाख्यंद्युस्थिततत्वेनोक्तं तदितिशेषः । तद्रूपत्रयं । अतोदिवः पृथिव्यांद्यौरित्यादिप्रमाणेन

अथयदतःपरोदिवोज्योतिर्दीप्यतेविश्वतःपृष्ठेषुसर्वतःपृष्ठेष्वनुत्तमेषूत्तमेषुलोकेष्विदंवावतद्यदिदमस्मिन्नंतःपुरुषेज्योतिस्तस्यैषादृष्टिः ॥ ७ ॥

द्युशब्दार्थत्वेनप्रसिद्धात्मेरुसूर्यमंडलेंद्रसदनाख्यलोकत्रयात् । क्रमात्परःउपरितनस्थंसत्ज्योतिःशब्दितंनारायणादिरूपत्रयंदीप्यतेप्रकाशमानमास्ते ।कुत्रेत्यतआह ॥ सर्वतइति । सर्वतः सर्वलोकेभ्यः । पृष्ठेषून्नतेषु । विश्वतःविश्वेभ्यः। मेरुवैजयंतसत्यलोकाख्यब्रह्मसदनेभ्यः। पृष्ठेषूच्चेषुअनुत्तमेषूत्तमांतररहितेषु। उत्तमेषु श्वेतद्वीपानंतासनवैकुंठेषु । दीप्यतइतिपूर्वेणान्वयः । एवंद्युस्थमेवरूपत्रयंकयाचिद्विवक्षयाद्युपरत्वेनानूद्याधुनातद्रूपत्रयस्यहृद्गतरूपेणाभेदमाह ॥ इदमिति । इदं प्रागुक्तं ॥ ४३ ॥

ज्योतिःशब्दितंरूपत्रयंतत्वावतदेव । तत्किं यदिदमस्मिन्नंतःपुरुषेजीवहृदयांतर्वर्तमानंज्योतिस्तदेवेत्यर्थः । तदेवज्योतिर्हृद्गत मित्यत्रस्पर्शनश्रवणेप्रमाणयति ॥ तस्येति । तस्यपुरुषांतःप्राणाग्नौस्थितस्यज्योतिराख्यहरेरेषादृष्टिःतद्विषयकमेतत् । प्रत्यक्ष दर्शनं ॥७॥ किंतद्दर्शनमित्यतआह ॥ यत्रेति । यस्मिन्नस्मिन्शरीरेहस्तसंस्पर्शेनोष्णिमानमौष्ण्यंविजानातीत्येतदेवदृष्टिशब्दि तंतस्यदर्शनमित्यर्थः । तस्येतिकर्मणिषष्ठी । हृद्गतस्यज्योतिराख्यहरिविषयिणीप्राणेनक्रियमाणाएषाश्रुतिरूपाश्रुतिःघोषः । सा

यत्रैतदस्मिञ्छरीरेसंस्पर्शेनोष्णिमानंविजानातितस्यैषाश्रुतिर्यत्रैतत्कर्णावपिगृह्यनिनदमिवन दथुरिवाग्नेरिवप्रज्वलतउपशृणोतितदेतद्दृष्टंचश्रुतंचेत्युपासीतचक्षुष्यःश्रुतोभवतियएवंवेदयए वंवेद ॥ ८ ॥ १३ ॥

केत्यतआह ॥ यत्रेति । यत्र यदा । एतत् एतांश्रुतिं । कर्णावपिगृह्य हस्ताभ्यांपिधाय वर्तमानइतिशेषः । उपशृणोतिकथमिव । नि नदमिवसमुद्रघोषमिव । नदथुरिव मेघघोषमिव प्रज्वलतोग्नेःशब्दमिवेति । तदेतत्हृदयाकाशगतं । ज्योतीरूपंब्रह्मदृष्टंचश्रुतंचे त्युपासीत । कुतः यएवंवेद दृष्टत्वादिरूपेणवेद उपास्तेजानातिचापरोक्षतःसचक्षुष्यःदिव्यचक्षुष्मान्चक्षुषिब्रह्मण्येवयातीतिच क्षुष्यइत्यर्थः । श्रुतःकीर्तिमांश्चभवति । मुक्तोभवतीतियावत् । अतःउपासीतेति । द्विरुक्तिर्विद्यासमाप्त्यर्था । तात्पर्यज्ञस्य

र्थावेति ॥ ८ ॥ १३ ॥ हृद्गतोपास्तिप्रकारपूर्वंइदंवावतद्यदिदमस्मिन्पुरुषेज्योतिरितिहृद्गतेनबहिष्ठस्यैक्यमुक्तं । तदयुक्तं हृद्ग तस्याणुत्वाद्बाह्यस्यमहत्त्वादणुमहतोरैक्यायोगादित्यतोहृद्गतेमहत्त्वस्यापिसत्त्वादैक्यमुक्तमितिभावेनाह ॥ **सर्वमिति** । स र्वांतःस्थितत्वेनातिसामीप्यादिदमित्युक्तंविष्णवाख्यंब्रह्म । सर्वं गुणपूर्णं । खलु प्रसिद्धं । तद्ब्रह्मजलान् जलेप्रलयोदके अ निति चेष्टमानंआस्त इतिशांतोधिकारी उपासीत विद्यात् । कुतएवंज्ञेयमित्यतोज्ञानाधीनशुभप्राप्तिमत्त्वात्जीवस्यतज्ज्ञान मावश्यकमित्याह ॥ **अथेति** । पुरुषोजीवः । क्रतुमयः । ज्ञानप्रधानः । तद्व्यनक्ति ॥ **यथेति** । यथाक्रतुर्यादृशभगवद्विष

सर्वंखल्विदंब्रह्मतज्जलानितिशांतउपासीताथखलुक्रतुमयःपुरुषोयथाक्रतुरस्मिँल्लोकेपुरुषोभव तितथेतःप्रेत्यभवतिसक्रतुंकुर्वीत ॥ १ ॥ मनोमयःप्राणशरीरोभारूपःसत्यसंकल्पआकाशआ त्मासर्वकर्मासर्वकामःसर्वगंधःसर्वरसःसर्वमिदमभ्यात्तोऽवाक्य(क्यो)नादरः ॥ २ ॥

यकनिश्चयवान् । अस्मिन्लोकेपुरुषोभवति । मृतिकालेतथातदनुरूपः । इतोलोकाद्देहात्प्रेत्यनिर्गत्यभवतियतोथतस्मात्क्र तुंभगवद्विषयज्ञानं । सोधिकारीकुर्वीत संपादयेदित्यर्थः ॥ १ ॥ प्रकारांतरेणहरेर्ज्ञानसंपादनमाह ॥ **मनोमयइति** । म नोमयःपूर्णज्ञानः । प्राणशरीरः भारूपः प्रकाशरूपः । सत्यसंकल्पोऽबाधितसंकल्पः । आसमंतात्काशतेदीप्यतइत्याकाशः । सर्वकर्मा सर्वकरणशक्तिरूपः । सर्वकामः सर्वविषयेच्छावान्सर्वगंधः सर्वशुभगंधरूपः । सर्वरसः सर्वशुभरसरूपः । सर्वमि

दंजगत्अभ्यातः प्राप्तः । अवाक्यः लौकिकइवनिरर्थकवाक्यरहितः । अनादरः आत्मसंभावनारहितः । अवाक्यनादरइ तिपाठेअवाक्यश्चासौनादरइतिविग्रहः । उक्तएवार्थः ॥ २ ॥ महताबाह्यरूपेणैक्यघटनायाणुत्वमनुवदन्महत्त्वमाह ॥ एष मइत्यादिना लोकेभ्यइत्यंतेन । ज्यायान्वृद्धतमःपृथिव्यादितोप्यधिकपरिमाणवानित्यर्थः ॥ ३ ॥ पूर्वंसर्वगंधइतिचि दानंदाद्यात्मकसर्वगंधादिमत्त्वमुक्तं । पुनरत्रसर्वकर्मेत्याद्युक्तिस्तद्धोकृत्वमप्यस्तीतिवक्तुमितिसर्वमभ्यात्तइत्युक्तिरादरार्था ।

एषमआत्मांतर्हृदयेणीयान्व्रीहेर्वायवाद्वासर्षपाद्वाश्यामाकाद्वाश्यामाकतंडुलाद्वैषमआत्मांतर्हृदयेज्यायान्पृथिव्याज्ज्यायानंतरिक्षाज्ज्यायान्दिवोज्यायानेभ्योलोकेभ्यः ॥ ३ ॥ सर्वकर्मासर्वकामःसर्वगंधःसर्वरसःसर्वमिदमभ्यात्तोऽवाक्यनादरएषमआत्मांतर्हृदयएतद्ब्रह्मैतमितःप्रेत्याभिसंभवितास्मीतियस्यस्यादद्धानविचिकित्सास्तीतिहस्माहशांडिल्यःशांडिल्यः ॥ ४ ॥ १४ ॥

मेअंतर्हृदयेस्थितआत्मा एष उक्तज्यायस्त्वादिकः । एतद्ब्रह्म । बहिर्व्याप्तभगवद्रूपमित्यर्थः । उक्तरूपेणभगवज्ज्ञानमापादितवतोभगवत्प्राप्तिरूपफलमाह ॥ एतमिति । इतःप्रेत्य एतंभगवंतमभिसंभवितास्मि प्राप्तास्मीत्यद्धानिश्चयोयस्यस्यात्तत्र विचिकित्सासंशयोयस्यनास्तिसयाति पुरुषोत्तममितिशेषः । इतिहस्माहशांडिल्यः द्विरुक्तिरुक्तार्था । एतेनमइतिशांडिल्यस्य

वचनमितिज्ञायते ॥ ४ ॥ १४ ॥ एतेभ्योलोकेभ्योज्यायानितिभगवान्महानित्युक्तंतद्ध्योकाशवदशरीरइतिधीनिरासायवि ग्रहेणमहानित्याह ॥ **अंतरिक्षोदरइति** । कोशः कंसुखंउशइच्छा । आनंदेच्छारूपत्वात्कोशइत्युक्तोभगवानंतरिक्षोदरः बहुव्रीहिः । भूमिबुध्नःभूमिःपृथिवीपादबुध्नयोःपादोपरिभागयोः यस्यसभूमिबुध्नः । नजीर्यतिनित्यमजरः । अस्यकोशस्यस्र क्तयोबाहवःदिशः धर्मज्ञानादिदेशनाद्दिङ्नामानोदिगाश्रयाइत्यर्थः । अस्यकोशस्यद्यौरुत्तरंबिलं शिरोविवरं । वसवोदेवा

अंतरिक्षोदरःकोशोभूमिबुध्नोनजीर्यतिदिशोह्यस्यस्रक्तयोद्यौरस्योत्तरंबिलंसएषकोशोवसुधान
स्तस्मिन्विश्वमिदꣳश्रितं ॥ १ ॥ तस्यप्राचीदिक्जुहूर्नामसहमानानामदक्षिणाराज्ञीनामप्रती
चीसुभूतानामोदीचीतासांवायुर्वत्सःसयएतमेवंवायुंदिशांवत्संवेदनपुत्ररोदꣳरोदितिसोहमेत
मेवंवायुंदिशांवत्संवेदमापुत्ररोदꣳरुदं ॥ २ ॥

धीयंतेत्रेतिवसुधानः । सएषकोशोहरिर्देवानांनिधानं । तस्मिन्हरौसर्वमिदंजगत्श्रितं ॥ १ ॥ स्रक्तयोदिशइत्युक्तं । तत्रको भुजःकिंदिक्प्रवर्तकः किन्नामकश्चेत्यतआह ॥ **तस्येति** । तस्यकोशाख्यस्यहरेःप्राचीदिक् पूर्वदिगाश्रयःप्राचीनामाप्राक्दि क्स्थितः । दक्षिणोर्ध्वबाहुःजुहोति हुदानादनयोः । अनेनभुङ्क्तइतिवा । चक्रेणशत्रून्जुहोतिसंहरतीतिवाचक्रधरोजुहू रित्युच्यते । नामप्रसिद्धंदक्षिणा दक्षिणदिक्स्थितादक्षिणाधरस्रक्तिःसहमाना । मानंवेदरूपंप्रमाणंतदात्मकशंखोमान

शब्दार्थः । मानेनशंखेनसहितासहमानेत्युच्यते । प्रतीची प्रतीच्यांस्थितावामोर्ध्वस्रक्तिः राज्ञी राजीयुक्तगदायुक्तत्वा द्राज्ञीत्युक्ता । नामप्रसिद्धं । उदीची उत्तरदिगवस्थितावामाधरस्रक्तिः सुभूता भूत(ति)शब्दितलक्ष्म्याश्रितपद्मोपेत त्वात्सुभूतेत्युच्यते । नामप्रसिद्धं । तासांदिङ्नामिकानांदिगाश्रयस्रक्तीनां वायुःमुख्यप्राणोवत्सःपुत्रः । तज्ज्ञानिनःफल माह ॥ **सयइति** । योधिकारी एतमेवमुख्यवायुंदिशांवत्संवेद स नपुत्ररोदंरोदिति पुत्रोभूत्वारोदनंनकरोति मुक्तो भवतीत्यर्थः । एवंज्ञात्वाताद्दशफलभाक्कश्चिदस्तिकिमित्यतोस्तीत्याह ॥ **सोहमिति** । सोहमेतमेवंवायुंदिशांवत्संवे

अरिष्टंकोशंप्रपद्येऽमुनाऽमुनाऽमुनाप्राणंप्रपद्येमुनाऽमुनाऽमुनाभूःप्रपद्येऽमुनाऽमुनाऽमुनाभुवः
प्रपद्येऽमुनाऽमुनाऽमुनास्वःप्रपद्येऽमुनाऽमुनाऽमुना ॥ ३ ॥ सयदवोचंप्राणंप्रपद्यइतिप्राणोवाइ
दꣳसर्वंभूतंयदिदंकिंचतमेवतत्प्रापत्सि ॥ ४ ॥

दजानामि । अतःपुत्ररोदंमारुदं पुत्रोभूत्वारोदनंनाकरवं । अनादिकालतोमुक्तएवाभूवं ॥ २ ॥ अरिष्टंअविनष्टंकोशं आनंदेच्छारूपंहरिंप्रपद्ये प्राप्तवानभूवं । किंस्वसामर्थ्येननेत्याह । अमुनाभगवता तत्प्रसादेनेतियावत् । त्रिरुक्तिःकेवलंतत्प्रसा देनैवनतुमत्प्रयत्नेनेतिसूचयितुं । एवमग्रेपि । प्राणं सर्वप्रणेतारंवासुदेवं ॥ ३ ॥ प्राणंप्रपद्यइत्यादिवाक्यचतुष्टयंस्वयमेववि वृणोति ॥ **सइति** । सोहमित्यनुषंगः । प्राणंप्रपद्यइतियदवोचंयदिदंकिंचभूतंप्रभूतंमत्स्याद्यवतारजातं इदंसर्वंप्राणोवै प्रा

णशब्दितवासुदेवोवै । तत् तस्मात्तमेवमत्स्याद्यवतारात्मकंप्राणमेवप्राप्स्यथ । हेजनाइत्युवाचलक्ष्मीरितिशेषः । साहमिति
वक्तव्येसोहमितिपुल्लिंगोक्तिःपुंशक्तियुक्तत्वादितिज्ञेयं ॥ ४ ॥ अथेतिवाक्यांतरव्याख्यानारंभे । एवमग्रेपि । ज्ञानेनभूषयतीति
व्युत्पत्त्याभूर्नामकंसंकर्षणंप्रपद्यइतियदवोचं ततपृथिवींस्वात्मप्रथनहेतुनापृथिवीनामकंपृथिवीस्थितं अंतरीक्ष्यतइत्यंतरिक्षना
मकंअंतरिक्षगतं क्रीडाकरत्वेनद्युनामकं प्रपद्येइत्येवावोचं ॥५॥ भावयत्युत्पादयतिजगदितिभुवर्नामकं प्रद्युम्नंप्रपद्यइतियदवो

अथयद्वोचंभूःप्रपद्यइतिपृथिवींप्रपद्येंतरिक्षंप्रपद्येदिवंप्रपद्यइत्येवतद्वोचं ॥ ५ ॥ अथयद्वोचंभु
वःप्रपद्यइत्यग्निंप्रपद्येवायुंप्रपद्यआदित्यंप्रपद्यइत्येवतद्वोचं ॥ ६ ॥ अथयद्वोचंस्वःप्रपद्यइत्यृग्वेदं
प्रपद्येयजुर्वेदंप्रपद्येसामवेदंप्रपद्यइत्येवतद्वोचंतद्वोचं ॥ ७ ॥ १५ ॥

पुरुषोवावयज्ञस्तस्ययानिचतुर्विंशतिवर्षाणितत्प्रातःसवनंचतुर्विंशत्यक्षरागायत्रीगायत्रंप्रातः
सवनंतदस्यवसवोन्वायत्ताःप्राणावाववसवएतेहीदꣳसर्वंवासयंति ॥ १ ॥

चंततवह्नौहुतमत्तीत्यग्निनामानमग्निगतं वात्यायुश्चेतिवायुनामकंवायुगतं आददात्यायुरित्यादित्यनामकंआदित्यस्थं प्रपद्येइ
त्येवावोचमित्यर्थः ॥ ६ ॥ परानंदस्वरूपत्वहेतुनास्वर्नामकमनिरुद्धंप्रपद्यइतियदवोचंतत् ऋचंज्ञानंवेदयतइतिऋग्वेदनाम
कंऋग्वेदगतं यज्ञंवेदयतइतियजुर्वेदाख्यंयजुर्वेदगतं साम्यंवेदयतइतिसामवेदाख्यंसामवेदगतं प्रपद्येइत्येवावोचमित्युवाच ॥ ४६ ॥
लक्ष्मीरिति ॥ ७ ॥ १५ ॥ अनेकाःउपास्तयउक्ताःवक्ष्यंतेच तासामनुष्ठानमायुषःक्षणिकत्वात् स्थायिचेदपितस्यरोगोपहत

त्वादशक्यमित्यतःआयुर्वृद्ध्यर्थंरोगपरिहारार्थंचपुरुषयज्ञरूपामुपास्तिमाह ॥ **पुरुषोवावयज्ञइत्यादिना** । पुरुषो जीवः यज्ञःभगवत्पूजार्थयज्ञः । विष्णुपूजार्थयज्ञोहमित्युपासीतपुरुषइत्यर्थः । पुरुषस्ययज्ञत्वेकानिसवनानीत्यतआह ॥ **तस्यया नीत्यादिना** । पुरुषस्यायुर्बार्हस्पत्यादिमानभेदेनवा द्वापरादियुगभेदेनवाषोडशोत्तरशतसंख्याकंभवति । तत्रयानितस्य पुरुषयज्ञस्यपूर्वंचतुर्विंशतिवर्षाणि तत् तानि प्रातःसवनं। कथंपूर्ववयसःप्रातःसवनतेत्यतःसवनेजप्यऋगक्षरसाम्यादित्याह ॥ **चतुर्विंशत्यक्षरेति** । ततःकिमित्यतआह ॥ **गायत्रमिति** । प्रातस्सवनंगायत्रीच्छंदस्कमंत्रोपेतं । तद्देवताआह ॥ **तद**

तंचेदेतस्मिन्वयसिकिंचिदुपतपेत्सब्रूयात्प्राणावसवइदंमेप्रातःसवनंमाध्यंदिनꣳसवनमनुसंतनु तेतिमाहंप्राणानांवसूनांमध्येयज्ञोविलोप्सीयेत्युद्धैवततएत्यगदोहभवति ॥ २ ॥

स्येति । तस्यास्य चतुर्विंशतिवर्षरूपप्रातस्सवनस्यवसवोन्वायत्ताः अधिष्ठातारोदेवताइतियावत् । तथाचतैत्तिरीयश्रुतिः । वसुमद्गणस्यसोमदेवतेतिमतिविदःप्रातःसवनस्यगायत्रच्छंदसइत्यादि । केवसवइत्यतआह ॥ **प्राणावा(व)वसवइति** । कथंवसुत्वमित्यतआह ॥ **एतेहीति** । प्राणाहीदंप्राणिजातं(ए)तस्मिन्वयसि प्रातस्सवनाख्येवासयंतीतिवासनहेतुतयापुरु षयज्ञेप्राणावसवइत्यर्थः ॥ १ ॥ तंचेत्विष्णुपूजार्थयज्ञरूपंपुरुषं । एतस्मिन्प्रातस्सवनरूपचतुर्विंशतिवर्षमध्येवयसिकिंचि ज्ज्वरादिकंउपतपेत्बाधेत । तदासपुरुषोब्रूयात्प्रार्थयीत । हेप्राणावसवइदंमेप्रातःसवनं प्रातःसवनरूपंप्रथमंवयः । **माध्यं**

दिनंसवनंअनुसंतनुत तावत्पर्यंतंनयत । अहंप्राणानांवसूनांमध्येयज्ञो भगवद्यज्ञरूपोहं माविलोप्सीय लुप्तोमाभूवमितिब्रू
यादित्यन्वयः । एवंप्रार्थनेकिंभवतीत्यतआह ॥ अद्धैवेति । ततः ज्वरादितः एति उद्गतोभवति । अद्धैव सत्यमेव । तच्च

अथयानिचतुश्चत्वारिंशद्वर्षाणितन्माध्यंदिनꣳसवनंचतुश्चत्वारिंशदक्षरात्रिष्टुप्त्रैष्टुभंमाध्यंदिन
ꣳसवनंतदस्यरुद्राअन्वायत्ताःप्राणावावरुद्राएतेहीदꣳसर्वꣳरोदयंति ॥ ३ ॥ तंचेदेतस्मिन्वयसि
किंचिदुपतपेत्सब्रूयात्प्राणारुद्राइदंमेमाध्यंदिनꣳसवनंतृतीयंसवनमनुसंतनुतेतिमाहंप्राणानांरु
द्राणांमध्येयज्ञोविलोप्सीयेत्युद्धैवततएत्यगदोहभवति ॥ ४ ॥ अथयान्यष्टाचत्वारिꣳशद्वर्षा
णितत्तृतीयसवनमष्टाचत्वारिंशदक्षराजगतीजागतंतृतीयसवनंतदस्यादित्याअन्वायत्ताःप्राणा
वावआदित्याएतेहीदꣳसर्वमाददते ॥ ५ ॥ तंचेदेतस्मिन्वयसिकिंचिदुपतपेत्सब्रूयात्प्राणाआदि
त्याइदंमेतृतीयसवनमायुरनुसंतनुतेतिमाहंप्राणानामादित्यानांमध्येयज्ञोविलोप्सीयेत्युद्धैवतत
एत्यगदोहैवभवति ॥ ६ ॥

नक्ति अगदःअरोगोभवति ॥ २ ॥ अथानंतरं यानिचतुश्चत्वारिंशद्वर्षाणि तस्येत्यनुषंगः । पूर्ववद्योजना । त्रैष्टुभं त्रिष्टुप्छं
दस्कऋग्युक्तं ॥ ३ ॥ ४ ॥ अथयान्यष्टाचत्वारिंशदित्याद्यपिपूर्ववद्ध्येयं । इदंसर्वं शब्दादिविषयजातं आददते गृह्णंति ॥५॥

आयुरनुसंतनुत यावदायुस्तावन्नयत ॥ ६ ॥ यज्ञत्वेनायुरुपास्त्या निर्विघ्नमायुःप्राप्तवानस्तिकिमित्यतोस्तीत्याह ॥ एतद्धस्मे ति । महिदासनामकइतरातनयःकश्चिदृषिःएतत्पुरुषयज्ञप्रकारं वस्वादिप्रार्थनयातत्तद्वयसिप्राप्तरोगनिवर्तनंचविद्वान् जानन् । एतद्वक्ष्यमाणमाह। हेगद सत्वं मे मम एतत्‌शरीरंकिं किमर्थंउपतपसि क्लेशयसियोहमनेनतापेन नप्रेष्यामि मृतोनभविष्यामीत्याहेत्यन्वयः । सऋषिःषोडशशतवर्षमजीवत् । एतज्ज्ञानिनःफलमाह ॥ **सहेति** । योधिकारी एवमुक्तरीत्यापु

एतद्धस्मवैतद्विद्वानाहमहिदासऐतरेयःसकिंमएतदुपतपसियोहमनेननप्रेष्यामीतिसहषोडशंवर्षशतमजीवत्सहषोडशंवर्षशतंजीवतियएवंवेद ॥ ७ ॥ १६ ॥

सयदशिशिषतियत्पिपासतियन्नरमतेताअस्यदीक्षाः ॥ १ ॥ अथयदश्नातियत्पिबतियद्रमतेतदुपसदैरेति ॥ २ ॥ अथयद्धसतियज्जक्षतियन्मैथुनंचरतिस्तुतशस्त्रैरेवतदेति ॥ ३ ॥

रुषयज्ञादिवेद सःषोडशोत्तरवर्षशतंजीवति ॥ ७ ॥ १६ ॥ प्रसिद्धयज्ञेदीक्षा उपसदःस्तुतशस्त्राणि दक्षिणाचास्ति तान्यपिपुरुषयज्ञेसंतीत्याह ॥ **सयदिति** । सःभगवत्पूजार्थयज्ञरूपःपुमान् अशिशिषति भोक्तुमिच्छति । पिपासति पातुमिच्छतीतियत् नरमतइतियत् ताः विधेयापेक्षयास्त्रीत्वं । अस्यदीक्षाः ॥ १ ॥ तदुपसदैःतैरशनपानरमणरूपैरुपसदैरुपसदाख्ययजमानव्यापारैरेति ॥ २ ॥ अथहसतीतियत् जक्षतिखादतीतियत् मैथुनंचरतीतियत् यदन्यत्कृत्यंतत्करोतीतियत् तत्

तैःतदात्मकैरेव स्तुतशस्त्रैः स्तोत्रशस्त्रैरेतिवर्तते । स्तोत्रंऋगक्षरोपेतसामगानं । शस्त्रंकेवलंमंत्रपठनं ॥ ३ ॥ अथतपः
कृच्छ्रचांद्रायणादि परापरतत्त्वचिंतनंवा । आर्जवं मनोवाक्कर्मस्वैकरूप्यं इतियत्ताअस्यपुरुषयज्ञस्य दक्षिणाः ॥ ४ ॥
यत्सत्रंसत्राख्यंकर्म यत् एतत् आत्मदक्षिणंवै बहुव्रीहिः । तस्मादायुषोयज्ञसादृश्यात् प्रसिद्धयज्ञेसोष्यतिसवनंकरिष्य
ति । असोष्ट सवनमकरोदितियदाहुस्ततअस्ययजमानस्यपितृतउत्पादनं प्रथमंमातुस्सकाशात्पुनरुत्पादनमेवाहुः । अ

अथयत्तपोदानमार्जवमहिंसासत्यवचनमितिताअस्यदक्षिणाः ॥ ४ ॥ ददात्यात्मदक्षिणंवाएत
द्यत्सत्रमितितस्मादाहुःसोष्यत्यसोष्टेतिपुनरुत्पादनमेवास्यतन्मरणमेवावभृथः ॥ ५ ॥ तद्धैत
द्घोरआंगिरसःकृष्णायदेवकीपुत्रायोक्त्वोवाचापिपासएवसबभूवसोंतवेलायामेतत्त्रयंप्रतिपद्ये
ताक्षितमस्यच्युतमसिप्राणशँसितमसीतितत्रैतेद्वेऋचौभवतः ॥ ६ ॥

स्यपुरुषयज्ञस्यमरणमेवावभृथः ॥ ५ ॥ तद्धैतत्तदेतदायुर्यज्ञप्रकारं घोरनामाआंगिरसोअंगिरःपुत्रः । देवक्याख्य
स्त्रीपुत्रायकृष्णनाम्नेकस्मैचिद्विष्णववतारभिन्नायमुनयेउक्त्वा वक्ष्यमाणविष्णूपासनप्रकारंचोवाचऋषिः । अपिपासः उ
पलक्षणमेतत् । अशिशिषतीत्यादिनोक्तदीक्षादिमान्बभूवेत्यर्थः । सएवमायुर्यज्ञतयात्मानंध्यायन्पुरुषोंतवेलायांप्राणा
त्ययसमयेएतत्त्रयंवक्ष्यमाणंप्रतिपद्येतजपेत । तन्मंत्रत्रयमाह । अक्षितमसीति । भगवन्त्वमक्षितमसि अक्षयोसि । अच्यु

॥ ४८ ॥

तमसि गुणैरच्युतोसि । प्राणात्शंसितंअधिकसुखोपेतोसि । इतिप्रतिपद्येतेत्यर्थः । उक्तप्रकारेणभगवदुपास्त्यातस्यकिंभ वतीत्यतस्तदपरोक्षज्ञानंतेनतत्प्राप्तिश्चभवतीत्यभिप्रेत्याभिप्रेतार्थेद्वेऋचौप्रमाणत्वेनाह ॥ तत्रेति । भगवदुपास्त्यातदपरोक्ष ज्ञानं तेनचतत्प्राप्तिरित्यर्थद्वये क्रमादृचौप्रमाणत्वेनभवतइत्यर्थः ॥ ६ ॥ तावाह ॥ आदिदिति । आदित्प्रत्नस्यरेतसो ज्योतिष्पश्यंतिवासरं । परोयदिध्यतेदिवा । आदित् अस्मादेव भगवत्प्रसादादेव । प्रत्नस्य पुरातनस्यानादेः । रेतसो रति रूपस्यहरेर्ज्योतिः वासरंवासेनरमयतीतिहेतुनावासरशब्दितंपश्यंति । यज्ज्योतिर्दिवा दिवः । परः परतोवैकुंठे इध्यतेऋद्धत

आदित्प्रत्नस्यरेतसउद्वयंतमसस्परिज्योतिष्पश्यंतउत्तरं स्वःपश्यंतउत्तरंदेवंदेवत्रासूर्यमगन्मज्यो तिरुत्तममितिज्योतिरुत्तममिति ॥ ७ ॥ १७ ॥

मनोब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशोब्रह्मेत्युभयमादिष्टंभवत्यध्यात्मंचाधिदैवतंच॥१॥

ममेवसद्दीप्यमानमास्ते इतिप्रथममंत्रार्थः । उद्वयमितिद्वितीयमंत्रस्यतु उत्तरमुत्तमं ज्योतिःपश्यंतः तदेवोत्तरंज्योतिःस्वः आनंदरूपंचपरिपश्यंतःवयं पश्यंतउत्तरमितिद्विरुक्तिस्तात्पर्यार्था । तमसः उदगन्म उद्गताःस्मः । यद्वाउदितिभगवन्नाम उत् उदाख्यंउत्तमं देवत्रादेवं देवानांदेवं सूरिप्राप्यत्वेनसूर्यशब्दितंज्योतिरगन्म प्राप्ताःस्मेत्यर्थः । उत्तरमुत्तममुत्तममि तिपदत्रयस्योत्तमोत्तमोत्तममित्यर्थः ॥ ७ ॥ १७ ॥ लब्धायुषःपुरुषस्यायुषःसार्थक्यायाध्यात्ममधिदैवतंचभगवदुपास्तिंत

त्फलंचाह ॥ **मनोब्रह्मेति** । मनुतइतिमनोनामामनःस्थोनारायणःब्रह्मेत्युपासीतेत्यध्यात्ममुपास्तिरुक्तेत्यर्थः । अथेत्यर्थां
तरे । अधिदैवतमुपास्तिरुच्यतइत्यर्थः । आसमंतात्काशतइत्याकाशनामाऽऽकाशगतोनारायणःब्रह्मेत्युपासीतेत्यनुषंगः । उ
पसंहरति । अध्यात्ममधिदैवतंचोभयमुपासनमादिष्टमुपदिष्टंभवतीति ॥ १ ॥ तदेतद्ब्रह्मचतुष्पात् । नारायणाख्यं अध्या
त्माधिदैवगतंब्रह्म वासुदेवादिरूपचतुष्टयोपेतमित्यर्थः । तद्विवृणोति वागिति । वक्तीतिवाक्नामावागिंद्रियस्थोवासुदेवःएकः

**तदेतच्चतुष्पाद्ब्रह्मवाक्पादःप्राणःपादश्चक्षुष्पादःश्रोत्रंपादइत्यध्यात्ममथाधिदैवतमग्निःपादोवा
युःपादआदित्यःपादोदिशःपादइत्युभयमेवादिष्टंभवत्यध्यात्मंचाधिदैवतंच ॥ २ ॥ वागेवब्रह्मण
श्चतुर्थःपादःसोग्निनाज्योतिषाभातिचतपतिचभातिचतपतिचकीर्त्यायशसाब्रह्मवर्चसेन यएवं
वेद ॥ ३ ॥**

पादः । प्राणःप्राणनहेतुतयाप्राणनामाघ्राणेंद्रियस्थःसंकर्षणःपादः। चष्टइतिचक्षुर्नामाचक्षुःस्थःप्रद्युम्नःपादः। शृणोतीतिश्रोत्र
नामाश्रोत्रस्थोनिरुद्धःपादःइत्यध्यात्मंपादचतुष्टयमुक्तमित्यर्थः । अथाधिदैवतंतदुच्यतइत्यर्थः । अत्तीत्यग्निनामाग्निस्थोवासु
देवःएकःपादःवायुनामावायुस्थःसंकर्षणःपादःआदित्यनामादित्यस्थःप्रद्युम्नःपादःदिङ्नामादिक्षुस्थितोऽनिरुद्धःपादः । रूपबा
हुल्याद्बहुवचनं । उपसंहरति ॥ **इत्युभयमिति** । अध्यात्ममधिदैवतंचेत्युभयमेवादिष्टमुपदिष्टंभवति ॥ २ ॥ अध्यात्मा

धिदैवगतरूपाणांभेदशंकायां नेत्याह ॥ **वागेवेति** । वाङ्नामावाचिस्थितोब्रह्मणश्चतुर्थःपादोवासुदेवएव अग्निनाग्निनाम्ना ग्निस्थेनज्योतिषास्वात्मरूपेणभातिच । दुष्टांस्तपतिच । फलमाह ॥ **भातिचेति** । योधिकारी एवमध्यात्माधिदैवगतम नआकाशगतस्यतन्नाम्नोनारायणस्यवाचिस्थितोवाङ्नामावासुदेवाख्यइतरपादत्रयापेक्षयाचतुर्थपादत्वेनोक्तः । अग्निस्थात्म रूपज्योतिषाभाति । दुष्टांस्तपतीत्येवंप्रकारेणवेदसज्ज्ञानी ब्रह्मप्राप्य मुक्तौकीर्त्यायशसा ज्ञानसुखात्मनाब्रह्मवर्चसेन वेदा

प्राणएवब्रह्मणश्चतुर्थःपादःसवायुनाज्योतिषाभातिचतपतिचभातिचतपतिचकीर्त्यायशसाब्रह्मवर्चसेनयएवंवेद ॥ ४ ॥ चक्षुरेवब्रह्मणश्चतुर्थःपादःसआदित्येनज्योतिषाभातिचतपतिचभातिचतपतिचकीर्त्यायशसाब्रह्मवर्चसेनयएवंवेद ॥ ५ ॥ श्रोत्रमेवब्रह्मणश्चतुर्थःपादःसदिग्भिर्ज्योतिषाभातिचतपतिचभातिचतपतिचकीर्त्यायशसाब्रह्मवर्चसेनयएवंवेदयएवंवेद ॥६॥१८॥

भ्यासजन्यतेजोविशेषेणभातिचअज्ञानादितपतिचेत्यर्थः ॥ ३ ॥ प्राणएव प्राणनामाघ्राणेंद्रियस्थःसंकर्षणः । वायुनावायुगतेनवायुनाम्नासंकर्षणाख्यस्वात्मरूपज्योतिषा । भातीत्यादिप्राग्वत् । एवं नारायणाख्यब्रह्मणःसंकर्षणाख्यप्राणगतश्चतुर्थःपादः वायुगतज्योतिषाभातितपतिचेत्येवंवेदेत्यर्थः ॥ ४ ॥ चक्षुरेव चक्षुर्गतश्चक्षुर्नामाप्रद्युम्नःआदित्येनज्योतिषाआदित्यस्थप्रद्युम्नाख्यस्वात्मज्योतिषा । शिष्टंप्राग्वत् ॥ ५ ॥ श्रोत्रमेव श्रोत्रस्थः श्रोत्रनामानिरुद्धः ॥ ६ ॥ १८ ॥

यत्प्राप्त्याकीर्त्यादिफलभाग्भवतितत्प्राप्तिसंपादिकामादित्यनिष्ठांकांचनविद्यामाह ॥ आदित्योब्रह्मेति । आदित्यस्थआदित्यनामाहरिर्ब्रह्मेत्युपासीतेतिशेषः । इत्यादेशउपदेशः । कथमादित्यस्यजीवस्यब्रह्मत्वेनोपास्तिरित्यतःतद्धटनायप्रलयप्रकारंवदन्नादित्यस्योत्पत्तिप्रकारोक्त्यातत्रहरेःप्रादुर्भावमाह ॥ तस्येति । तस्यआदित्येब्रह्मत्वोपासनस्योपपत्त्यर्थंव्याख्यानं सृष्टिनिरूपणंक्रियतइत्यर्थः । इदमग्रे अस्यप्रपंचस्याग्रे पूर्वं प्रलयइतियावत् । केनाप्यगम्यत्वहेतुनाअसन्नामकंनारायणाख्यं

आदित्योब्रह्मेत्यादेशस्तस्योपव्याख्यानमसदेवेदमग्रआसीत्तत्सदासीत्तत्समभवत्तदांडंनिरवर्ततत्संवत्सरस्यमात्रामशयततन्निरभिद्यततेआंडकपालेरजतंचसुवर्णंचाभवतां ॥ १ ॥ तद्यद्रजतंसेयंपृथिवीयत्सुवर्णंसाद्यौर्यज्जरायुतेपर्वतायदुल्बंसमेघोनीहारोयाधमनयस्तानद्योयद्वास्तेयमुदकंॅससमुद्रः ॥ २ ॥

ब्रह्मासीत् तत्ततःअसन्नाम्नोनारायणात् । ज्ञानिगम्यतया सन्नामकंवासुदेवाख्यंरूपंआसीत्प्रादुरभूत् । तत्नारायणाख्यचित्प्रकृत्या समभवत् संभोगमकरोत् । तत्ततःआंडंनिरवर्तत अजायत । तत्आंडंसंवत्सरस्यमात्रां संवत्सरपर्यंतं अशयत अशेत पश्चात्तदंडंनिरभिद्यत ऊर्ध्वाधोभेदेनभिन्नमभवत् । तेआंडकपाले रजतंचसुवर्णंचाभवतां ॥ १ ॥ तद्यद्रजतंसेयंपृथिवी रजतांडकपालेपृथिव्यादिसप्तलोकास्तिष्ठंतीत्यर्थः । यत्सुवर्णंसाद्यौः । सुवर्णकपालेद्यौरुपरितनलोकास्तिष्ठंती

त्यर्थः । यज्जरायु स्थूलंगर्भपरिवेष्टनं तेपर्वताः । उल्बं सूक्ष्मंगर्भपरिवेष्टनं समेघोनीहारश्च । याधमनयोनाड्यः तान द्यः । यत्वास्तेयमुदकं वस्तिसंबंधिनाभेरधोविद्यमानं । ससमुद्रः ॥ २ ॥ अथानंतरं यत्वस्तु । तत्तत्रांडे । अजायत । सोसावादित्यः आदित्यजीवनियंता आदित्यमंडलस्थः आदित्यनामाभगवानथतस्मादादित्योब्रह्मेत्युपासीतेति अथशब्दोहेत्वर्थेवा । तंजायमानंआदित्यमंडलगतंहरिं उलूलवः उरूरवः रलयोरभेदात् । अतिमहांतःगायत्र्यादि वेदघोषाः अनूदतिष्ठन् । तथासर्वाणिचभूतानिब्रह्मादीनि सर्वेचकामाःसर्वमंगलद्रव्याणिचानूदतिष्ठन्नित्यन्वयः । ब्रह्माद

अथयत्तदजायतसोसावादित्यस्तंजायमानंघोषाउलूलवोनूदतिष्ठन्त्सर्वाणिचभूतानिसर्वेचका मास्तस्मात्तस्योदयंप्रतिप्रत्यायनंप्रतिघोषाउलूलवोनूत्तिष्ठंतिसर्वाणिचभूतानिसर्वेचकामाः॥३॥ सयएतदेवंविद्वानादित्यंब्रह्मेत्युपास्तेभ्याशोहयदेनꣳसाधवोघोषाआचगच्छेयुरुपचनिम्रेडेरन्नि म्रेडेरन्॥ ४ ॥ १९ ॥ इतिश्रीमच्छांदोग्योपनिषदितृतीयोऽध्यायः ॥ ३॥

यःसर्वेदेवाः मंगलद्रव्यैर्गंधाक्षतपुष्पादिभिर्गायत्र्यादिवेदघोषैःउपातिष्ठंत अस्तुवन्नित्यर्थः । तस्माद्ब्रह्मादिभिरेवंकृतत्वादद्य तनान्यपिभूतानि प्राणिजातानि तस्यादित्यनाम्नोहरेरुदयंप्रति । प्रत्यायनंअस्तंचप्रति । उलूलवोगायत्र्यादिघोषाःगंधाक्ष तादिमंगलद्रव्यरूपकामाश्चानूत्तिष्ठंति ॥ ३ ॥ ज्ञानिनःफलमाह ॥ **सयइति** । सप्रसिद्धोयोधिकारी एतत् आदित्यस्यब्र ह्मत्वं एवमसदेवेदमग्रेइत्याद्युक्तप्रकारेणविद्वानादित्यंब्रह्मेत्युपास्ते एनमुपासकंसाधवोघोषाः समीचीनवेदघोषाःयत् एतेआ

चगच्छेयुः उपसमीपेनिम्रेडेरंश्च मुक्तौवेदानानित्यावासभूतोभवतीत्यर्थः ॥ ४ ॥ १९ ॥ इतिश्रीछांदोग्योपनिषदर्थसंग्रहे राघवेंद्रयतिकृतेतृतीयोऽध्यायः ॥ ३ ॥ ॥ मनोब्रह्मेत्यादिखंडेभातिचतपतिचेत्यादिनाभानादिफलकविद्योक्ता । अत्र तुसार्वज्ञादिसंपादकसंवर्गविद्यामाख्यायिकयात्रिभिःपर्वभिराह ॥ जानश्रुतिरिति । जनश्रुतस्यापत्यंजानश्रुतिःपुत्रायणस्य गोत्रापत्यंपौत्रायणः । श्रद्धयादेयमस्यश्रद्धादेयः । बहुदायींयथेष्टदाता । बहुवाक्यः बहुमानवाक्यवान् । बहुश्रुतो

ॐ जानश्रुतिर्हपौत्रायणःश्रद्धादेयोबहुदायीबहुपा(वा)क्यआससहसर्वतआवसथान्मापयांचक्रे सर्वतएवमेऽत्स्यंतीति ॥ १ ॥ अथहहꣳसानिशायामतिपेतुस्तद्धैवꣳहꣳसोहꣳसमभ्युवादहोहोयि भल्लाक्षभल्लाक्षजानश्रुतेःपौत्रायणस्यसमंदिवाज्योतिराततंतन्माप्रसांक्षीस्तत्त्वामाप्रधाक्षीरिति ॥२॥

वा । आस बभूव । सराजा सर्वतः । सर्वत्र । आवसथान् गृहान् । मापयांचके कारयामास । कुतः सर्वतआगत्य मेम दीयमन्नमत्स्यंति अद्युरितिबुद्ध्याऽन्नसत्रगृहान्कारयामाससर्वत्रेत्यर्थः ॥ १ ॥ अथ एवंराज्ञिस्थितेसत्यनंतरंकदाचिन्निशायां रात्रौहंसाःपक्षिणःप्रासादेमंचेशयानंराजानंअभिपेतुःगगनमार्गेपरिपतितवंतः । तद्ध तदैव । हंसःकश्चिदन्यहंसंपुरतःउत्प तंतमभ्युवाद । होहोयि भोभोहंस । भल्लाक्षभल्लाक्ष मंदाक्ष । जानश्रुतेःपौत्रायणस्यसमं । दिवा द्युलोकपर्यंतं । ज्योतिरा

ततंव्याप्तमस्ति । तत् ज्योतिः । त्वंमाप्रसांक्षीः तत्प्रसंजनंसंबंधंमाकार्षीः । कुतःतत्तेजःत्वात्वांमाप्रधाक्षीः दग्धंनकरोतु । अतइतियोजना । मध्यमपुरुषश्छांदसः ॥ २ ॥ इत्येकेनहंसेनोक्तःपरोहंसःतमेवंब्रुवाणंहंसंप्रत्युवाच । किमिति अरे हंस एतत्संतं एतस्मिन्प्रासादेसंतं । एनं पौत्रायणं । कं कीदृक्प्रभावंमत्वा । सयुग्वानं शकटयुगाश्रितं नामतोरैक्कमिवात्थ वदसीतिप्रत्युवाचेत्यर्थः । इतिप्रत्युक्तोन्यो हंसआह । त्वयोक्तःसयुग्वारैक्कः योनु कोनु कथं कीदृक्प्रभाववा

तमुहपरःप्रत्युवाचकम्वरएनमेतत्संतंसयुग्वानमिवरैक्कमात्थेतियोनुकथꣳसयुग्वारैक्कइति ॥ ३ ॥
(स)यथाकृतायविजितायाधरेयाःसंयंत्येवमेनꣳसर्वंतदभिसमेतियत्किंचप्रजाःसाधुकुर्वंतियस्त
द्वेदयत्सवेदसमयैतदुक्तइति ॥ ४ ॥ तदुहजानश्रुतिःपौत्रायणउपशुश्रावसहसंजिहानएवक्षत्ता
रमुवाचांगारेहसयुग्वानमिवरैक्कमात्थेतियोनुकथꣳसयुग्वारैक्कइति ॥ ५ ॥

निति ॥ ३ ॥ उत्तरमाहहंसः ॥ सयथेति । वक्ष्यमाणदृष्टांतोयथेत्यर्थः । कृतायविजिताय सम्यक्कर्मकरणेनकृतयुगेजिते सति । अधरेयाः त्रेतादयः । संयंति जितफलाभवंति । एवं यत्किंचेमाःप्रजाः साधु पुण्यंकर्म कुर्वंति । स्वयोग्यंतत्सर्वमेनंसंवर्गविद्यावेदिनंरैक्कं अभिसमेति प्राप्नोति । यः कोपि । यत् ज्ञातव्यं । वेद तत्सर्वं स रैक्को वेद । सरैक्को मया एतदुक्तोनेनप्रकारेणोक्त इत्युवाचहंसइत्यर्थः ॥ ४ ॥ तदुह हंसोक्तमात्मानादररूपंरैक्कप्रशंसारूपंचवाक्यंजानश्रुतिःपौत्रायणःउप

शुश्राव । स ह राजा । संजिहानः तल्पादुत्थितःसन्नेव । क्षत्तारं सारथिं उवाच । किमित्यतस्तदाह ॥ अंगेति ॥ अरे अंग भोप्रिय क्षत्तः । रैक्वोनाममुनिस्त्वयाविचार्यः । कुतइतिचेत्पृच्छसि रात्रौप्रासादेशयनकालेकेचनहंसाअतिपेतुः । तदैकं हंसंप्रति अरेमंददृष्टेहंस । जानश्रुतेर्ज्योतिर्द्युलोकपर्यंतंव्याप्तमस्ति । तत्स्पर्शनंनकुरु । तथात्वे त्वांधक्ष्यतीत्यन्येनोक्तोहंसोऽभ्युवाद । कम्वरएनमेतत्संतमित्येतावद्वाक्यंसयुग्वानमित्यतःप्राग्योज्यं । मयैतदुक्तइतिवाक्यानंतरमेवंहंसोक्तमतस्त्वयासज्ञात

यथाकृतायविजितायाधरेयाःसंयंत्येवमेनꣳसर्वंतदभिसमेतियत्किंचप्रजाःसाधुकुर्वंतियस्तद्वेदय त्सवेदसमयैतदुक्तइति ॥ ६ ॥ सहक्षत्तान्विष्यनाविंदमितिप्रत्येयायतꣳसहोवाचयत्रारेब्राह्मण स्यान्वेषणातदेनमृच्छेति ॥ ७ ॥ सोधस्ताच्छकटस्यपामानंकषमाणमुपोपविवेशतꣳहाभ्युवाद त्वंनुभगवःसयुग्वारैक्वइत्यहꣳह्यरा३यितिप्रतिहजज्ञेसहक्षत्तान्विष्याविदमितिप्रत्येयाय ॥ ८ ॥ १ ॥

व्यइतिक्षत्तारमुवाचेत्यर्थोज्ञेयः । वाक्यस्यार्थःप्रागुक्तएव ॥ ५ ॥ ६ ॥ एवमुक्तःक्षत्तासर्वत्रान्विष्यनाविंदं नलब्धवानस्मीतिवदन्प्रत्येयाय प्रत्यागतवान् । तंक्षत्तारंराजापुनरुवाच । अरेक्षत्तः यत्रब्राह्मणस्यान्वेषणा अनुमार्गणं । भवति तत् तत्र । एनंरैक्वमृच्छ गच्छ । तत्रान्वेषणंकुर्वित्यर्थः ॥ ७ ॥ एवमुक्तःसक्षत्ता तथैवान्विष्यक्वचिच्छकटस्याधस्तात्पामानंकषमाणं कंडूयमानंदृष्ट्वातत्समीपेउपविष्टवान् । उपविष्टःसन् तंरैक्वमभ्युवाद । किमिति । हेभगवःभगवन् त्वंनुसयुग्वारैक्वोसिनुकिमित्यभ्यु

वादेत्यर्थः । इतिपृष्टःसमुनिराह । अरे अहंहिरैक्वहिःप्रसिद्धइतिप्रतिजज्ञे प्रतिज्ञामकरोत्प्रत्युवाचेतियावत् । पामकषणभावे अरा ३ इतिप्लुतिः । सहक्षत्ता अविदं ज्ञातवानस्मिरैक्वमितिप्रत्येयाय ॥ ८ ॥ १ ॥ तदुह तदैव । तेनज्ञात्वाअभ्यागतत्वादेवेति वार्थः । जानश्रुतिःपौत्रायणःगवांषट्शतानि निष्कंहाररूपं । अश्वतरीभिर्युक्तंरथमश्वतरीरथं । अश्वतर्यश्चाश्वैर्गर्दभीषुजाताः । आदाय तत् तत्र रैक्वस्थले । प्रतिचक्रमे गतवान् । तत्रगत्वातंरैक्वं अभ्युवाद ॥ १ ॥ हेरैक्वगवामिमानिषट्शतानिअयंनिष्कः

तदुहजानश्रुतिःपौत्रायणःषट्शतानिगवांनिष्कमश्वतरीरथंतदादायप्रतिचक्रमेतꣳहाभ्युवाद॥१॥ रैक्वेमानिषट्शतानिगवामयंनिष्कोयमश्वतरीरथोनुमएतांभगवोदेवतांशाधियांदेवतामुपास्स इति ॥ २ ॥ तमुहपरःप्रत्युवाचाहहारेत्वाशूद्रतवैवसहगोभिरस्त्वितितदुहपुनरेवजानश्रुतिः पौत्रायणःसहस्रंगवांनिष्कमश्वतरीरथंदुहितरंतदादायप्रतिचक्रमे ॥ ३ ॥

अयंअश्वतरीरथः एतत्सर्वंगृहीत्वाप्रसन्नःसन् हेभगवः त्वंयांदेवतांउपास्से एतांदेवतांमे मह्यंअनुशाधि शिक्षय उपदिशेतिया वत् ॥२॥ तंराजानंपरोरैक्वः प्रत्युवाच । अह हेशूद्र । हंसकृतानादरश्रवणजातशोकाधिक्येनागततयाशूद्रेत्युक्त राजन् । तदाह सूत्रेषुशुगस्यतदनादरश्रवणात्तद्रावद्रवणात्सूच्यतेहीत्यादि । हारेत्वा हारश्चेत्वारथश्चहारेत्वानौ हारेत्वानावेवहारेत्वा । व्यत्ययेन द्विवचनस्यैकवचनं हारेणसहितइत्वाहारेत्वेतिवा । सेदुराजेत्यादिवत्हारइतिभिन्नंपदंवा । गोभिःसहतवैवास्तु । इतिहप्रत्युवा

चेत्यन्वयः । तदुह तस्मादेव तेनैवंप्रत्याख्यातत्वादेवह । पुनर्जानश्रुतिःपौत्रायणोराजा । पुरमागत्यगवांसहस्रं निष्कं अश्व तरीरथं दुहितरं कन्यांचादाय तत् तत्र । प्रतिचक्रमे । जगाम ॥ ३ ॥ गत्वातंरैक्कमभ्युवाद । हाहेरैक्क इदंगवांसहस्रं अयंनिष्कोऽयमश्वतरीरथः इयंजाया यस्मिन्ग्रामेत्वमास्सेतिष्ठसि अयंचग्रामः तत्सर्वंगृहीत्वा हेभगवःमा मांअनुशाध्येव अवश्यमनुशाधीत्यर्थः ॥४॥ तस्याः राजकन्यायाः । मुखमुपोद्गृह्णन्पश्यन्इमाः गुरुदक्षिणाःआजहार स्वीकृतवान् । राजा

**तꣳहाभ्युवादरैक्केदꣳसहस्रंगवामयंनिष्कोयमश्वतरीरथइयंजायायंग्रामोयस्मिन्नास्सेन्वेवमाभग
वःशाधीति ॥ ४ ॥ तस्याहमुखमुपोद्गृह्णन्नुवाचाजहारेमाःशूद्रानेनैवमुखेनालापयिष्यथा३इति
तेहैतेरैक्कपर्णानाममहावृषेषुयत्रास्माउवासतस्मैहोवाच ॥ ५ ॥ २ ॥
वायुर्वावसंवर्गोयदावामहाप्रलयेअग्निरुद्वायतिवायुमेवाप्येतियदासूर्योस्तमेतिवायुमेवाप्येति
यदाचंद्रोस्तमेतिवायुमेवाप्येति ॥ १ ॥**

नंप्रत्युवाचरैक्कः हेशूद्रहंसकृतानादरश्रवणजातेनशोकेनाद्रुत हेराजन्गुरुशुश्रूषांविनाऽनेनहारादिमुखेनैवमालापयिष्यथा ३ इत्युवाचेत्यर्थः । आलापयिष्यसीत्येकवचनार्थेबहुवचनंप्लुतिःसंतोषातिशये वेदपुरुषआह । तेहैतेराजदत्ताग्रामाः । महावृषेषुदेशेषुरैक्कपर्णानाम प्रसिद्धाः । यत्र ग्रामेषु । अस्मै राजार्थं । उवासरैक्कः तएतइतिपूर्वेणान्वयः । दक्षिणांस्वीकृत्यप्रसन्नो मुनिः तस्मैराज्ञेसंवर्गविद्यामुवाच ॥ ५ ॥ २ ॥ रैक्केनोक्तामधिदैवमध्यात्मंचसंवर्गविद्यांसंवर्गस्वरूपंचविस्तरेणाहवेदपुरुषः । ॥ ५३ ॥

वायुर्वाव मुख्यवायुरेव । संवर्गःसंहर्तृतयासंवर्गइत्युक्तः । संहर्तृत्वमेवव्यक्तमाह ॥ यदेति । उद्वायति नश्यति । वायुंअ प्येति प्राप्नोति । अग्न्यादयोत्रदेवताज्ञेयाः ॥ १ ॥ आपः अबभिमानिनः । स्वतएवाग्न्यादयोनाशमिताःवायुमपियं तिकिमित्यतआह ॥ वायुरिति । एतानग्न्यादिदेवान्संवृङ्क्तेसंहरति । इत्यधिदैवतं संहर्तृतयासंवर्गाख्यंवायोरूपमुक्तमि त्यर्थः ॥ २ ॥ अथाध्यात्मं तादृग्रूपमुच्यतइत्यर्थः । प्राणाख्यमध्यात्मगतंवायोरूपंसंवर्गइत्युक्तं । संहर्तृत्वप्रकारमाह ॥ स

**यदाऽऽपउच्छुष्यंतिवायुमेवापियंतिवायुर्ह्येवैतान्त्सर्वान्संवृंक्तइत्यधिदैवतं ॥ २ ॥ अथाध्यात्मं
प्राणोवावसंवर्गःसयदास्वपितिप्राणमेववागप्येतिप्राणꣳचक्षुःप्राणꣳश्रोत्रंप्राणंमनःप्राणोह्येवैता
न्सर्वान्त्संवृंक्तइति ॥ ३ ॥ तौवाएतौद्वौसंवर्गौवायुरेवदेवेषुप्राणःप्राणेषु ॥ ४ ॥ अथहशौनकंच
कापेयमभिप्रतारिणंचकाक्षसेनिंपरिविष्यमाणौब्रह्मचारीबिभिक्षेतस्माउहनददतुः ॥ ५ ॥**

यदेति । स जीवः । यदास्वपिति तदा वागादयोत्राध्यात्मगतवह्न्यादिदेवताः । प्राणंचक्षुरित्यादावप्येतीत्यनुषज्यते । एतान्संवृङ्क्ते उपसंहरति । इतिशब्दोध्यात्माधिदैवरूपोक्तिसमाप्तौ ॥ ३ ॥ उक्तमर्थंसंगृह्याह ॥ तौवाएतौद्वाविति । प्राणेषु वागादींद्रियेषु विषयसप्तमी देवप्राणविषये । संवर्गौ संहर्तृतयासंवर्गनामकौ ॥ ४ ॥ उभयत्रमुख्यवायुःसंवर्गइत्युक्तमाख्यायिकयोपपादयति ॥ अथहेति । शुनकस्यापत्यंशौनकः । कपेरपत्यंकापेयः तं । नामतोभिप्रतारिणं । कक्षसेन

स्यापत्यंकाक्षसेनिः । परिविष्यमाणौ अन्नंपरिवेषयंतौ । कश्चिद्ब्रह्मचारीबिभिक्षे अन्नंयाचितवान् । तस्मैयाचितवते । नउ नैव । ददतुर्ह ॥ ५ ॥ सब्रह्मचारी तावुवाच । योभुवनस्यगोपाःरक्षकः । एकोदेवश्चतुरोमहात्मनःप्रागुक्ताग्निसूर्यादीन्जगार गॄ निगरणे जग्रास । एतंमर्त्याःबहुधावसंतंनाभिपश्यंति । हेकापेय हेअभिप्रतारिन् । सकःयस्मैवा यस्यवै एतदन्नं तस्मैएतदन्नं दत्तंप्रयच्छतमित्युवाचेत्यन्वयः ॥ ६ ॥ शौनकःकापेयःतदुह ब्रह्मचारिपृष्टमेव । प्रतिमन्वानः विचारयन् । प्रत्ये

सहोवाचमहात्मनश्चतुरोदेवएकःकःसोजगारभुवनस्यगोपास्तंकापेयनाभिपश्यंतिमर्त्याअभिप्रतारिन्बहुधावसंतंयस्मैवाएतदन्नंतस्माएतन्नदत्त(एतदन्नंदत्त)मिति ॥ ६ ॥ तदुहशौनकःकापेयः प्रतिमन्वानःप्रत्येयायात्मादेवानांजनिताप्रजानाꣳहिरण्यदꣳष्ट्रोबभसोनसूरिर्महांतमस्यमहिमानमाहुरनद्यमानोयदनन्नमत्तीतिवै(ते)वयंब्रह्मचारिन्निदमु(न्नेतमु)पास्महेदत्तास्मैभिक्षामिति ॥ ७ ॥

याय ज्ञातवान् । ज्ञात्वाचब्रह्मचारिणंप्रत्युवाचचेतिग्राह्यं । तदाह ॥ आत्मेत्यादिना । देवानामात्माआदानादिकर्ता स्वामीतियावत् । प्रजानांजनिताजनयिता । हिरण्यदंष्ट्रः बभसः भक्षकः । अनः चेष्टकः । सूरिर्ज्ञानीचेत्यनसूरिःप्राणइत्यर्थः । अस्यप्राणस्यमहांतंमहिमानमाहुःप्राज्ञाः । तमेवमहिमानमाह । अनद्यमानोनन्नमन्यैरत्तुमशक्यमद्यघन्नमत्ति । यद्यस्मात्तस्मात्महांतंमहिमानमस्याहुरित्यर्थः । इतिप्रत्युवाचेतीतिपदस्यान्वयः । भोब्रह्मचारिन् तेतज्ज्ञानिनोवयंएतं

प्राणमुपास्महे । अस्मै प्राणायब्रह्मचारिस्थिताय । भिक्षांदत्त प्रयच्छत । भृत्याइतिचोवाचेत्यर्थः ॥ ७ ॥ एवमुक्ताः तेअस्मैभि क्षांददुः । एवंतर्हिंप्राणएवसर्वमुत्पाद्यसंहर्ताकिमित्यतोनेत्याह ॥ तेवाइति । एतेवायुनासहाग्न्यादयोयेधिदैवगताःपंच तथा ध्यात्मगताश्चप्राणेनसहान्येवागादयःपंच दशसंतः दशसंख्याकाभूत्वा तत्कृतं तत् दशदेवताजातं कृतं पूर्णं पूर्णमन्न मित्यर्थः । तस्मादग्न्यादेरधिदैवाध्यात्मभेदेनाष्टत्वेपिवायुनासहदशसंख्यापूरणात्सर्वासुदिक्षुस्थिताःदशदेवताःकृतंपूर्णमन्नं

तस्माउहददुस्तेवाएतेपंचान्येपंचान्येदशसंतस्तत्कृतंतस्मात्सर्वासुदिक्ष्वन्नमेवदशकृत ँ सैषावि राडन्नादीतयेद ँ सर्वंदृष्ट ँ सर्वमस्येदंदृष्टंभवत्यन्नादोभवतियएवंवेदयएवंवेद ॥ ८ ॥ ३ ॥
सत्यकामोहजाबालोजबालांमातरमामंत्रयांचक्रेब्रह्मचर्यंभवतिविवत्स्यामिकिंगोत्रोन्वहमस्मी ति ॥ १ ॥

एतेदश कस्यान्नमित्यतआह ॥ सैषेति । साप्रसिद्धाएषाअन्नदेवताविराट् विशेषेणराजमानोविष्णुरेवान्नादी सर्वात्तृत्वोप युक्तंसार्वज्ञमाह तया विराट्शब्दितविष्णुदेवतया । इदंसर्वजगत् दृष्टं । फलमाह ॥ सर्वमिति । योऽधिकारी । एवं वायुःस्वयंसकलसंहर्तृतयासंवर्गनामासन्हरेरन्नमितियोवेदसोन्नादोभवति । अस्य अनेन । स्वयोग्यंसर्वंदृष्टंभवति । सर्वज्ञो भवतीत्यर्थः ॥ ८ ॥ ३ ॥ पूर्वंतदेतच्चतुष्पाद्ब्रह्मवाक्पादइत्यादिनावासुदेवादिचतुर्मूर्तिर्विद्योक्ता अधुनाप्रत्येकंचतूरूपाणां

वासुदेवादीनामेवंविद्यामाख्यायिकयाहषड्भिःखंडैः॥ सत्यकामइत्यादिभिः । सत्यकामोनामतः । जबालापुत्रोजाबालः आमंत्रयांचक्रेसंबोधितवान् । भवति हेभवति । ब्रह्मचर्यंब्रह्मचारित्वंविवत्स्यामिवै । ब्रह्मचर्यमुद्दिश्याचार्यकुलेविशेषेणवासंकरिष्यामि । किंगोत्रः बहुव्रीहिः । अहमस्मीत्यामंत्र्यमातरमुवाचेत्यर्थः ॥ १ ॥ सा मातैनमुवाच । हेतात पुत्र । यद्गोत्रस्त्वमसीत्येतदहंनवेद । कुतइत्यतआह । अहंभर्तृगृहेबहुकर्मचरंती कुर्वंतीपरिचर्यकारिणी यौवनेत्वामलभे लब्धव

साहैनमुवाचनाहमेतद्वेदतातयद्गोत्रस्त्वमसिबह्वहंचरंतीपरिचारिणीयौवनेत्वामलभेसाहमेतन्नवेदयद्गोत्रस्त्वमसिजबालातुनामाहमस्मिसत्यकामोनामत्वमसिससत्यकामोजाबालोब्रवीथा इति ॥ २ ॥ सहहारिद्रुमतंगौतममेत्योवाचब्रह्मचर्यंभगवतिवत्स्याम्युपेयांभगवंतमिति ॥ ३ ॥ तꣳहोवाचकिंगोत्रोनुसोम्यासीतिसहोवाचनाहमेतद्वेदभोयद्गोत्रोहमस्म्यपृच्छंमातरꣳसामाप्रत्यब्रवीद्बह्वहंचरंतीपरिचारणीयौवनेत्वामलभेसाहमेतन्नवेदयद्गोत्रस्त्वमसिजबालातुनामाहमस्मिसत्यकामोनामत्वमसीतिसोहंसत्यकामोजाबालोस्मिभोइति ॥ ४ ॥

त्यस्मि । अतोव्यासक्तचित्ताअहंयद्गोत्रस्त्वमसीत्येतन्नवेद । जबालातुनामाहमस्मि । सत्यकामोनामत्वमसि । सत्यकामएव जाबालोहमस्मीत्येवाचार्यंप्रतिब्रूयाइत्युवाचेत्यर्थः ॥ २ ॥ स सत्यकामः । हारिद्रुमतोपत्यंगौतममेत्य प्राप्योवाच । भगवति पूज्ये त्वयि । ब्रह्मचर्यमुद्दिश्यवत्स्यामि । भगवंतंत्वामुपेयां उपगच्छामिशिष्योभवानीत्युवाचेत्यर्थः ॥ ३ ॥

तंसत्यकामंगौतमउवाचह । हेसोम्य किंगोत्रोसीति । इतिपृष्टःसत्यकामउवाच ॥ नाहमित्यादिनाजाबालोस्मिभो इत्यंतेन । अपृच्छंपृष्टवानस्मि । मा मां । नाहमित्यादेःप्राग्वदर्थः ॥ ४ ॥ एतत्यथास्थितत्वंअब्राह्मणो त्रैवर्णिकान्योविवक्तुं नार्हत्यतोयंब्राह्मणइतितदीयार्जवेननिश्चित्यतंसत्यकाममुवाच । हेसोम्य सोमपानार्हं समिधमाहर । त्वा त्वां उपनेष्यामि उपनीतंकरिष्यामि । यस्मात्त्वंसत्यात् सत्यवचनान्नागाः । सत्यवचनंनत्यक्तवानसि । अतइ

तꣳहोवाचनैतदब्राह्मणोविवक्तुमर्हतिसमिधꣳसोम्याऽऽहरोपत्वानेष्ये(ष्यामि)नसत्यादगाइति तमुपनीयकृशानामबलानांचतुःशतंगानिराकृत्योवाचेमाःसोम्यानुसंव्रजेतिताअभिप्रस्थापयन्नुवाचनासहस्रेणावर्तये(र्तयामि)तिसहवर्षगणंप्रोवासतायदासहस्रꣳसंपेदुः ॥ ५ ॥ ४ ॥

तियोजना । तंसत्यकाममुपनीयगौतमः कृशानां अबलानां बलहीनानांमध्येचतुःशतंगाः गवांचत्वारिशतानि निराकृत्य बहिर्निष्क्राम्य हेसोम्येमाःगाः अनुगच्छ अरण्यंनीत्वातृणादनादिकारयेत्युवाच । सत्यकामस्ताःअभिप्रस्थापयन् बहिर्गमयन् । असहस्रेण सहस्रंगाअसंपाद्य नावर्तेयं नागच्छेयमित्युवाच । सएवमुक्तवान्सत्यकामोगाः वनंनीत्वा तत्रैववर्षगणं गोसहस्रसंपत्तिपर्यंतमब्दसंघंप्रोवास प्रवासंचक्रे । ताः गावः । यदासहस्रंसंपेदुःसंपन्नाः ॥ ५ ॥ ४ ॥

अथतदा । एनंसत्यकाममृषभः ऋषभाविष्टोवायुः । अभ्युवादउच्चैरुवाच । हेसत्यकामा ३ आमंत्रितेचेतिप्लुतः । इत्यभ्यु
वादेत्यन्वयः । हेभगवइतिप्रतिशुश्राव श्रावयतिस्मह हेसोम्यसहस्रंसहस्रसंख्यांवयंप्राप्ताःस्मः नोऽस्मानाचार्यकुलंआचार्य
गृहंप्रापय ॥ १ ॥ तेतुभ्यंब्रह्मणःपादंब्रवाणिइतिचोवाचऋषभस्थोवायुरित्यर्थः । एवमुक्तःसत्यकामआह । मेमह्यंभगवान्
ब्रवीत्विति । तस्मैहोवाचऋषभाविष्टोवायुःप्राच्यांदिशितन्नियंतृतयास्थितःप्राचीदिङ्नामावासुदेववासुदेवात्माकलाएकंब्र

अथहैनमृषभोभ्युवादसत्यकामा ३ इतिभगवइतिहप्रतिशुश्रावप्राप्ताःसोम्यसहस्रꣳस्मःप्रापय
नआचार्यकुलं ॥ १ ॥ ब्रह्मणश्चतेपादंब्रवाणीतिब्रवीतुमेभगवानितितस्मैहोवाचप्राचीदिक्कलाप्र
तीचीदिक्कलादक्षिणादिक्कलोदीचीदिक्कलैषवैसोम्यचतुष्कलःपादोब्रह्मणःप्रकाशवान्नाम ॥ २ ॥

ह्मणःपादस्याद्यंरूपं । प्रतीचीदिक् प्रतीचीदिङ्नामाप्रतीच्यांदिशिस्थितोवासुदेवसंकर्षणात्मककलाब्रह्मणःपादस्यवासुदेवस्य
द्वितीयंरूपं । दक्षिणादिक् दक्षिणदिशिस्थितोदक्षिणदिङ्नामावासुदेवप्रद्युम्नकला ब्रह्मणःपादस्यतृतीयंरूपं । उदीचीदिक्
उदग्दिक्स्थितउदग्दिङ्नामावासुदेवानिरुद्धःकला ब्रह्मणःपादस्यचतुर्थंरूपं । उपसंहरति ॥ एवमिति । हेसोम्यब्रह्मणोहरेरेष
वासुदेवाख्यःचतुष्कलःउक्तदिशावासुदेवादिचतुरात्मकःपादः । प्रकाशवान्नामप्रसिद्धं । प्रकाशवानितिसंज्ञकइतियावत्

॥ २ ॥ योधिकारी । एतं ब्रह्मणःप्रथमपादभूतंवासुदेवरूपं । एवं चतुरात्मनाप्राच्यादिदिङ्नामकतयाचतुर्दिक्षुवर्ततइत्येवं प्रकारेण विद्वान् जानन् ब्रह्मणो हरेःचतूरूपात्मकपादंवासुदेवंप्रकाशवानित्युपास्ते प्रकाशवान् प्रख्यातः इत्यैहिकफलंव्यक्तं । यएतदितिपुनर्वचनंप्रकाशवतइत्यामुष्मिकफलोक्त्यर्थं ॥ ३ ॥ ५ ॥ अग्निरिति । वृषभाविष्टोवायुर्वासुदेवाख्यमेकं ब्रह्मणःपादमुक्त्वाते अग्निर्देवतासंकर्षणाख्यंपादंवक्ता वक्ष्यतीत्युवाचेत्यर्थः । सआचार्यकुलंनःप्रापयेतिवृषभाविष्टवायुनोदि

सयएतमेवंविद्वा ँश्चतुष्कलंपादंब्रह्मणःप्रकाशवानित्युपास्तेप्रकाशवानस्मिँल्लोकेभवतिप्रकाशवतोहलोकाञ्जयतियएतमेवंविद्वा ँश्चतुष्कलंपादंब्रह्मणःप्रकाशवानित्युपास्ते ॥ ३ ॥ ५ ॥ अग्निष्टेपादंवक्तेतिसहश्वोभूतेगाअभिप्रस्थापयांचकारतायत्राभिसायंबभूवुस्तत्राग्निमुपसमाधायगाउपरुध्यसमिधमाधायपश्चादग्नेःप्राङुपोपविवेश ॥ १ ॥ तमग्निरभ्युवादसत्यकामा३इति भगवइतिहप्रतिशुश्राव ॥ २ ॥

तःसत्यकामः । श्वोभूते परेद्युः । गाःअभिआचार्यगृहंप्रति । प्रस्थापयांचकार यापितवान् । ताःआचार्यगृहाभिमुखा गावःयत्रदेशेअभिसायंबभूवुः सायंप्रतिबभूवुःसायंप्राप्ताइतियावत् । तत्रदेशेगाःउपरुध्य निरुध्याग्निमुपसमाधाय प्रतिष्ठाप्य । समिधमाधाय अग्नेःपश्चात्प्राङ्मुखउपोपविवेश ॥ १ ॥ तमग्निरित्यादेस्तस्मैसहोवाचेत्यंतस्यप्रागिवार्थोध्येयः

॥ २ ॥ पादं संकर्षणाख्यंरूपं । तस्यपादस्यचतुष्कलत्वमाह ॥ पृथिवीति । प्रथितत्वहेतुनापृथिवीनामकंपृथिवीनियंतृ
तयापृथिवीसंस्थंसंकर्षणवासुदेवाख्यं । कला एकंरूपं ब्रह्मणःपादभूतस्यसंकर्षणस्य । एवमग्रेपिध्येयं । अंतरिक्षनियंतृतयां
तरिक्षस्थमंतरिक्षनामकंसंकर्षणसंकर्षणात्मकंकला द्वितीयंरूपं । द्यौःद्युनियंतृतयाद्युस्थंद्युनामकंसंकर्षणप्रद्युम्नाख्यं कलातृतीयं

ब्रह्मणःसोम्यतेपादंब्रवाणीतिब्रवीतुमेभगवानितितस्मैसहोवाचप्रथिवीकलांतरिक्षंकलाद्यौःक
लासमुद्रःकलैषवैसोम्यचतुष्कलःपादोब्रह्मणोनंतवान्नाम ॥ ३ ॥ सयएतमेवंविद्वाꣳश्चतुष्कलंपा
दंब्रह्मणोनंतवानित्युपास्तेनंतवानस्मिँल्लोकेभवत्यनंतवतोहलोकाञ्जयतियएतमेवंविद्वाꣳश्चतुष्क
लंपादंब्रह्मणोनंतवानित्युपास्ते ॥ ४ ॥ ६ ॥
हꣳसस्तेपादंवक्तेतिसहश्वोभूतेगाअभिप्रस्थापयांचकारतायत्राभिसायंबभूवुस्तत्राग्निमुपसमा
धायगाउपरुध्यसमिधमाधायपश्चादग्नेःप्राङुपोपविवेश॥१॥ तꣳहꣳसउपनिपत्याभ्युवादसत्यका
माꣳइतिभगवइतिहप्रतिशुश्राव ॥ २ ॥

रूपं । समुद्रनियंतृतयासमुद्रस्थंतन्नामकंसंकर्षणानिरुद्धाख्यंकला चतुर्थंरूपं । एषवाइत्यादेःप्राग्वदर्थः । अनंतवान्नाम
अनंतवत्संज्ञकः ॥ ३ ॥ ४ ॥ ६ ॥ एवमग्निदेवःसंकर्षणाख्यंचतूरूपंब्रह्मणःपादमुक्त्वा । हंसः हंसरूपीचतुर्मुखः । ते पादं
प्रद्युम्नाख्यंब्रह्मणःपादं वक्तेत्युवाचेत्यर्थः । सहश्वोभूतइत्यादिप्राग्वत् ॥ १ ॥ हंसःहंसरूपीब्रह्मा । उपनिपत्य आगत्य ॥२॥

पादं प्रद्युम्नाख्यंरूपं । अग्निःकलेति । अग्निनियंतृतयाअग्निस्थितमग्निनामकंप्रद्युम्नवासुदेवाख्यं ब्रह्मणःपादभूतस्यप्रद्युम्नस्य कला आद्यंरूपं । सूर्यनियंतृतयासूर्यस्थितंसूर्यनामकंप्रद्युम्नसंकर्षणाख्यंकला द्वितीयंरूपं । चंद्रनियंतृतयाचंद्रस्थंचंद्रनाम कंप्रद्युम्नप्रद्युम्नाख्यंकलातृतीयंरूपं । विद्युन्नियंतृतयाविद्युद्गतंविद्युन्नामकंप्रद्युम्नानिरुद्धाख्यंकला ब्रह्मणःपादस्यप्रद्युम्नस्यचतु

ब्रह्मणःसोम्यतेपादंब्रवाणीतिब्रवीतुमेभगवानितितस्मैहोवाचाग्निःकलासूर्यःकलाचंद्रःकलावि
द्युत्कलैषवैसोम्यचतुष्कलःपादोब्रह्मणोज्योतिष्मान्नाम ॥ ३ ॥ सयएतमेवंविद्वांश्चतुष्कलंपादं
ब्रह्मणोज्योतिष्मानित्युपास्तेज्योतिष्मानस्मिँल्लोकेभवतिज्योतिष्मतोहलोकाञ्जयतियएतमेवं
विद्वांश्चतुष्कलंपादंब्रह्मणोज्योतिष्मानित्युपास्ते ॥ ४ ॥ ७ ॥
मद्गुष्टेपादंवक्तेतिसहश्वोभूतेगाअभिप्रस्थापयांचकारतायत्राभिसायंबभूवुस्तत्राग्निमुपसमाधा
यगाउपरुध्यसमिधमाधायपश्चादग्नेःप्राङुपोपविवेश ॥ १ ॥

र्थंरूपं । एषवाइत्यादिप्राग्वत् । तस्यप्रद्युम्नस्यसंज्ञामाह । ज्योतिष्मान्नामेति ॥ ३ ॥ ४ ॥ ७ ॥ एवंहंसरूपीविरिंचःप्रद्युम्ना ख्यंवासुदेवादिचतुरात्मनास्थितंब्रह्मणःपादमुक्त्वा । मद्गुर्जलवायसरूपोवरुणस्तेऽनिरुद्धाख्यंब्रह्मणःपादंवक्तेत्यप्युवाचेत्यर्थः।

सहश्वोभूतइत्यादिप्राग्वत् ॥ १ ॥ मद्गुः जलवायसरूपोवरुणः । उपनिपत्यागत्य ॥ २ ॥ पादमनिरुद्धाख्यंरूपं । ब्रवा णीत्यभ्युवाद । प्राणःकला प्राणनियंतृतयाप्रा(घ्रा)णेंद्रियस्थंप्राणनामकंअनिरुद्धवासुदेवाख्यंब्रह्मणःपादभूतानिरुद्धस्यकला आद्यंरूपं । चक्षुर्नियंतृतयाचक्षुःस्थंचक्षुर्नामकंअनिरुद्धसंकर्षणाख्यंकला पादभूतानिरुद्धस्यद्वितीयंरूपं । श्रोत्रस्थंश्रोत्रनाम

तंमद्गुरुपनिपत्याभ्युवादसत्यकामा३इतिभगवइतिहप्रतिशुश्राव ॥ २ ॥ ब्रह्मणःसोम्यतेपादं ब्रवाणीतिब्रवीतुमेभगवानितितस्मैहोवाचप्राणःकलाचक्षुःकलाश्रोत्रंकलामनःकलैषवैसोम्यच तुष्कलःपादोब्रह्मणआयतनवान्नाम ॥ ३ ॥ सयएतमेवंविद्वा ँश्चतुष्कलंपादंब्रह्मणआयतनवा नित्युपास्तआयतनवानस्मिँल्लोकेभवत्यायतनवतोहलोकाञ्जयतियएतमेवंविद्वा ँश्चतुष्कलंपादं ब्रह्मणआयतनवानित्युपास्ते ॥ ४ ॥ ८ ॥

प्रापहाचार्यकुलंतमाचार्योभ्युवादसत्यकामा३इतिभगवइतिहप्रतिशुश्राव ॥ १ ॥

कंअनिरुद्धप्रद्युम्नाख्यंकलातृतीयंरूपं । मनःस्थंमनोनामकंअनिरुद्धानिरुद्धाख्यं कला चतुर्थंरूपं । आयतनवान् अवस्थान वान् । शिष्टंप्राग्वद्ध्येयं ॥ ३ ॥ ४ ॥ ८ ॥ वनान्निर्गतःसत्यकामोमार्गेत्रिरात्रीर्नीत्वाचतुर्थेह्निआचार्यकुलंप्राप्य तंसत्यकाम

माचार्योभ्युवाद । सत्यकामेत्यादिप्राग्वत् ॥ १ ॥ हेसोम्यब्रह्मविदिवभासि प्रकाशसे । त्वा त्वां । कोनुशशास शिक्षितवान् । इत्याचार्योभ्युवादेत्यर्थः । मनुष्येभ्योन्येऽनुशिक्षितवंतइतिसत्यकामःप्रतिजज्ञे । प्रतिज्ञातवान् । उवाचेतियावत् । तर्हिमयानुशासितव्यंनास्तिकिमित्यतआह ॥ भगवानिति । मेकामे कामाय । मदभीष्टसिद्ध्यर्थंभगवांस्त्वेवब्रूयात् ॥ २ ॥ कुतोमयैववाच्यमित्यतआह ॥ श्रुतमिति । भगवद्दृशेभ्यो महानुभावेभ्यः । श्रुतमेव । तथाप्याचार्यादेवहिविद्याविदिता

ब्रह्मविदिववैसोम्यभासिकोनुत्वानुशशासेत्यन्येमनुष्येभ्यइतिहप्रतिजज्ञेभगवांस्त्वेवमेकामेब्रूयात् ॥ २ ॥ श्रुतꣳह्येवमेभगवद्दृशेभ्यआचार्याद्ध्येवविद्याविदितासाधिष्ठंप्रापयतीति(ए)तस्मैहैतदेवोवाचात्रहनकिंचनवीयायेति(अत्रहनकिंचन)वीयायेति ॥ ३ ॥ ९ ॥

साधिष्ठंस्थिरत्वंसाधुत्वंचप्राप्नोतिहि । यतोतस्त्वयैववाच्यं । त्वमेवहिमयाआचार्यत्वेनवृतोनवृषभाविष्टवाय्वग्निब्रह्मवरुणाः । तेपिनाचार्यबुद्ध्यामामनुशिक्षितवंतोऽतस्त्वयैव कामायमेवाच्यमिति । तदाहसूत्रे । लिंगभूयस्त्वात्तद्धिबलीयस्तदपीति । एवंप्रार्थितआचार्यःएतस्मै सत्यकामाय । एतदेव वाय्वादिभिरुक्तमेवोवाच । गुरुत्वेनवृताद्भवतोन्येभ्यःश्रवणेन ममापराधोजातःकिमितिभावयंतंप्रत्याह ॥ अत्रहेति । देवेभ्यःश्रुतविषयेनकिंचनवीयाय नकाचिद्धानिरभूत् । देवेभ्यःश्रवणेन ते

नकोप्यपराधोजातइत्यर्थः । उक्तमेवनिर्धारयतिअत्रहीतिपुनर्वचनेन ॥ ३॥ ९ ॥प्रकारांतरेणचतुर्मूर्तिविषयविद्यां । ज्ञानिना ज्ञातव्यंमुक्तिकालेगंतव्यमार्गंचवक्ष्यंस्तदुपयुक्तांतावत्परापरब्रह्मनिष्ठांविद्यामाख्यायिकयाह ॥ उपकोसलइति । उपकोसलोनामतः । कामलस्यापत्यंकामलायनः । ब्रह्मचर्यं ब्रह्मप्राप्त्यर्थंचरणमुद्दिश्योवास । तस्य सत्यकामस्य । अग्नीन् गार्हपत्याहवनीयान्वाहार्यपचनरूपांस्त्रीनग्नीन्द्वादशवर्षाणिपरिचचार । सः सत्यकामः । अन्यानंतेवासिनः शिष्यान् । समावर्तयन्

उपकोसलोहवैकामलायनःसत्यकामेजाबालेब्रह्मचर्यमुवासतस्यहद्वादशवर्षाण्यग्नीन्परिचचार सहस्माअन्यानंतेवासिनःसमावर्तयꣳस्तꣳहस्मैवनसमावर्तयति ॥ १ ॥ तंजायोवाचतप्तो ब्रह्मचारीकुशलमग्नीन्परिचचारीन्मात्वाग्नयःपरिप्रवोचन्प्रब्रूह्यस्माइतितस्मैहाप्रोच्यैवप्रवासां चक्रे ॥ २ ॥

ब्रह्मोपादिश्यसमावर्तनंकारयन् । स्वस्वगृहंप्रतिगंतुमनुजानन् तमुपकोसलंनैवसमावर्तयति । हस्मेत्याश्चर्ये ॥१॥ तं भर्तारं । सत्यकामं जायोवाच । ब्रह्मचारीतप्तः क्लिष्टःसन् अग्नीन्कुशलंयथातथापरिचचारीत् पर्यचारीत् । चशब्दात्त्वांमांचपर्यचारीदित्यर्थः । ब्रह्मचारिणापरिचारिताअप्यग्नयस्त्वांप्रतिब्रह्मास्मैप्रब्रूहीति मापरिप्रावोचन् नैवोक्तवंतः । प्रब्रूह्यस्माइतिजायोवा

चेत्यन्वयः । तस्मैउपकोसलायाप्रोच्यैव ब्रह्मानुपदिश्यैवप्रवासांचक्रे । प्रोषितवान् ॥२॥ सउपकोसलः । व्याधिना विशिष्टाधिनामहामनोव्यथया । अनशितुमभोक्तुं । दध्रे मनश्चकार । तमुपकोसलं । अशान भुंक्ष्व । किन्नु किमर्थंनाश्नासि नभुंक्षे । सउपकोसलउवाच । नानात्ययाः नानाप्रकाराः । बहवःकामाः अस्मिन्पुरुषेकामाःकामनाविषयाःबहवःसंतिव्याधिभिःमहामनोव्यथाभिःपरिपूर्णोस्म्यतोनाशिष्यामीत्युवाचेत्यन्वयः ॥ ३ ॥ अथगुरोर्निर्गमनानंतरमितिवा गुरुणाब्रह्मणोनुपदिष्टत्वादि

सहव्याधिनानशितुंदध्रेतमाचार्यजायोवाचब्रह्मचारिन्नशानकिंनुनाश्नासीतिसहोवाचबहवइमेस्मिन्पुरुषेकामानानात्ययाव्याधिभिःप्रति(परि)पूर्णोस्मिनाशिष्यामीति ॥ ३॥ अथहाग्नयः समूदिरेतप्तोब्रह्मचारीकुशलंनःपरिचचारीद्धंतास्मैप्रब्रवामेतितस्मैहोचुः ॥ ४ ॥ प्राणोब्रह्मकंब्रह्मखंब्रह्मेतिसहोवाचविजानाम्यहंयत्प्राणोब्रह्मकंचतुखंचनविजानामीतितेहोचुर्यद्वावकंतदेवखंयदेवखंतदेवकमितिप्राणंचहास्मैतदाकाशंचोचुः ॥ ५ ॥ १० ॥

तिवा आत्मनांपरिचर्याकरणादितिवाथेत्यस्यार्थः । अग्नयः गार्हपत्यादयस्त्रयोग्निदेवाःसमूदिरे परस्परमूचुः । किमिति तप्तोब्रह्मचारीकुशलंयथातथानोऽस्मान्परिचारीत् पर्यचारीत् । अस्मैब्रह्मचारिणेब्रह्मप्रब्रवाम । हंत हर्षे । इत्यूचुरित्यन्वयः । इत्यन्योन्यंसंभाष्यहोमकुंडेभ्यउत्थितास्त्रयोग्निदेवास्तस्मैब्रह्मोचुर्हि ॥ ४ ॥ कथं प्राणोब्रह्म कंब्रह्म खंब्रह्मेति । प्राणो बलदेवतामुख्यवायुः ब्रह्म अपरंब्रह्म । कं नैजपरिपूर्णसुखरूपंविष्णवाख्यंब्रह्म । खंपरिपूर्णज्ञानबलात्मकंविष्णवाख्यंब्रह्मे

त्यूचुरित्यर्थः । सूत्रभाष्येतुब्रह्मपदंनविशेष्यपरं किंतुकखयोःपूर्णत्वरूपविशेषणपरमित्यभिप्रेतं । तदाहसूत्रे । सुखविशिष्टा भिधानादेवचेति । सएवमुक्तउपकोसलउवाच । प्राणोब्रह्मेतियदुक्तंतद्विजानामि । प्राणस्यमुख्यवायुतयाप्रसिद्धेः । कंच तुखंचनविजानामि । तेकिंप्राणादिवान्योन्यंभिन्ने उताभिन्ने इतिनविजानामीत्युवाचेत्यर्थः । एवमुक्तास्तेअग्नयस्तयोरभेद मूचुः ॥ **यद्वावकमिति** । यदेवखंतदेवकमितिपुनर्व्यत्यासेनवचनंमात्रयापिनभेदः । केवलंविशेषबलेनानंदरूपोज्ञानबल रूपइतिभेदेनव्यवहारमात्रमितिद्योतयितुं । प्राणंमुख्यवायुं आसमंतात्काशतेदीप्यतइतिव्युत्पत्त्याकाशाख्यंव्याप्तंहरिंचप रापरब्रह्मद्वयमूचुरित्यर्थः ॥ ५ ॥ १० ॥ ७ ॥ एवमग्निभिःसंभूयोक्तांपरापरब्रह्मनिष्ठांविद्यामुक्त्वाप्रत्येकंप्रत्येकंतैरुक्तांच

अथहैनंगार्हपत्योनुशशासपृथिव्यग्निरन्नमादित्यइतियएषआदित्येपुरुषोदृश्यतेसोहमस्मिसए वाहमस्मीति ॥ १ ॥

तुर्मूर्तिविषयांविद्यामाहवेदपुरुषः ॥ **अथहैनमित्यादित्रिभिःपर्वभिः** । अथेत्यस्यविद्यांतरमुच्यतइत्यर्थः । एवमग्रेपि । एनमुपकोसलमनुशशास । तत्प्रकारमाह ॥ **पृथिवीति** । पृथुत्वहेतुनापृथिवीनामकं । ब्रह्मेतिचतुर्ष्वपियोज्यं । अंगने तृत्वेनाग्निनामकंअग्निस्थंब्रह्म । अत्तृत्वहेतुनान्ननामकमन्नस्थंब्रह्म । नित्यमादिरूपतयाआदित्यनामकमादित्यस्थंब्रह्मेति पृथिव्यादिनामकानिचत्वारिरूपाणिपृथिवीब्रह्मेत्यादिरूपेणानुशशासेत्यर्थः । स्थानभेदेनरूपाणांभेदोनशंक्यइतिभावेनपृ थिव्याद्यंतर्यामिणःस्वांतर्यामिणश्चाभेदमाह ॥ **यएषइति** । आदित्यइत्युपलक्षणं पृथिव्यग्न्यन्नादित्येषुयएषपुरुषो

हरिर्दृश्यतेदिव्यदृष्टिविषयोस्ति सोहमहेयत्वहेतुना चेतनखंडतयावर्तमानोस्मि । इंद्रार्जुनादिवदवांतरविशेषोपिने
तिभावेनाह ॥ **सएवाहमस्मीति** । सोहमस्मीतिपूर्वोक्तिरभेदेतात्पर्याधिक्यज्ञापनार्था । इतिचानुशशासेतीतिप
दस्यपूर्वेणान्वयः ॥ १ ॥ योधिकारीएतंपृथिव्यादिचतुष्टयांतर्यामिणमेवंगार्हपत्यांतर्याम्यभेदेनविद्वानुपास्ते सःपाप
कृत्यामपहते अपहंति । लोकी भगवल्लोकवान्भवति सर्वमायुरेति उत्तरावधिशून्यायुष्मान्भवति । ज्योक् प्र

**सयएतमेवंविद्वानुपास्तेपहतेपापकृत्यांलोकीभवतिसर्वमायुरेतिज्योग्जीवतिनास्यापरपुरुषाः
क्षीयंतउपवयंतंभुंजामोस्मिंश्चलोकेमुष्मिंश्चयएतमेवंविद्वानुपास्ते ॥ २ ॥ ११ ॥**

**अथहैनमन्वाहार्यपचनोनुशशासापोदिशोनक्षत्राणिचंद्रमाइतियएषचंद्रमसिपुरुषोदृश्यतेसो
हमस्मिसएवाहमस्मीति ॥ १ ॥ सयएतमेवंविद्वानुपास्तेपहतेपापकृत्यांलोकीभवतिसर्वमायुरे
तिज्योग्जीवतिनास्यावरपुरुषाःक्षीयंतउपवयंतंभुंजामोष्मिंश्चलोकेऽमुष्मिंश्चयएतमेवंविद्वानु
पास्ते ॥ २ ॥ १२ ॥**

काशवान् जीवति । अस्योपासकस्याप(व)रपुरुषाः भृत्यजनाः । नक्षीयंते भृत्यवानेवभवतीत्यर्थः । यएवंविद्वा
नुपास्ते तंवयमुपभुंजामः पालयामोलोकद्वयेपीत्यग्नयऊचुरित्यर्थः ॥ २ ॥ ११ ॥ अथगार्हपत्योपदेशानंतरं ।
अन्वाहार्यश्चरुःपच्यतेत्रेत्यन्वाहार्यपचननामादक्षिणाग्निः । किमित्यनुशशासेत्यतआह । आपोदिशोनक्षत्राणिचंद्रमा

इति । प्रत्येकंब्रह्मपदान्वयः । आसमंतात्पालनहेतुनाऽऽपइत्युक्तोप्सुस्थितःब्रह्म । अभीष्टदेशनाद्दिङ्नामादिक्षुस्थितः ब्रह्म । अनन्याधीनत्वहेतुना नक्षत्रनामानक्षत्रगतःब्रह्म । आनंदरूपतयाचंद्रनामाचंद्रांतःस्थोयःसब्रह्मेत्यर्थः । यएषइत्यादेःपूर्ववदेवगमनिकार्थश्चज्ञेयः ॥१॥२॥१२॥ अथेतिप्राग्वत् । प्राणोब्रह्म आकाशोब्रह्म द्यौर्ब्रह्म विद्युद्ब्रह्मेत्यनुशशासेत्यन्वयः । प्राणस्थोबलरूपत्वात्प्राणनामा । पदार्थपूरणावकाशदातृतयाकाशनामाकाशस्थः । प्रकाशरूपत्वात्द्यौर्नामा ।

अथहैनमाहवनीयोनुशशासप्राणआकाशोद्यौर्विद्युदितियएषविद्युदितिपुरुषोदृश्यतेसोहमस्मि सएवाहमस्मीति ॥१॥ सयएतमेवंविद्वानुपास्तेपहतेपापकृत्यांलोकीभवतिसर्वमायुरेतिज्योग्जीवतिनास्यावरपुरुषाःक्षीयंतउपवयंतंभुंजामोस्मिंश्चलोकेमुष्मिंश्चयएतमेवंविद्वानुपास्ते ॥ २ ॥१३॥ तेहोचुरुपकोसलैषासोम्यतेस्मद्विद्यात्मविद्याचाचार्यस्तुतेगतिंवक्तेत्याजगामहास्याचार्यस्तमाचार्योभ्युवादोपकोसला३इति ॥ १ ॥

वेदनाद्विद्युन्नामेत्यर्थः । यएषविद्युतीत्यादिपूर्ववत् ॥ १ ॥ २ ॥ १३ ॥ एवंत्रेताग्निभिःसंभूयप्रत्येकंचोपदिश्योक्तंद्विरूपोपदेशंनिष्कृष्यानुवदन् । अन्यदपितैरुक्तमित्याहश्रुतिः ॥ तेहोचुरित्यादिना । सोहमित्यादिनोक्ता । अंतर्यामिविषयत्वादस्मद्विद्या कंब्रह्मेत्यादिनोक्ताव्याप्तरूपविषयत्वादात्मविद्या अस्माभिरुक्ता । आचार्यस्तुतेगतिं कर्मणिकरणेचव्युत्पादनीयोयं ॥ ६१ ॥

शब्दः । प्राप्यं तत्प्राप्त्युपायभूतंमार्गंच वक्तावदिष्यतीतिचोचुरित्यर्थः । आजगामेत्यादिव्यक्तं ॥ १॥ कोनुत्वानुशशासेतिप्रश्नस्यकथंकोनुमानुशिष्यादितिमृषोक्तिरित्यतःस्वाभिप्रायंव्यनक्ति ॥ इहेति ॥ इहचअवचेतिइहावे । इहेतिभूमिगामनुष्याः । अवेतिपातालस्थाअसुराः । उभयेभगवंतंनिह्नुतःअपलापंकुरुतः । अतएवनवक्तुंशक्ताःकिंतुदेवाएवेत्याह ॥ इमइति । ईदृशाः ज्वालारूपाः अन्यादृशाः करचरणादिमंतः । इतिहाग्नीनभ्यूदे स्पष्टमुवाच । आचार्योवक्तिकिंनुसोम्येति । हेसोम्यतेग्नयः

भगवइतिहप्रतिशुश्रावब्रह्मविदइवसोम्यतेमुखंभातिकोनुत्वानुशशासेतिकोनुमानुशिष्याद्भो इतीहावेवनिह्नुतइमेनूनमीदृशाअन्यादृशाइती(ति)हाग्नीनभ्यूदेकिंनुसोम्यकिलतेऽवोचन्निति ॥ २ ॥ इदमितिहप्रतिजज्ञेलोकान्वावकिलसोम्यतेऽवोचन्नहंतुतेतद्वक्ष्यामियथापुष्करपलाशआपोनश्लिष्यंतएवमेवंविदिपापंकर्मनश्लिष्यतइतिब्रवीतुमेभगवानितितस्मैहोवाच ॥ ३ ॥ १४ ॥

किमवोचन् ॥ २ ॥ इतिप्रश्नस्योत्तरंइदमितिप्रतीकपूर्वंप्रतिजज्ञेप्रतिज्ञातवान् । लोकान् पृथिव्यादिलोकस्थभगवद्रूपाणि । तेवोचन्नित्यादिसत्यकामवाक्यं । वक्ष्यमाणब्रह्मविद्यायामादरजननायादावेवमायासंगत्वापादकज्ञानविषयत्वमहिमानमाह ॥ तद्यथेति । वक्ष्यमाणनिदर्शनं । यथापुष्करपलाशे पद्मपत्रे । एवं एवंवक्ष्यमाणप्रकारेणभगवज्ज्ञानिनिपापंकर्मनश्लिष्यतेनलिप्तंभवतियज्ज्ञानात्पापाश्लेषरूपमुक्तिर्भवतितद्वस्तुअहंवक्ष्यामीत्याचार्योऽवोचदित्यर्थः । ब्रवीतुभगवानित्युपकोसलउवाच ।

तस्मैउपकोसलायोवाचहाचार्यः ॥३॥१४॥ आचार्योक्तविद्यामाहश्रुतिः ॥ यएषइति । अंतरक्षणिअक्ष्यंतः । पुरुषःपूर्णषङ्गुणत
यापुरुषनामा । यएषदृश्यते दिव्यदृष्टिविषयःसन्नास्ते । एषपुरुषआत्मा । आदानादिकर्तृत्वेनवा आदेयंउपादेयंसुखं मा
त्यनुभवतीतिवाआत्मेत्युक्तः । तस्यगुणानाह ॥ एतदिति ॥ विधेयापेक्षयानपुंसकं । एषःआत्मेत्युक्तोक्ष्यंतस्थःपुरुषअमृत
मभयमेतद्ब्रह्मपूर्णमित्युवाचहेत्यर्थः । तदाहसूत्रे । अंतरउपपत्तेरिति । एतस्मिन्चक्षुःस्थेहरौ । नकिंचनश्लिष्यति लिप्तंनभ

यएषोंतरक्षणिपुरुषोदृश्यतेएषआत्मेतिहोवाचैतदमृतमभयमेतद्ब्रह्मैतस्मिन्नाकिंचनश्लिष्यतितद्य
द(द्यप्य)स्मिन्त्सर्पिर्वोदकंवा(पि)सिंचतिवर्त्मनीएवगच्छति ॥ १ ॥ तꣳसंयद्वामइत्याचक्षतएत
ꣳह्सिर्वाणिवामान्यभिसंयंतिसर्वाण्येनंवामान्यभिसंयंतियएवंवेद ॥ २ ॥

वति । तत्रज्ञापकमाह ॥ तद्यदिति । तत् तस्मादसंगभगवत्स्थानत्वाद्यत् यदि । अस्मिन् चक्षुषि कश्चित्सर्पिर्वाउदंकर्वाअ
पिपदादन्यद्वासिंचति तत्वर्त्मनीअधरोत्तरपार्श्वौप्रत्येवगच्छतिनश्लिष्यतीतिचोवाचेत्यर्थः ॥१॥ चक्षुषोसंगत्वापादकस्यासंग
पुरुषस्यविष्णुत्वेज्ञापकांतरमप्याह ॥ एतमिति । एतंचक्षुःस्थासंगपुरुषंसंयद्वामः संयंतिप्राप्नुवंतिवामानिभद्राण्यस्येतिसंयद्वा
मइत्याचक्षतेप्राज्ञाः । कुतः हियस्मादेतंसर्वाणिवामानि भद्राण्यभिसंयंत्यतइत्यर्थः । ज्ञानिनःफलमाह । सर्वाणीति ॥ एनं

ज्ञानिनंवामानिभद्राण्यभिसंयंति प्राप्नुवंति ॥२॥ एष चक्षुरंतस्थोहरिः। वामनिः। उ खल्वित्यर्थः। कुतः। हियस्मादेषचक्षुरंतस्थः सर्वाणिवामानि। वामंसौंदर्यंतत्प्रधानत्वात्स्त्रीकदंबानि नयतिप्रेरयत्यतइत्यर्थः। वामनीरेववामनिः। ह्रस्वश्छांदसः। ज्ञानिनःफलमाह ॥ सर्वाणीति । अनेकस्त्रीनियंतामुक्ताविहचभवतियएवंवेदेत्यर्थः ॥ ३ ॥ एषएवभामनिःभामंओजः तत्प्रधानत्वात्पुरुषजातानि। तानिनयतीति। भामनीरेवभामनिः। सर्वपुरुषनेतेत्यर्थः। तस्यगुणांतरंचाह॥ एषहीति। अक्षिस्थः

एषउएववामनिरेषहिसर्वाणिवामानिनयतिसर्वाणिवामानिनयतियएवंवेद ॥ ३ ॥ एषउएव भामनिरेषहिसर्वेषुलोकेषुभातिसर्वेषुलोकेषुभातियएवंवेद ॥ ४ ॥ अथयदुचैवास्मिञ्छव्यंकुर्वंतियदुचनार्चिषमेवाभिसंभवं(विशं)त्यर्चिषोहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेतिमासा२ंस्तान्मासेभ्यःसंवत्सर२ंसंवत्सरादादित्यमादित्याचंद्रमसंचंद्रमसोविद्युतंतत्पुरुषोमानवः ॥ ५ ॥

हिप्रसिद्धं। ज्ञानिनःफलमाह॥ सर्वेष्विति। तदाहसूत्रे। स्थानादिव्यपदेशाच्चेति॥४॥चाक्षुषपुरुषज्ञानिनोमाहात्म्यंप्रकाशयन् तस्यगम्यंमार्गंचाह॥ अथेति। अर्थांतरे। यदुचयद्यप्यस्मिन्चाक्षुषपुरुषस्योक्तरूपस्यज्ञानिनिमृते। शव्यं शवसंबंधिदहनाद्युत्तरकर्म कुर्वंति। यदुच यदिचनकुर्वंति। सज्ज्ञानी अर्चिषमर्चिर्लोकमेवाभिसंविशति प्राप्नोति। यद्वापूर्वमस्मिन्निति ज्ञानिसमुदाया

भिप्रायं तेर्चिषमभिसंविशंति प्राप्नुवंतीतियथाश्रुतएव नविपरिणामः । अर्चिषोर्चिर्लोकात् । अहःअहरभिमानिलोकं । संविशं तीतिसर्वत्रानुषज्यते । अह्नोअहर्लोकादापूर्यमाणपक्षं । शुक्लपक्षाभिमानिलोकं । तस्मात्यान्षण्मासान्उदङ्याति सूर्यःउत्तरायणाभिमानिलोकमितियावत् । तस्माच्चसंवत्सराभिमानिलोकं तस्माच्चादित्यमंडलं तस्माच्चंद्रमंडलं तस्माच्चवैद्युतं विद्युन्नामक वायुपत्नीलोकं । तत्पुरुषः तस्याविद्युन्नामवाण्याभर्ता । मानवोवायुः । विद्युल्लोकात्तमितिशेषः । अभिसंविशतीत्यनुषंगः ॥५॥ सवायुःएनान्चाक्षुषपुरुषज्ञानिनः । ब्रह्मगमयतिप्रापयति । तदाहसूत्रे । श्रुतोपनिषत्कगत्यभिधानादिति । वैद्युतेनैवततस्तच्छ्रुतेरितिच । अत्रप्रतीकालंबनान्कार्यंब्रह्मचतुर्मुखंनयत्यप्रतीकालंबनान्परंब्रह्मनयतीतिब्रह्मपदस्य कार्यब्रह्मपरब्रह्मोभयपरत्वम

सएनान्ब्रह्मगमयत्येषदेवपथोब्रह्मपथएतेनखलुप्रतिपद्यमानाइमंमानवमावर्तंनावर्ततेनावर्तंते॥६॥१५॥

धिकारिभेदेनज्ञेयं । तदाहसूत्रकारः । कार्यंबादरिरस्यगत्युपपत्तेः । परंजैमिनिर्मुख्यत्वात् । अप्रतीकालंबनान्नयतीत्यादि । अर्चिरादेर्जडत्वभ्रांतिंनिवारयति । एषदेवपथोदेवैरभिमन्यमानमार्गः ब्रह्मपथः ब्रह्मप्राप्तिमार्गः । एतेनार्चिरादिनापथाप्रतिपद्यमानाः ब्रह्मप्राप्नुवंते । इमंमानवमावर्तं मानवा मनुष्याःयत्रावर्ततेसोयंमानवावर्तः । सएवमानवआवर्तःअलुक्समासः । तंमानवमावर्तं जननमरणादिरूपसंसारंप्रति । नावर्तंते मुक्ताएवभवंतीति । विकारावर्तिचतथाहिदर्शयतीतिसूत्रभाष्यादौ तुमानवमावर्तंसंसारंनावर्तंते नावर्तयंतीत्यर्थमुपेत्यमुक्तानांसंसारिविषयव्यापारोनेत्यर्थपरतयाव्याख्यातं ॥ ६ ॥ १५ ॥

पूर्वत्रसंवर्गविद्याविषयत्वेनोपक्रांतोवायुःप्राणोब्रह्मेत्यपरब्रह्मत्वेनप्रकृतः । सएनान्ब्रह्मेत्यव्यवधानेनपूर्वंपरामृष्टश्चेति । तद्विषयामन्यामपियज्ञविद्यामाह ॥ एषहेत्यादिना । योयंपवतेवातिएषवायुर्यज्ञोहवै । सर्वयज्ञाभिमानीयज्ञेसन्निहितोयज्ञनामा । कथमित्यतोनिर्वक्ति ॥ एषइति । एषवायुःयन्गच्छन्नेवसर्वमिदंपुनाति पवित्रयति । यद्यस्मादेषवायुःगच्छन्नेवेदंसर्वंपुनातितस्माद्धेतोःएषवायुरेवयज्ञः । इण्गतावित्यस्यशतृप्रत्ययेसुबादौयन्निति रूपं । ज्ञशुद्धभावइतिधातोः क्विपिज्ञइतिरूपंनिरुक्तिबलात्पूर्वपदांत्यलोपेयज्ञइतिसिद्धेरितिभावः । यज्ञाख्यवायोःपादावस्थितिस्थानमाह ॥ तस्ये

एषहवैयज्ञोयोयंपवतएषयन्निदꣳसर्वंपुनाति यदेषयन्निदꣳसर्वंपुनातितस्मादेषएवयज्ञस्तस्यमनश्चवाक्चवर्तनी ॥ १ ॥ तयोरन्यतरांमनसासꣳस्करोतिब्रह्मा वाचाहोताध्वर्युरुद्गातान्यतरांस (अथ)यत्रोपाकृतेप्रातरनुवाकेपुरापरिधानीयायाब्रह्माव्यपवदति ॥ २ ॥

ति । तस्यवायोःमनश्चवाक्चवर्तनी पादौ । मनोवाचोर्वर्ततेताभ्यांपादावित्यर्थः ॥ १ ॥ तयोःपादयोरन्यतरांमनःसंस्थांवर्तनिं दक्षिणपादं । ब्रह्माब्रह्मर्त्विक्मनसामौनेनसंस्करोतिपूजयति । होताध्वर्युरुद्गातेतित्रयोऋत्विजःवाचा उपलक्षणं । क्रमाद्वाचा मंत्रैः । अध्वर्युर्होमादिकर्मणा । सामगानेनोद्गाताचान्यतरांवाचिस्थितांवर्तनिंवामपादंसंस्करोतीत्यनुषज्यते । प्रत्येकमन्वयः । ब्रह्मर्त्विजःकदामौनं तद्भंगेचकिमनिष्टमित्यतः तद्भंगेऽनिष्टोक्त्यामौनकालंनियमयति ॥ अथेति । यत्र यदि । प्रात

रनुवाके उपाकृते उपक्रांते । परिधानीयायाः कर्मसमापिकायाः अंत्यायाऋचः जपात्पुरा ब्रह्मा व्यपवदति वाचंविसृजति ॥ २ ॥ तदाहोत्राद्यास्त्रयऋत्विजः अन्यतरांवाचिस्थितांवामवर्तनिमेवसंस्कुर्वंतिपूजयंति । हीयतेअन्यतरामनःस्थितादक्षिणवर्तनिः । ततश्चकिमित्यतआह ॥ सयथेति । एकपात्मनुष्योव्रजन्गच्छन्रथोवाएकेनचक्रेणवर्तमान

अन्यतरामेववर्तनिꣳसंस्कुर्वंतिहीयतेन्यतरासयथैकपाद्व्रजन्रथोवैकेनचक्रेणवर्तमानोरिष्यत्येवमस्ययज्ञोरिष्यतियज्ञꣳरिष्यंतंयजमानोनुरिष्यतिसइष्ट्वापापीयान्भवति ॥३॥ अथयत्रोपाकृतेप्रातरनुवाके नपुरापरिधानीयायाब्रह्माव्यपवदत्युभेएववर्तनीसꣳस्कुर्वंतिनहीयतेन्यन्तरा ॥४॥ सयथोभयपाद्व्रजन्रथोवोभाभ्यांचक्राभ्यांवर्तमानःप्रतितिष्ठत्येवमस्ययज्ञःप्रतितिष्ठतियज्ञंप्रतितिष्ठंतंयजमानोनुप्रतितिष्ठतिसइष्ट्वाश्रेयान्भवति ॥ ५ ॥ १६ ॥

प्रजापतिर्लोकानभ्यतपत्तेषांतप्यमानानाꣳरसान्प्राबृहदग्निंपृथिव्यावायुमंतरिक्षादादित्यंदिवः ॥१॥

स्तिष्ठन्रिष्यति नश्यति । एवमस्ययजमानस्ययज्ञोरिष्यति । रिष्यंतंयज्ञमनु यजमानोरिष्यति । तद्धनक्ति । सयजमानइष्ट्वापापीयान्भवतीति ॥ ३ ॥ तर्हिमौनस्याभंगेकिंभवतीत्यतआह ॥ अथयत्रेति । नव्यपवदतीत्यन्वयः । शिष्टंस्पष्टं ॥ ४ ॥ ५ ॥ १६ ॥ ब्रह्मादिऋत्विजांमौनादिनियमभंगेप्रसक्तयज्ञपादलोपसंधायकंव्याहृतिहोमंवक्ष्यन्व्याहृतिमा

हात्म्यंक्रमाद्वदंस्ताभिर्होमप्रकारंचाह ॥ प्रजापतिरित्यादिना । प्रजापतिर्भगवान्लोकानभ्यतपत् सारत्वेनव्यजानात्ते षांलोकानांतप्यमानानां भगवताविज्ञायमानानां सकाशात्रसान् सारान्प्राबृहत् निरगमयत् । तद्यनक्ति ॥ अग्निमिति। पृथिव्याअग्निंप्राबृहदित्यनुषंगः । वायुं नासिक्यवायुमंतरिक्षात् । आदित्यंदिवः ॥१॥ प्रजापतिःएतास्तिस्रोऽग्न्यादिदेवताः। अग्नेरित्यादिपंचमी । ऋचः ऋचामभिमानीब्रह्मा । वायोःनासिक्यवायुतः । यजूंषि यजुषामभिमानीहरः । आदित्यात्सा

सएतास्तिस्रोदेवताअभ्यतपत्तासांतप्यमानानाᳬरसान्प्राबृहदग्नेर्ऋचोवायोर्यजूᳬषिसामान्यादित्यात् ॥ २ ॥ सएतांत्रयींविद्यामभ्यतपत्तस्यास्तप्यमानायारसान्प्राबृहद्भूरित्यृग्भ्योभुवइतियजुर्भ्यःस्वरितिसामभ्यः ॥ ३ ॥ तद्यदृक्तोरिष्येद्भूःस्वाहेतिगार्हपत्येजुहुयादृचामेवतद्रसेनर्चांवीर्येणर्चांयज्ञस्यविरिष्ट(ष्टि)ᳬसंदधाति ॥ ४ ॥

मानि । साम्नामभिमानीवायुः ॥ २ ॥ ऋग्भ्यः ऋङ्मान्चितुर्मुखात् । भूरितिनामानंवराहं प्राबृहत् रसत्वेनोदबर्हयत् । यजुर्भ्यःयजुर्मानिरुद्रात् । भुवइतिनामानंनृसिंहंप्राबृहत् । सामभ्यः साममानिवायुतः । स्वरितिनामानंकपिलंप्राबृहत् ॥३॥ तत् तस्माद्याहृतीनांसर्वसारत्वाद्यदिऋक्तःरिष्येत् ऋग्वेदात्रिष्येत् । ऋग्जपमौनादिहान्यायज्ञोवैगुण्यंप्राप्नुयात् तर्हिभूःस्वाहेत्युक्त्वागार्हपत्येजुहुयात् । ऋचांतद्रसेन तस्यविवरणंऋचांवीर्येण । भूरित्यनेनहोमेकृतइतिशेषः। यज्ञस्यऋचांसकाशात्प्राप्तां

विरिष्टिंभ्रंशंसंदधाति ॥४ ॥ अथयजुष्टइत्यादिवाक्यद्वयेप्येवमर्थोध्येयः ॥ ५ ॥ ६ ॥ उक्तमेवविरिष्टिसंधानमनुभवारूढंक रोति ॥ तद्यथेति । तन्निदर्शनं । यथाभिन्नसुवर्णानामग्निपाकेलवणक्षारेणद्रवीभूयैकीभवनरूपसंधानदृष्टेरितिभावः । शि ष्टंस्पष्टं ॥ ७ ॥ एवमेषांपृथिव्यादिलोकानांआसामग्न्यादिदेवतानामस्यास्त्रय्याविद्यायावीर्येण भूरित्यादिव्याहृतित्रयेणयज्ञ

अथयदियजुष्टोरिष्येद्भुवःस्वाहेतिदक्षिणाग्नौजुहुयाद्यजुषामेवतद्रसेनयजुषांवीर्येणयजुषांयज्ञस्य विरिष्ट(ष्टि)ंसंदधाति ॥ ५ ॥ अथयदिसामतोरिष्येत्स्वःस्वाहेत्याहवनीयेजुहुयात्साम्नामेवतद्र सेनसाम्नांवीर्येणसाम्नांयज्ञस्यविरिष्ट(ष्टि)ंसंदधाति ॥ ६ ॥ तद्यथालवणेनसुवर्णंसंदध्यात्सुव र्णेनरजतंरजतेनत्रपुत्रपुणासीसंसीसेनलोहंलोहेनदारुदारुचर्मणा ॥ ७ ॥ एवमेषांलोकाना मासांदेवतानामस्यास्त्रय्याविद्यायावीर्येणयज्ञस्यविरिष्ट(ष्टि)ंसंदधातिभेषजकृतोहवाएषयज्ञो यत्रैवंविद्ब्रह्माभवति ॥ ८ ॥

स्यविरिष्टिंसंदधाति । एवंसंधितोयज्ञःसम्यक्समाप्तयज्ञवत्फलंदद्यात् किमित्यतआह ॥ भेषजेति । यत्रयज्ञेएवंविद्वान् य ज्ञपादभंगादिपरिहारज्ञानी ब्रह्माभवति। एषयज्ञःभेषजकृतःरोगार्तःपुमान्निपुणाचिकित्सककृतौषधेननीरोगइव । भेषजकृतः ॥ ६५ ॥

प्रायश्चित्तरूपव्याहृतिहोमाख्यौषधकृतः ॥८॥ तर्हिफलंनद्यात् किमित्यतोदद्यादेवेत्याह ॥ एषहवाइति । यत्र यज्ञेएवंवि द्ब्रह्माभवति एषयज्ञः उदक्प्रवणः ऊर्ध्वप्रवणः । ऊर्ध्वलोकानुसारीत्यर्थः । मौनादिनियमभंगात् भग्नमपियज्ञंसंधित्वायज मानादेःफलप्रदंकरोतिब्रह्मेत्यत्रगाथास्तीत्याह ॥ एवमिति । एवंविदं भग्नयज्ञसंधानविदं ब्रह्माणमृत्विजमनु । तन्निमित्ता तद्विषयिणीतत्स्तुतिरूपागाथा । हवै प्रसिद्धास्ति । तामाह ॥ यतोयतइति । यजमानोयज्ञस्यदुरिष्टयायतोयतःपुण्यलोक

एषहवाउदक्प्रवणोयज्ञोयत्रैवंविद्ब्रह्माभवत्येवंविदंहवाएषाब्रह्माणमनुगाथायतोयतआवर्तते तत्तद्गच्छति ॥ ९ ॥ मानवोब्रह्मैवैकऋत्विक्कुरूनश्वाभिरक्षत्येवंविद्धवैब्रह्मायज्ञंयजमानंसर्वांश्च ऋत्विजोभिरक्षतितस्मादेवंविदमेवब्रह्माणंकुर्वीतनानेवंविदंनानेवंविदं ॥ १० ॥ १७॥

इतिश्रीमच्छांदोग्योपनिषदिचतुर्थोध्यायः ॥ ४ ॥

स्थानादावर्ततेतत्तत्स्थानमेवंविदाब्रह्मर्त्विजागच्छति ॥ ९ ॥ मानवो मौनेनभगवंतंध्यायन् ब्रह्मैकएवऋत्विक्कुरून्यज्ञकर्तृ न्यजमानादीन्सर्वान्अश्वा। आशुवातिजानातियज्ञभ्रंशमित्याश्वा । आश्वैवअश्वा॰शीघ्रंतत्तदीयंदोषंज्ञात्वाभिरक्षतिसर्वा नित्यर्थः । गाथार्थंस्वयमेवश्रुतिर्व्यनक्ति ॥ एवंविदिति । तस्माद्भग्नयज्ञसंधायकत्वाद्ब्रह्माणंऋत्विजंकुर्वीत । नानेवंविद

मितिद्विरुक्तिरादरार्था ॥ १० ॥ १७ ॥ ७ ॥ इतिश्रीमच्छांदोग्योपनिषत्खंडार्थराघवेंद्रयतिविरचितेचतुर्थोऽध्यायःसंपूर्णः ॥४॥
संवर्गविद्यायामन्न्यादिसर्वभक्षकतया यज्ञविद्यायांसर्वसिद्धिकर्तृत्वेनवायुःप्रकृतः । मुमुक्षोस्तत्प्रसादस्यसर्वथापेक्षितत्वात्तद्वि
षयांप्राणविद्यामाह ॥ योहवाइति । प्रसिद्धोयोधिकारी । ज्येष्ठं वयसोत्तमं । श्रेष्ठं गुणतउत्तमं । वेद समुक्तौस्वजाती
यानांमध्ये ज्येष्ठश्चश्रेष्ठश्चभवतिहवै । कोवाज्येष्ठश्चश्रेष्ठश्चेत्यतआह ॥ प्राणोवाइति ॥ १ ॥ योहवैवसिष्ठं वसतामुत्तमं ।

हरिः ॐ ॥ योहवैज्येष्ठंचश्रेष्ठंचवेदज्येष्ठश्चहवैश्रेष्ठश्चभवति प्राणोवावज्येष्ठश्चश्रेष्ठश्च ॥१॥ योहवै
वसिष्ठंवेदवसिष्ठोहस्वानांभवति वाग्वाववसिष्ठः ॥ २ ॥ योहवैप्रतिष्ठांवेदप्रतिहतिष्ठत्यस्मिंश्च
लोकेमुष्मिंश्चचक्षुर्वावप्रतिष्ठः ॥ ३ ॥ योहवैसंपदंवेदसꣳहास्मैकामाः(प्र)पद्यंतेदैवाश्चमानुषाश्च
श्रोत्रंवावसंपत् ॥ ४ ॥ योहवाआयतनंवेदायतनꣳहस्वानांभवति मनोहवाआयतनं ॥ ५ ॥

वाक् वागिंद्रियमानीवह्निः । वसिष्ठः समीपेवसतामुत्तमः ॥ २ ॥ प्रतिष्ठां स्थितिहेत्विंद्रियदैवतं । प्रतितिष्ठति यत्रस्थातु
मिच्छतितत्रसुखंतिष्ठतीत्यर्थः । चक्षुश्चक्षुर्मानीसूर्यः ॥ ३ ॥ संपदं संपद्धेत्विंद्रियमानिनं । संप्रपद्यंते दैवाश्चमानुषाश्च का
माइत्यन्वयः । श्रोत्रंश्रोत्रमानींद्रः ॥ ४ ॥ आयतनं गृहप्रासादाद्यायतनहेत्विंद्रियमानिनं । मनः मनोभिमानीरुद्रः ॥ ५ ॥

वायोःसंहर्तृत्वोपयुक्तमतिबलिष्ठत्वंमीमांसयासाधयति ॥ अथहेति । प्राणाः वागादींद्रियमानिनः । अहंश्रेयसि अहंश्रेया नहंश्रेयानित्येवंस्वस्वश्रैष्ठ्यविषये । व्यूदिरे विवादंकृतवंतः । अहंश्रेयसीत्युक्तंव्यनक्ति ॥ अहमिति । इतिव्यूदिरेइत्यन्वयः ॥ ६ ॥ ते एवंविवदमानाः । प्राणाः वागाद्यभिमानिनोवन्ह्याद्याः । पितरंप्रजापतिंब्रह्माणमेत्यप्राप्य । हेभगवन्नो

अथहप्राणाअहꣳश्रेयसिव्यूदिरेऽहꣳश्रेयानस्म्यहꣳश्रेयानस्मीति ॥ ६ ॥ तेहप्राणाःप्रजापतिंपितरमेत्योचुर्भगवन्कोनःश्रेष्ठइति तान्होवाचयस्मिन्वउत्क्रांतेइदंशरीरंपापिष्ठतरमिवदृश्येतसवःश्रेष्ठइति ॥ ७ ॥ साहवागुच्चक्राम सासंवत्सरंप्रोष्यपर्यैत्योवाचकथमशकततेंमज्जीवितुमिति यथाऽकलाअवदंतःप्राणंतःप्राणेनपश्यंतश्चक्षुषाशृण्वंतःश्रोत्रेणध्यायंतोमनसैवमितिप्रविवेशहवाक् ॥ ८ ॥ चक्षुर्होच्चक्रामतत्संवत्सरंप्रोष्यपर्यैत्योवाच कथमशकततेंमज्जीवितुमिति यथांधाअपश्यंतःप्राणंतःप्राणेनवदंतोवाचाशृण्वंतःश्रोत्रेणध्यायंतोमनसैवमितिप्रविवेशहचक्षुः॥९॥

स्माकंमध्ये कःश्रेष्ठइत्यूचुरित्यन्वयः । वःयुष्माकंमध्येयस्मिन्नुत्क्रांतइदंमदीयंशरीरंपापिष्ठतरमिवहेयमिवशवतुल्यंदृश्येत । वःयुष्माकंमध्येसश्रेष्ठइतितान्प्राणानुवाचहब्रह्मेतियोजना ॥ ७ ॥ एवंप्रजापतिनोक्तादेवाःब्रह्मदेहादुत्क्रांताः । तथापिदेहोनपापिष्ठआसीन्मुख्यवायोरुत्क्रांतौतथासीदित्याह ॥ साहेति । वागादयोदेवाइतिज्ञेयं । उच्चक्राम विरिंचदेहान्निर्ययौ । प्रोष्य

प्रसवासंकृत्वा । पर्येत्य आगत्य । मद्दतेजीवितुंकथमशकतशक्ताअभवन्भवंतइतिदेहस्थानन्यान्देवानुवाचेतियोजना ॥ ८ ॥
एवमग्रेपि । एवमुक्तास्तेवाचंप्रत्यूचुः ॥ **यथेत्यादि** । अकलाः मूकाः । प्राणेन घ्राणेनप्राणंतःश्वसंतः । एवमजीविष्मेत्यूचु
रित्यर्थः । एवमग्रेपिज्ञेयं ॥ ९ ॥ १० ॥ अमनसः प्राणेतरमनोभिमान्यनधिष्ठितमनस्काः ॥ ११ ॥ पड्वीशशंकून्हयबंधनरज्ज्वा

**श्रोत्रꣳहोच्चक्रामतत्संवत्सरंप्रोष्यपर्येत्योवाचकथमशकतर्तेमज्जीवितुमिति यथाबधिराअशृण्वं
तःप्राणंतःप्राणेनवदंतोवाचापश्यंतश्चक्षुषाध्यायंतोमनसैवमिति प्रविवेशहश्रोत्रं ॥ १० ॥ मनो
होच्चक्रामतत्संवत्सरंप्रोष्यपर्येत्योवाचकथमशकतर्तेमज्जीवितुमिति यथाबालाअमनसःप्राणंतः
प्राणेनवदंतोवाचापश्यंतश्चक्षुषाशृण्वंतःश्रोत्रेणैवमिति प्रविवेशहमनः ॥ ११ ॥ अथहप्राणउच्चि
क्रमिषन्त्सयथासुहयःपड्वीशशंकून्संखिदेदेवमितरान्प्राणान्त्समखिदत्तꣳहाभिसमेत्योचुर्भगव
न्नेधित्वंनःश्रेष्ठोसिमोत्क्रमीरिति ॥ १२ ॥ अथहैनंवागुवाचयदहंवसिष्ठास्मित्वंतद्वसिष्ठोसीत्यथ
हैनंचक्षुरुवाचयदहंप्रतिष्ठास्मित्वंतत्प्रतिष्ठोसीति ॥ १३ ॥**

श्रयाणीन् । समखिदत्उद्बबर्ह । तंप्राणं । सर्वेवागादयोदेवाःअभिसमेत्य हेभगवन् एधि भव । आस्स्वेतियावत् । मोत्क्रमीः । नो
ऽस्माकंमध्येत्वंश्रेष्ठोसीत्युचुः ॥१२॥ श्रेष्ठोऽसीत्युक्तंगुणतआधिक्यंविविच्याह ॥ **अथहैनमिति** । वसिष्ठत्वादयोवागादीनांये

गुणाःतेसर्वेप्राणेमुख्याः । वागादिष्वस्मासुत्वौपचारिकास्त्वदधीनाइतिवागादयःप्राणंविज्ञापितवंतइतिवागुवाचेत्यादिवाक्य
चतुष्टयस्यार्थः । अहंवसिष्ठास्मीतियत्तद्वसिष्ठस्त्वमसीत्यादियोजना ॥१३॥१४॥ वसिष्ठत्वादिकंप्राणाधीनमित्यत्रज्ञापकमा
ह ॥ **नवैवाचइत्यादिना** । वागादींद्रियाभिमानिनःनवागादयोभवन् । स्वातंत्र्येणस्वस्वव्यापारदक्षानभवंतीत्याचक्षतेप्रा
ज्ञाः । तर्हिकिमधीनास्संतःस्वस्वव्यापारदक्षाइत्यतआह॥**प्राण(णा)इति** । वागादींद्रियजातंप्राणइत्येवाचक्षते कुतःहियस्मा

**अथहैनꣳश्रोत्रमुवाचयदहꣳसंपदस्मित्वंतत्संपदसीत्यथहैनंमनउवाचयदहमायतनमस्मित्वंतदा
यतनमसीति ॥१४॥ नवैवाचोनचक्षूꣳषिनश्रोत्राणिनमनांसीत्याचक्षतेप्रा(ण)णाइत्येवाचक्षतेप्रा
णोह्येवैतानिसर्वाणिभवति ॥ १५ ॥ १ ॥
सहोवाचकिंमेन्नंभविष्यतीति यत्किंचिदिदमाश्वभ्यआशकुनिभ्यइतिहोचुस्तद्वाएतदनस्यान्नम
नोहवैनामप्रत्यक्षं नहवाएवंविदिकिंचनानन्नंभवतीति ॥ १ ॥**

त्सर्वाणिएतानिवागादीनिप्राणएवभवतिप्राणोधिष्ठातातेषामतइति ॥ १५ ॥ १ ॥ त्वंनःश्रेष्ठोसीत्युक्त्याश्रेष्ठश्चेदहंतर्हिमेमान्नंस
वैःकल्प्यतामित्याह ॥ **सहेति** । सप्राणःकिमन्नंमेभविष्यतीत्युवाच । श्वपक्षिपर्यंतंप्राणिजातंयत्किंचिदिदंयोग्यमन्नमत्तितत्ते
न्नमित्यूचुरित्यर्थः । प्राणैरश्व्यादिभिर्दत्तमन्नंपूर्वमपितदीयमेवेत्याह ॥ **तद्वाएतत्सर्वप्राणिभिरद्यमानंअनस्यप्राणस्यान्नंवै** ।

कुतइत्यतस्तस्यसर्वेंद्रियाधिष्ठातृत्वादित्याह ॥ **अनोहवैनामप्रत्यक्षमिति** । अक्षेषुइंद्रियेषुप्रतिप्रतिस्थितः । शब्दस्वाभा व्यान्नपुंसकता । फलमाह ॥ **नहवाइति** । एवंविदि सर्वप्राणस्यान्नमितिज्ञानिनि । किंचनान्नंनभवतिहवै । सर्वमस्यान्नंभ वतीत्यर्थः ॥ १ ॥ किंमेवासो वसनं । भविष्यतीतिसप्राणःपुनरुवाच । आपः प्राणिभिःपीयमानाआपस्तेवासइतिप्राणाऊ चुरित्यर्थः । तत्रवृद्धाचारंप्रमाणयति ॥ **तस्मादिति** । प्राणस्यान्नमानिनोवस्त्ररूपत्वादेवैतदन्नंअशिष्यंतोभोक्ष्यमाणाःपुर स्तादुपरिष्टाच्चाद्भिःपरिदधतिआच्छादयंति पूर्वोत्तरापोशनंकुर्वंति । वासोवसनं । लंभुकोलब्धाभवति । अनग्नोभवतिप्राण

सहोवाचकिंमेवासोभविष्यतीत्यापइतिहोचुस्तस्माद्वाएतदशिष्यंतःपुरस्ताच्चोपरिष्टाच्चाद्भिःप रिदधति लंभुकोहवासोभवत्यनग्नोहभवति ॥ २ ॥ तद्धैतत्सत्यकामोजाबालोगोश्रुतयेवैयाघ्र पद्यायोक्त्वोवाच यद्यप्येतच्छुष्कायस्थाणवेब्रूयाज्जायेरन्नेवास्मिंशाखाप्ररोहेयुःपलाशानीति॥३॥

इतिबुद्ध्याद्भिःपरिदधतीत्यर्थः । यद्वाप्राणस्यवस्त्रबुद्ध्याभोजनोभयतोपःपिबन्इहामुत्रचवासोलंभुकोभवत्यनग्नोभवतीति ज्ञानपूर्वकमनुतिष्ठतःफलवाक्यमिदं ॥ २ ॥ इयंप्राणविद्यापरंपरागताचेत्याह ॥ **तद्धैतदिति** । तदेतत् । तामेतांप्राणवि द्यांसत्यकामोजाबालोनाम्नागोश्रुतयेवैयाघ्रपद्यायव्याघ्रपात्पुत्रायोक्त्वाफलंचोवाच । तत्फलमाह ॥ **यद्यपीति** । प्राणविद्यायां योग्योयदिकर्मवशात्स्थाणुतांप्राप्यास्ते । तादृशायशुष्कायस्थाणवेपियदिएतत् एतां प्राणविद्यांब्रूयात् । अस्मिन्स्थाणौशा

खाःजायेरन् । पलाशानि पर्णानि । प्ररोहेयुःइत्युवाचेत्यन्वयः ॥ ३ ॥ प्राणोपास्त्यंगभूतंमहत्त्वप्रापकंहोमं द्रव्यमंत्रहोमप्र
कारादिपूर्वमाह ॥ अथयदीत्यादिना । महत् महत्त्वं । जिगमिषेत् प्राप्तुमिच्छेत् । सर्वौषधस्यसर्वधान्यस्य । मंथं वितुषी
करणेनालोडितंपिष्टं । दधिमधुनोः । दधिमधुभ्यां । उपमथ्य संपिष्य । आज्यस्यहुत्वा आज्याहुतिंज्येष्ठायश्रेष्ठायस्वाहेति

अथयदिमहज्जिगमिषेदमावास्यायांदीक्षित्वापौर्णमास्यांरात्रौसर्वौषधस्यमंथंदधिमधुनोरुपम
थ्यज्येष्ठायश्रेष्ठायस्वाहेत्यग्नावाज्यस्यहुत्वामंथेसंपातमवनयेत् ॥ ४ ॥ वसिष्ठायस्वाहेत्यग्नावा
ज्यस्यहुत्वामंथेसंपातमवनयेत्प्रतिष्ठायैस्वाहेत्यग्नावाज्यस्यहुत्वामंथेसंपातमवनयेत्संपदेस्वाहे
त्यग्नावाज्यस्यहुत्वामंथेसंपातमवनयेदायतनायस्वाहेत्यग्नावाज्यस्यहुत्वामंथेसंपातमवनयेत्॥५॥
अथप्रतिसृप्यांजलौमंथमाधायजपत्यमोनामास्य(म)माहिते सर्वमिदꣳसहिज्येष्ठःश्रेष्ठोराजा
ऽधिपतिःसमाज्यैष्ठ्यंश्रैष्ठ्यꣳराज्यमाधिपत्यंगमय(त्व)त्यहमेवेदꣳसर्वमसानीति ॥ ६ ॥

कृत्वा । आज्यस्यसंपातं संपातनं धारां मंथेअवनयेत् ॥ ४ ॥ एवंवसिष्ठायेत्यादिवाक्यचतुष्टयस्याप्यर्थोध्येयः ॥ ५ ॥ अ
थेत्यर्थांतरे । मंथंप्रतिसृप्य प्राप्यांजलौनिधायजपतिजपेत् । मंत्रमाह ॥ अमोनामेति । मंथमानिनंप्राणंप्रत्युच्यते । हेअ
मअमित । त्वंअमोनामासि अमितोसि । कुतःहियतःइदंसर्वंते तव त्वत्स्वामिकं । अतः सहिमंथदेवःप्राणःज्येष्ठःश्रेष्ठःराजा

अधिपतिः। समंथदेवःमा मां समानेभ्यःज्यैष्ठयंश्रेष्ठयंराज्यंआधिपत्यंचगमयतु। अहमेवेदंसर्वं स्वयोग्यपूर्णः असानिभवानी
तिजपतीत्यन्वयः ॥ ६ ॥ एवंमंथंजप्त्वामंत्रपूर्वंतद्भक्षणमाह ॥ अथेति। अनंतरं एतयावक्ष्यमाणयाऋचा आचामति च
मुअदने अत्तीत्यर्थः। तत्सवितुरितिमंत्रेण पच्छः पादशः। त्रिरवदायभक्षयित्वा। चरमपादेनसर्वंभक्षयेदित्याह ॥ तत्सवि
तुरिति। तत्सवितुः जगत्प्रसवितुः। देवस्य विष्णोःसकाशात्। वयंभोजनं रक्षांसर्वभोगांश्च। वृणीमहेप्राप्नवाम। भग

अथखल्वेतयर्चापच्छआचामतितत्सवितुर्वृणीमहइत्याचामतिवयंदेवस्यभोजनमित्याचामति
श्रेष्ठꣳसर्वधातममित्याचामतितुरंभगस्यधीमहीतिसर्वंपिबति ॥ ७ ॥ निर्णिज्यꣳसंचमसंवाप
श्चाद्ग्नेःसंविशतिचर्मणिवास्थंडिलेवावाचंयमोप्रसाहःसयदिस्त्रियंपश्येत्समृद्धंकर्मेतिविद्यात्॥८॥
तदेषश्लोकः। यदाकर्मसुकाम्येषुस्त्रियꣳस्वप्नेभिपश्यति। समृद्धितत्रजानीयात्तस्मिन्त्स्वप्ननिद
र्शनेतस्मिन्त्स्वप्ननिदर्शनइति ॥ ९ ॥ २ ॥

स्य समग्रैश्वर्यादिसर्वगुणस्वरूपस्य विष्णोः। भृत्यरूपंतुरं वायुं। सर्वधातमं सर्वधातृपूत्तमंच। धीमहि ध्यायेमेतिमंत्रार्थः
॥ ७ ॥ कंसं चमसंवा मंथपात्रं। निर्णिज्यप्रक्षाल्याग्नेःपश्चात्संविशति स्वपेत्। चर्मणिकृष्णाजिने। व्याघ्रचर्मणिवास्थंडि
लेवाकेवलायांवाभुवि। वाचंयमो मौनी। अप्रसाहः स्त्रीरहितः। संविशतीतिपूर्वेणान्वयः सयदिस्वप्नेस्त्रियं सुमंगलींपश्ये
त् समृद्धंसफलंकर्मेतिविद्यात् ॥ ८ ॥ स्त्रीदर्शनंकर्मसमृद्धिज्ञापकमित्यत्रश्लोकंप्रमाणयति ॥ तदेषइति। तत् तत्र उक्तेर्थे

काम्येषुकर्मसुक्रियमाणेषु। यदा यदि तत्र तर्हि। स्वप्ननिदर्शने स्वप्नाख्यदृष्टांते। जातेसति समृद्धिंजानीयादित्यर्थः। तदाहसूत्रे सूचकश्चहिश्रुतेराचक्षतेचतद्विदइति ॥ ९ ॥ २ ॥ योहवैज्येष्ठमित्यादिनास्वसमानाधिक्यापादकविद्योक्ता। सर्वपापालेपपुण्यलोकापादकपंचाग्निविद्यांसोपोद्धातमाख्यायिकयाष्टभिःपर्वभिराह ॥ श्वेतकेतुरित्यादिकया। श्वेतकेतुर्नामतः। अरुणेरपत्यमारुणेयः। पंचालानां पंचालदेशीयजनानां समितिं सभामेयाय प्राप्तवान्। तंहश्वेतकेतुं प्रवाहणो

श्वेतकेतुर्हारुणेयःपंचालानाꣳसमितिमेयायतꣳहप्रवाहणोजैबलिरुवाच कुमारा ३ (त्वानुशि) नुत्वाशिषात्पितेत्यनुहिभगवइति ॥ १ ॥ वेत्थयदितोधिप्रजाःप्रयंतीतिनभगवइति वेत्थयथापुनरावर्तंता ३ यितिनभगवइतिवेत्थ(यथादे)पथोर्देवयानस्यपितृयाणस्यचव्यावर्तना ३ इति नभगवइति ॥ २ ॥

नामराजा जिबिलस्यापत्यंजैबलिरुवाच। हेकुमारा ३ इतिसंबोध्य तेपिता त्वा त्वांअनुशिषत् अन्वशिषत् विद्यामुपदिष्टवान्किमित्युवाचेत्यर्थः। कुमारआह हेभगवः। अनुशिषदित्यनुकर्षः। अनुशिष्टोस्मिपित्रेत्युवाचेत्यर्थः ॥ १ ॥ इतितेनोक्तोराजापप्रच्छेत्याहश्रुतिः ॥ वेत्थेति। यत् अधि अधिकृत्य। इतो लोकात्प्रयंति गच्छंति। तद्वेत्थ जानासिकिमितिपप्रच्छराजेतियोज्यं। कुमारआह नेति नवेद्मिभगवइतिकुमारउवाच। एवमग्रेपिप्रश्नप्रत्युत्तरेज्ञेये। व्यावर्तना व्यावर्त

नानि । मध्येप्राप्यस्थानानि । यथा येनप्रकारेणवर्तंते तंप्रकारंवेत्थकिमित्यर्थः ॥ २ ॥ असौलोकः परलोकः । इतोगतैर्नसंपूर्यते तद्वेत्थकिमिति । सर्वत्रप्लुतिःप्रश्नद्योतिका । पंचम्यामाहुतौ आहूयतेस्थाप्यतेअत्रेत्याहुतिःप्रक्षेपस्थानं । तस्यां हुताइतिशेषः । यत्रपंचमस्थानेप्रक्षिप्ताआपः अबादिपंचमहाभूतोपलक्षिताजीवाः पुरुषवचसः पुमांसइतिस्त्रियइतिशब्दभाजोभवंति तद्वेत्थकिमित्यर्थः ॥ ३ ॥ राजावक्ति ॥ अथेति । अथनु एवंतर्हि किमर्थमनुशिष्टोस्मीत्यवोचथाः उक्तवानभूः । यो

वेत्थयथासौलोकोनसंपूर्यता ३ यितिनभगवइतिवेत्थय(त्र)थापंचम्यामाहुतावापःपुरुषवचसो भवंतीतिनैवभगवइति ॥ ३ ॥ अथनुकिमनुशिष्टोवोचथायोहीमानिनविद्यात्कथꣳसोनुशिष्टो ब्रवीतेति सहायस्तःपितुरर्धमेयाय तꣳहोवाचाननुशिष्यवावकिलमाभग(वन्नब्रवीत्त्वानुशि)वा नब्रवीदनुत्वाशिषमिति ॥ ४ ॥ पंचमाराजन्यबंधुःप्रश्नानप्राक्षीत्तेषांनैकंचनाशकंविवक्तुमिति सहोवाचयथामात्वं(त)तातैतानवदोयथाहमेषां(नकिंच)नैकंचनवेदयद्यहमिमानवेदिष्यंकथंते नावक्ष्यमिति ॥ ५ ॥

हीमानिमयापृष्टानिप्रमेयाणिनविद्यात् सकथमनुशिष्टोस्मीतिब्रवीत् ब्रूयादितिराजोवाचेत्यर्थः । सश्वेतकेतुः । आयस्तः सखेदः । पितुरर्धस्थानमेयाय जगाम । तंपितरमुवाच । हेभगवन् मा मां । अननुशिष्य अनुपदिश्यैव किल । त्वा त्वां । अनुशिषं अन्वशिषमित्यब्रवीत्भगवान् ॥ ४ ॥ राजन्यबंधुःराजाधमः मा मां । पंचप्रश्नानप्राक्षीत् प्रष्टव्यार्थान्पृष्टवान् ।

तेषांमध्ये एकंचन विवक्तुंविविच्यवक्तुं । नाशकंशक्तोनाभूवं । तान्मेब्रूहि इत्युवाचेत्यपिज्ञेयं । क्रोधाद्राजन्यबंधुरित्युक्तिः । स पुत्रेणैवमुक्तःपिता । हेतत । तात त्वंएतान् प्रश्नान् । यथा यथावद्वक्तुंमा मामवदः । एषां मध्येअहं यथा यथावत् । किंचन किमपि । नवेद नजानामि । यद्यहमिमान् प्रश्नार्थानवेदिष्यं ज्ञातवानभविष्यं । कथंते नावक्ष्यमित्युवाचपिता ॥ ५ ॥ सगौतमोराज्ञोर्द्धस्थानमेयाय गतवान् । प्राप्तायतस्मैगौतमायार्हां पूजां चकारराजा । सकृतार्हणोगौतमःउषित्वाप

सहगौतमोराज्ञोर्धमेयायतस्मैहप्राप्तायार्हांचकारसहप्रातःसभागउदेयायतꣳहोवाचमानुषस्य भगवन्गौतमवित्तस्यवरंवृणीथाइतिसहोवाचतवैवराजन्मानुषंवित्तंयामेवकुमारस्यांतेवाचम भाषथास्तामेवमेब्रूहीति ॥६॥ सहकृच्छ्रीबभूवतꣳहचिरंवसेत्याज्ञापयांचकारतꣳहोवाचयथामा त्वंगौतमावदोयथेयंनप्राक्त्वत्तुपुराविद्याब्राह्मणान्गच्छतितस्मादुसर्वेषुलोकेषुक्षत्रस्यैवप्रशासन मभूदितितस्मैहोवाच ॥ ७ ॥ ३ ॥

रेद्युःप्रातःकाले । सभागः सभागधेयः । सोपायनः उदेयाय राजानमुपागतवान् । राजादैववित्तलिप्सयाऽयमागतवानि तितन्मनोगतंज्ञात्वा तंगौतमं । हेभगवन्गौतम मानुषस्यवित्तस्य हस्त्यश्वगोहिरण्यादेर्वित्तस्य । वरंप्राप्तिं वृणीथाः भजस्वे त्युवाच । स एवमुक्तोगौतमः । हेराजन् मानुषंवित्तंतवैवास्तु कुमारस्यांतेसमीपे यामेववाचमभाषथाः तामेव मे मह्यं ब्रूही त्युवाचह ॥ ६ ॥ सएवमुक्तोराजा तत्पृष्टस्यगोप्यत्वात्कृच्छ्री क्लेशयुक्तोबभूव । नासंवत्सरवासिनेप्रब्रूयादितिशास्त्रमनुसर

न्राजातं गौतमं । चिरंवसेत्याज्ञापयांचकार तंगौतममुवाच । हेगौतम त्वं । मा मां यांविद्यां । यथा यथावत् । वक्तुमव दः इयंतुविद्या त्वत् त्वत्तःप्राक् ब्राह्मणान् । यथा यथावत् । नगच्छतिपुरा । नागच्छत् । इयंपंचाग्निविद्या ब्राह्मणेषुना सीत् । तस्मादेवकारणात् । सर्वेषुलोकेषु क्षत्रस्यैवप्रशासनं राज्यरक्षादिरूपमभूदित्युक्त्वाराजा तस्मैगौतमायविद्यामुवाचे त्यर्थः ॥ ७ ॥ ३ ॥ पंचप्रश्नविषयानर्थान्व्युत्क्रमेणसप्तभिःखंडैरुपदिदिक्षुरादौचरमप्रश्नविषयपंचाग्निविद्यांवेत्थपंचम्यामाहु तावापइत्येतदुत्तरस्यप्रथमादिसापेक्षत्वात्तदुक्तिपूर्वमाह । असौवावेत्यादिपंचभिःखंडैः । असौलोकः द्युलोकस्थः । असुस्थ

असौवावलोकोगौतमाग्निस्तस्यादित्यएवसमिद्रश्मयोधूमोहरर्चिश्चंद्रमाअंगारानक्षत्राणिवि स्फुलिंगाः ॥ १ ॥

त्वात्प्रकाशरूपत्वाच्चासौलोकइत्युक्तोनारायणः अग्निःअत्तीतिवा अंगनेतृत्वाद्वा अग्निनामा । वावेत्यवधारणे । तस्यद्यु लोकस्थस्यनारायणस्य आदित्यः आदत्तइत्यादित्यनामादित्यस्थोनारायणनारायणात्मा । समित् समेधनात्समिदित्युच्य ते । रतिशंरूपत्वेनरश्मिनामा रश्मिगतोनारायणवासुदेवात्माधूत्करोतिनिराकरोत्यज्ञानादीनितिधूमनामोच्यते । बहुरूप त्वाद्बहुवचनं । एवमग्रेपि ॥ तमसाअहननीयत्वादहर्नामाहर्गतोनारायणसंकर्षणात्मा अर्चिः अरंचितत्वेनअर्चिरित्युच्यते । सुखरूपत्वाच्चंद्रमानामाचंद्रगतःनारायणप्रद्युम्नात्मा । अंगाराः अंगेषुरमणहेतुनांगाराइत्युक्तः । अनन्यराजत्वेननक्षत्रनामा

॥ ७१ ॥

नक्षत्रगतःनारायणानिरुद्धात्मा । मत्स्यादिरूपेणविविधंस्फुरणात्विस्फुलिंगाइत्युक्तः ॥ १ ॥ तस्मिन्द्युलोकस्थेनारायणे । एतस्मिन्नारायणनारायणाद्यात्मनाप्रत्येकंपंचधास्थिते । अग्नौ अग्निनामके जीवाख्यहवीरूपहोमाधारतयाग्निस्थानीये देवाः । श्रद्धां श्रद्धापूर्वयज्ञादिकर्तारं । श्रद्धोपलक्षिताऽबादिपंचभूतयुक्तंजीवमित्यर्थः । उपसंहारे इतितुपंचम्यामाहुता वापइत्यप्शब्देनभूतानामुक्तेः । तदाहसूत्रे । प्रथमेश्रवणादितिचेन्नताएवह्युपपत्तेरिति । जुह्वति प्रक्षिपंति । तस्याआहुतेः तस्मात्होमाधारस्थनारायणात् द्युलोकाग्नितः । सोमोराजासंभवति सोमराजानंप्रापयंतिदेवाइत्यर्थः ॥ २ ॥ ४ ॥ पर्जन्यः

तस्मिन्नेतस्मिन्नग्नौदेवाःश्रद्धांजुह्वतितस्याआहुतेःसोमोराजासंभवति ॥ २ ॥ ४ ॥

पर्जन्योवावगौतमाग्निस्तस्यवायुरेवसमिदभ्रंधूमोविद्युदर्चिरशनिरंगाराह्रादुनयोविस्फुलिंगाः॥१॥

परमस्यजन्यमस्तीतिपर्जन्यनामामेघचक्रगतोवासुदेवः । अग्निः प्रागुक्तनिरुक्त्याऽग्निनामाग्निस्थानीयः तस्यपर्जन्यस्थस्यवा सुदेवस्य । वायुःज्ञानरूपत्ववायुरूपत्वाभ्यांवायुनामावायुगतोवासुदेवनारायणात्मा । समित् प्रागुक्तनिरुक्त्यासमिदित्युच्य ते । अपांभरणादभ्रनामाभ्रगतोवासुदेववासुदेवात्मा धूमः । विद्योतनाद्विद्युन्नामाविद्युद्गतःवासुदेवसंकर्षणात्माऽर्चिः । अ शनादशनिनामाऽशनिगतोवासुदेवप्रद्युम्नात्माअंगाराः । निर्ह्रादनात्ह्रादुनिनामाह्रादुनिशब्दितमेघनादगतोवासुदेवानिरु

द्धात्माविस्फुलिंगाः ॥ १ ॥ तस्मिन्नेतस्मिन्नग्नौनारायणाद्यात्मनावाय्वादौपंचधास्थितेपर्जन्यगतेवासुदेवे । सोमंराजानंसोमराजंप्राप्तंश्रद्धापदेनोक्तंजीवं । तस्याआहुतेःपर्जन्याख्यस्थानात् । वर्षः वृष्टिस्थं । कुर्वंतिदेवाइत्यर्थः ॥ २ ॥ ५ ॥ पृथिवी प्रथितत्वात्पृथिवीनामापृथिवीस्थःसंकर्षणःअग्निः । तस्याः पृथिवीस्थसंकर्षणस्य । संवत्सरः वासयतीतिसंवत्सरनामासंवत्सरगतःसंकर्षणनारायणात्मा समित् सम्यक्प्रकाशनात् । आकाशनामाआकाशगतःसंकर्षणवासुदेवात्माधूमः । रतिदा

तस्मिन्नेतस्मिन्नग्नौदेवास्सोमꣳराजानंजुह्वतितस्याआहुतेर्वर्षःसंभवति ॥ २ ॥ ५ ॥
पृथिवीवावगौतमाग्निस्तस्याःसंवत्सरएवसमिदाकाशोधूमोरात्रिरर्चिर्दिशोंगाराअवांतरदिशो विस्फुलिंगाः ॥ १ ॥ तस्मिन्नेतस्मिन्नग्नौदेवावर्षंजुह्वतितस्याआहुतेरन्नꣳसंभवति ॥ २ ॥ ६ ॥
पुरुषोवावगौतमाग्निस्तस्यवागेवसमित्प्राणोधूमोजिह्वार्चिश्चक्षुरंगाराःश्रोत्रंविष्फुलिंगाः ॥ १ ॥

नाद्रात्रिनामारात्रिस्थःसंकर्षणसंकर्षणात्माऽर्चिः । दिशतीतिदिङ्नामादिक्षुस्थितःसंकर्षणप्रद्युम्नात्मा अंगाराः । अवांतरंदिशतीत्यवांतरदिङ्नामावांतरदिक्षुस्थितःसंकर्षणानिरुद्धात्माविस्फुलिंगाः ॥ १ ॥ तस्मिन्नेतस्मिन्संवत्सरादौनारायणाद्यात्मनापंचधास्थितेपृथिवीस्थेसंकर्षणे । वर्षं वृष्टौस्थापितंजीवं । तस्याआहुतेःपृथिवीस्थानादन्नं अद्यमानवस्तुसंभवति तत्रस्थापयंतीत्यर्थः ॥ २ ॥ ६ ॥ पुरुषः । पुरुत्वात्पूर्णत्वात्पुरुषनामापुरुषगतःप्रद्युम्नःअग्निः । तस्यपुंगतस्यप्रद्युम्नस्यवक्तृत्वाद्वा

ङ्नामावाचिस्थितःप्रद्युम्ननारायणात्मासमित् । प्राणनात्प्राणनामाप्राणस्थःप्रद्युम्नवासुदेवात्माधूमः । जिह्वा ह्रूयतेअद्यतेनेनेति जिह्वानामाजिह्वागतःप्रद्युम्नसंकर्षणात्माअर्चिः । चष्टेपश्यतिसर्वमितिचक्षुर्नामाचक्षुःस्थःप्रद्युम्नःप्रद्युम्नात्माअंगाराः । श्रवणात्श्रोत्रनामाश्रोत्रगतःप्रद्युम्नानिरुद्धःविस्फुलिंगाः ॥ १ ॥ तस्मिन्नेतस्मिन्नारायणादिरूपेणपंचात्मनावागादौस्थितेप्रद्युम्नाख्ये पुरुषगतेऽग्नौ । अन्नमद्यमानवस्तुगतंजीवं । तस्याआहुतेःपुरुषरूपस्थानाद्रेतःरेतःस्थंकुर्वतीत्यर्थः ॥ २ ॥ ७ ॥ योषा सर्वैर्जो

तस्मिन्नेतस्मिन्नग्नौदेवाअन्नंजुह्वतितस्याआहुतेरेतःसंभवति ॥ २ ॥ ७ ॥
योषावावगौतमाग्निस्तस्याउपस्थएवसमिद्यदुपमंत्रयतेसधूमोयोनिरर्चिर्यदंतःकरोतितेंगाराअ
भिनंदाविस्फुलिंगाः ॥ १ तस्मिन्नेतस्मिन्नग्नौदेवारेतोजुह्वतितस्याआहुतेर्गर्भःसंभवति ॥ २ ॥ ८ ॥
इतितुपंचम्यामाहुतावापःपुरुषवचसोभवंतीतिसउल्बाऽऽवृतोगर्भोदशवामासानंतःशयित्वा
यावद्वाथजायते ॥ १ ॥

ष्यत्वाद्योषानामा योषिद्गतोऽनिरुद्धः अग्निः । तस्याःयोषिद्गतानिरुद्धाख्याग्नेःउपस्थः उपस्थितेःउपस्थनामोपस्थगतःअ निरुद्धनारायणात्मा समित् । उपमंत्रयते रत्यर्थंसंभाषतइतियत् सःतत्रत्योऽनिरुद्धवासुदेवात्मोपमंत्रणनामाधूमः । युन क्तिमिश्रीकरोतीतियोनिनामायोनिस्थोनिरुद्धसंकर्षणात्माअर्चिः । अंतःयोन्यंतःकरोतीतियत्ते अंतःकरणकर्ताअंतःकरणग

तक्रियागतोनिरुद्धप्रद्युम्नात्मा अंगाराः । रूपबाहुल्याद्बहुवचनमित्यवोचामप्राक् । अभिनंदाःअभिनंदतीत्यभिनंदनामा भिनंदगतोनिरुद्धानिरुद्धात्माविस्फुलिंगाः ॥ १ ॥ तस्मिन्नेतस्मिन्नारायणाद्यात्मनोपस्थादौपंचधास्थितेयोषिद्ग्नतेऽनिरुद्धाख्याग्नौरेतोगतंजीवं । तत्त्वाभिमानिनोदेवाःजुह्वतिप्रक्षिपंतियोनिद्वारेतियोज्यं । तस्याआहुतेःयोषिद्रूपहोमस्थानात् । गर्भः संभवति शरीरवान्भवति । तदाहसूत्रे योनेःशरीरमिति ॥ २ ॥ ८ ॥ वेत्थपंचम्यामितिस्वकृतप्रश्नस्यापेक्षिताग्निचतुष्टय पूर्वयोषिदाख्यपंचममग्निमुक्त्वाधुनोत्तरमाह ॥ इतितुविति । प्रागिवार्थोध्येयः । इतिशब्दश्चरमप्रश्नोत्तरसमाप्तौ । अ

सजातोयावदायुषंजीवतितंप्रेतंदिष्टमितोग्नयएवहरंतियतएवेतोयतःसंभूतोभवति ॥ २ ॥ ९ ॥

त्रवेत्थपंचम्यामाहुतावापइतिप्रश्नवाक्ये इतितुपंचम्यामाहुतावापइतिप्रतिवचनवाक्येचाप्शब्दःपंचमहाभूतोपश्लिष्टजीवपरः । तदाहसूत्रेषु तदंतरप्रतिपत्तौरंहतिसंपरिष्वक्तःप्रश्ननिरूपणाभ्यां । त्र्यात्मकत्वात्तुभूयस्त्वादित्यादिषु । एवं चरमप्रश्नंपरिहृत्यावशिष्टप्रश्नचतुष्टयंपरिजिहीर्षुस्तदुपयुक्तमाह । सगर्भउल्बावृतः जरायुणावेष्टितः दशमासान्वा यावद्वाकालंस्थातव्यंतावत्कालंवांतः योषिदंतः शयित्वा । अथानंतरंजायते ॥ १ ॥ सजातःयावदायुषंजीवति । तंप्रेतंमृतं दिष्टं कर्मिणं यतएवद्युलोकाख्याग्नितः । इतः इमंलोकंप्राप्तः । यतःयोषिदाख्याग्नितः संभूतः जातोभवति तादृशद्युलोकाद्यग्नये । इतोलो ॥ ७३ ॥

काद्धरंति । नयंतीति ॥ २ ॥ ९ ॥ केनमार्गेणहरंतीतिशंकांपरिहरन्वेत्थयथादेवयानस्येतितृतीयप्रश्नोत्तरेणैवाद्यद्वितीयप्रश्नपरिहारःसिद्ध्यतीतिभावेनतस्योत्तरमाह ॥ तद्यइति । येधिकारिणः इत्यमुक्तप्रकारेण तत् । पंचाग्निस्वरूपं विदुः । येचामीअरण्येश्रद्धातपः इतिशब्दःप्रभृत्यर्थः । श्रद्धापूर्वकंतपःप्रभृत्यनुतिष्ठंति निवृत्तकर्मानुष्ठानपूर्वंभगवद्ध्यानादिकंकुर्वंति तेज्ञानिनोर्चिषमर्चिर्लोकमभिसंभवंति प्राप्नुवंति तदाहसूत्रे । अर्चिरादिनातत्प्रथितेरिति । अर्चिषइत्यादिपंचमी । अहः

तद्यइत्थंविदुर्ये(चामीअ)चेमेऽरण्येश्रद्धातपइत्युपासतेतेऽर्चिषमभिसंभवंत्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षुडुदङ्ङेतिमासाꣳस्तान् ॥१॥ मासेभ्यःसंवत्सरꣳसंवत्सरादादित्यमादित्याचंद्रमसंचंद्रमसोविद्युतंतत्पुरुषोमानवःसएनान्ब्रह्मगमयत्येषदेवयानःपंथाइति ॥ २ ॥ अथयइमेग्रामइष्टापूर्तेदत्तमित्युपासतेतेधूममभिसंभवंतिधूमाद्रात्रिꣳरात्रेरपरपक्षमपरपक्षाद्यान्षड्दक्षिणैतिमासाꣳस्ता(नेतिसं)न्नैतेसंवत्सरमभिप्राप्नुवंति ॥ ३ ॥

अहरभिमानिलोकं । आपूर्यमाणपक्षं पूर्वपक्षमानिलोकं । संभवंतीतिक्रियापदंसर्वत्रयोज्यं । उदङ्उत्तरतः यान्मासानादित्यएति । उत्तरायणमानिलोकं ॥ १ ॥ संवत्सरं संवत्सरमानिलोकं विद्युतं विद्युन्मानिलोकं । तत्पुरुषः । तस्याविद्युतोभारत्याः पुरुषः पतिः मानवोवायुः । सएनान् अर्चिरादिनाविद्युल्लोकपर्यंतमागतान् ब्रह्म गमयति । अस्यवाक्यस्योपकोसलप्रकरणगतवाक्यइवार्थोध्येयः । इत्येषदेवयानः पंथाइति ॥ २ ॥ अथयइमेग्रामेस्थिताःसंत इष्टं यजनं पूर्तंतटाकादि दत्तं

दानं । इतिशब्दःआद्यर्थः । उपासते ग्रामेस्थित्वाप्रवृत्तकर्मिणोये । तेधूममभिसंभवंति धूमाभिमानिलोकंप्राप्नुवंति । संभवंतीतिसर्वत्रयोज्यं । रात्रिं रात्रिमानिलोकं अपरपक्षं कृष्णपक्षमानिलोकं । यान्षण्मासानादित्योदक्षिणा दक्षिणांदिशमेतितान्मासानेति दक्षिणायनमानिलोकंप्राप्नुवंतीत्यर्थः । एकवचनंबहुवचनार्थे । तेधूममित्युपक्रमात् ॥ ३ ॥ मासेभ्यः संवत्सरंसंवत्सरात्पितृलोकमितियोज्यं । आकाशं विनायकलोकं । एषसोमोराजाचंद्रःदेवानां तत् प्रसिद्धममृताख्यमन्नं । तदन्नं देवाः भक्षयंति ॥ ४ ॥ चंद्रंप्राप्तास्तेकाम्यकर्मिणः तस्मिन्चंद्रे यावत्संपातं यावत्पतनमुषित्वा अथानंतरं एतमेवाध्वा

मासेभ्यःपितृलोकंपितृलोकादाकाशमाकाशाच्चंद्रमसमेषसोमोराजातद्देवानामन्नं(तद्दे)तंदेवा भक्षयंति ॥ ४ ॥ तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानंपुन(राव)र्निवर्ततेयथेतमाकाशमाकाशाद्वायुंवायुर्भूत्वाधूमोभवतिधूमोभूत्वाभ्रंभवति ॥ ५ ॥

नंपुनरावर्तते । एतमित्युक्तमार्गःकइत्यतआह॥ **यथेतमिति** । यथायेनमार्गेणद्युलोकंप्रति इतं गतं एतमेवाध्वानमित्यर्थः । कियत्पर्यंतंगतमार्गेणागमनमित्यतश्चंद्रादाकाशपर्यंतंयथेतं तदनंतरमन्यथेत्याह ॥ **आकाशमिति** । आकाशंप्रतियथेतं पुनस्तथैवाकाशंयांति आकाशात्तुपितृलोकादिकंपूर्वप्राप्तंहित्वावाय्वादिदेवंप्राप्नुवंतीत्यर्थः । तदाह यथेतमनेवंचेतिसूत्रकारः वायुर्भूत्वा वायुदेवतासायुज्यादिमान्भूत्वा धूमोभवति धूमदेवसायुज्यादिमान्भवति । एवमग्रेपि । तदाहसूत्रे तत्स्वाभा

व्यापत्तिरुपपत्तेरिति ॥ ५ ॥ प्रवर्षति वृष्ट्यंतर्गताभवंति वृष्ट्यंतर्गताः कर्मिणः व्रीहियवाः । जीवांतराभिमन्यमानव्रीहियवा दिषु । परगृहेपांथइवप्रविष्टास्तिष्ठंतीतितेषुजातेषुजायंतइवोच्यंते । इतिशब्दःआद्यर्थः । तदाहसूत्रे अन्याधिष्ठितेपूर्ववदभि लापादिति । ततोव्रीह्यादिप्रवेशानंतरं । दुर्निष्प्रपतनंभवति । दुष्टपतनमेवव्यनक्ति ॥ योयोर्हीति । योयोजनः अन्नं व्री ह्यादिरूपमद्यमानमत्ति । अत्तृषुमध्येयःपुमान्रेतोयोषितिसिंचति तद्भूयएवअद्यमानवस्तुद्वारारेतःसेचकपुरुषंप्रविश्य तद्भु

अभ्रंभूत्वामेघोभवतिमेघोभूत्वाप्रवर्षतितइहव्रीहियवाओषधिवनस्पतयस्तिलमाषाइतिजायं
तेततोवैखलुदुर्निष्प्रपतनंयोयोह्यन्नमत्तियोरेतःसिंचतितद्भूयएवभवति ॥ ६ ॥ तद्यइहरमणीय
चरणाअभ्याशोहयत्तेरमणीयांयोनिमापद्येरन्ब्राह्मणयोनिंवाक्षत्रिययोनिंवावैश्ययोनिंवाथय
इहकपूयचरणाअभ्याशोहयत्तेकपूयांयोनिमापद्येरंश्वयोनिंवासूकरयोनिंवाचंडालयोनिंवा॥७॥

क्तान्नपरिणतिसारभूतरेतोगतःसन् तन्मयोभवतीत्यर्थः । तदाहसूत्रे रेतस्सिग्योगोथेति ॥ ६ ॥ एतमध्वानमावर्ततेइत्यु क्त्वापुनरागमनेआकाशवाय्वादीनिरेतस्सिक्पर्यंतानिबहूनिस्थानान्युक्तानि । तर्हिबहुस्थानगमनात्कल्पांतपर्यंतमागमनं भवतिकिमित्यतोनेतिभावेनयोनिप्राप्तिंचयथायोग्यमाह ॥ तद्यइति । तत् तत्र कर्मिणांमध्ये । इह लोके । ये रमणीयच रणाः शुभकर्माणः । तेरमणीयांयोनिं । तद्व्यनक्ति ब्राह्मणयोनिंक्षत्रिययोनिंवैश्ययोनिंवाप्रपद्येरन्नितियत् तदभ्याशः

शीघ्रमेव । एकसंवत्सरकालएव । तदाहसूत्रे नातिचिरेणविशेषादिति । अथेत्यर्थांतरद्योतकः । कपूयचरणाः कुत्सितकर्माणः । पूर्ववद्योजना । कपूययोनिमेवव्यनक्ति श्वयोनिमित्यादिना । चरणशब्दोत्राथयइमेग्रामइत्यादिनाप्रकृतेष्टापूर्तादिकर्मपरोनकर्मांगाचारमात्रपरः । तदाहसूत्रे सुकृतदुष्कृतेएवेतितुबादरिरिति । एतेनदेवयानपितृयाणरूपमार्गद्वयोक्त्याआद्यद्वितीयप्रश्नयोरुत्तरमुक्तंध्येयं । यद्यप्यत्रइष्टापूर्तेइत्याद्युपक्रमाद्रमणीयचरणाएवप्रकृतास्तथापि । अथेतिवक्ष्यमाणचतुर्थप्रश्नपरिहारोपयुक्ततयातेपिप्रसंजिताइतिध्येयं ॥ ७ ॥ चतुर्थप्रश्नपरिहारमाह ॥ अथेति । एतयोः तद्यइत्थंविदुरित्यादिना

अथैतयोःपथो(र्न)नैकतरेणचतानीमानिक्षुद्रमिश्राण्यसकृदावर्तीनिभूतानिभवंतिजायस्वम्रियस्वेत्येतत्तृतीयꣳस्थानंतेनासौलोकोनसंपूर्यतेतस्माज्जुगुप्सेत ॥ ८ ॥

अथयइमेग्रामइत्यादिनाचप्रकृतयोः पथोः देवयानपितृयाणरूपमार्गसाधनभूतयोः ज्ञानकर्मणोः । ज्ञानाख्येनदेवयानमार्गोपायेनवाकर्माख्यपितृयाणमार्गोपायेनवाकतरेणचअन्यतरेणापिनतिष्ठंतिज्ञानंवाकर्मवानसंपादयंतीतियावत् । तदाहसूत्रे विद्याकर्मणोरितितुप्रकृतत्वादिति । तानीमानिभूतानिजंतूनिक्षुद्रमिश्राणि सुखदुःखमिश्राणि असकृदावर्तीनीत्यस्यविवरणं जायस्वम्रियस्वपुनःपुनःजायंतेम्रियंतेचेत्येतत्तृतीयंस्थानंस्वर्गापवर्गापेक्षयातृतीयंस्थानं । तेनासकृदावर्तनहेतुनाअसौ ॥ ७५ ॥

लोकस्तृतीयस्थानरूपः । नसंपूर्यते नसमाप्यते तस्मात्तादृशस्थानाज्जुगुप्सेत विरज्येत ॥ ८ ॥ कपूयचरणाः कइत्यतः श्लोकेनतानाह ॥ तदेषइति । श्लोकः स्पष्टार्थः ॥ ९ ॥ पंचाग्निविद्यांस्तौति ॥ अथहेति । योऽधिकारीएवमुक्तदिशाएतान्द्युआदिपंचाग्नीन्वेद सज्ञानी तैः उक्तपंचपातकिभिराचरन्नपिपाप्मनानलिप्यते । एवंज्ञानिनः फलमाह ॥ शुद्धइति । यएवंज्ञानीपापेननलिप्यतेइतिवेदसोपिस्वयंशुद्धःपावयत्यन्यानिति । पूतः अंतर्णीतण्यर्थः पुण्यलोकोभवतीति ॥ १० ॥ १० ॥

तदेषश्लोकः स्तेनोहिरण्यस्यसुरांपिबꣳश्चगुरोस्तल्पमावसन्ब्रह्महाच ॥ एतेपतंतिचत्वारःपंचमश्चाचरꣳस्तैरिति ॥ ९ ॥ अथहयएतानेवंपंचाग्नीन्वेदनसहतैरप्याचरन्पाप्मनालिप्यतेशुद्धःपूतःपुण्यलोकोभवतियएवंवेदयएवंवेद ॥ १० ॥ १० ॥

प्राचीनशालऔपमन्यवःसत्ययज्ञःपौलुषिरिंद्रद्युम्नोभाल्लवेयोजनःशार्कराक्ष्योबुडिलआश्वतराश्विस्तेहैतेमहाशालामहाश्रोत्रियाःसमेत्यमीमांसांचक्रुःकोनआत्माकिंब्रह्मेति ॥ १ ॥

सर्वपापविधूननेनपुण्यलोकावाप्तिकारणपंचाग्निविद्योक्ता । सर्वलोकगतजीवाद्यान्नात्तृत्वापादकवैश्वानरविद्यामाख्यायिकयाष्टभिः पर्वभिराह ॥ प्राचीनशालइत्यादिकया । प्राचीनशालोनामतः । उपमन्योरपत्यमौपमन्यवः । सत्ययज्ञोनामतः पुलुषस्यापत्यंपौलुषिः । इंद्रद्युम्नोनामतः । भल्लवायाअपत्यंभाल्लवेयः । जनोनामतः शर्कराक्षस्यापत्यंशार्कराक्ष्यः । अश्वत

राश्वस्यापत्यंआश्वतराश्विः । बुडिलोनामतः । तेहैतेपंच प्रत्यब्दयज्ञकृत्त्वेनमहाशालाः । वेदवेदार्थवित्त्वेनमहाश्रोत्रियाः समेत्यक्वचिन्मिलित्वामीमांसांचक्रुः व्यचारयन् । किमिति । नोऽस्माकंआत्मा आदानादिकर्ता । स्वामीतियावत् । ब्रह्मगुणपूर्णवस्तु किमितिमीमांसांचक्रुरित्यन्वयः ॥ १ ॥ अन्योन्यमेवमात्मस्वरूपस्यविचारेणापिनिर्णयमलभमानास्तेनिर्णयार्थमुद्दालकंसंपादयांचक्रुः । संपाद्यान्योन्यमूचुश्च । तत्किमूचुरित्यतआह ॥ उद्दालकइति । अरुणस्यापत्यमारुणिः भगवं

तेहसंपादयांचक्रुरुद्दालकोवैभगवंतोयमारुणिःसंप्रतीममात्मानंवैश्वानरमध्येतितꣳहंताभ्यागच्छामेतितꣳहाभ्याजग्मुः ॥ २ ॥ सहसंपादयांचकारप्रक्ष्यंतिमामिमेमहाशालामहाश्रोत्रियास्तेभ्योनसर्वमिवप्रतिपत्स्येहंतामहमन्यमभ्यनुशासानीति ॥ ३ ॥

तः आरुणिरुद्दालकः संप्रति इदानीमिममात्मानंविश्वनरसंबंधितयावैश्वानरनामकमध्येति अधिकंजानाति । तमुद्दालकं । हंतहर्षे । अभ्यागच्छामेत्यन्योन्यमूचुरितियोज्यं । इतिनिश्चित्यतमुद्दालकमभ्याजग्मुः ॥ २ ॥ सउद्दालकः । मनसान्यंसंपादयांचकार । निश्चितवान् । किमर्थमित्यतआह ॥ प्रक्ष्यंतीति । महाशालामहाश्रोत्रियाइमेमांप्रक्ष्यंति प्रश्नान्करिष्यंति । तेभ्योवक्तुमितिशेषः । सर्वंपृष्टंवक्तुंनप्रतिपत्स्ये नज्ञास्यामीवेतीवशब्दोनिर्धारणे । अतोन्यमनुशासानिवदानि । हं ॥ ७६ ॥

तद्दर्षे । इतिनिश्चित्य ॥३॥ तान्उवाचह । तदाह ॥ अश्वपतिरित्यादिना । हेभगवंतः अश्वपतिः कैकेयः केकयदेशाधिपति रयंराजासंप्रतीदानीमिममात्मानंवैश्वानरं अध्येति तं । हंताभ्यागच्छामइत्युक्तास्तेसर्वे तमभ्याजग्मुर्ह ॥ ४ ॥ तेभ्योहप्राप्ते भ्योराजा । पृथक्क् प्रत्येकंप्रत्येकं । अर्हाणितत्तद्योग्यपूजाः कारयांचकारभृत्यैः । सराजापरेद्युः प्रातः संजिहानः शयनादु त्थितः उवाच । किमिति । किंचोरादिभीत्यासमागताः किंवाधनार्थित्वेन । नाद्यः अभावादित्याह ॥ नमइति । मे मम

तान्होवाचाश्वपतिर्वैभगवंतोयंकैकेयः संप्रतीममात्मानंवैश्वानरमध्येतित१(हंताभ्या)हाभ्या गच्छामेतित१हाभ्याजग्मुः ॥ ४ ॥ तेभ्योहप्राप्तेभ्यःपृथगर्हाणिकारयांचकारसहप्रातःसंजिहान उवाच नमेस्तेनोजनपदेनकदर्योनमद्यपोनानाहिताग्निर्नाविद्वान्नस्वैरीस्वैरिणीकुतोयक्ष्यमाणोवै भगवंतोहमस्मियावदेकैकस्माऋत्विजेधनंदास्यामितावद्भगवद्भ्योदास्यामिवसंतुभगवंतइति ॥५॥

जनपदे देशे । स्तेनश्चोरोनास्ति । नकदर्यो यथाकालमाचारहीनः । नमद्यपः । स्वैरी जारः । कुतः स्वैरिणी कामचारिणी । अयक्ष्यमाणोवाकुतः । स्तेनादिरयक्ष्यमाणोवाकुतोनास्तीत्यतआह ॥ अहमस्मीति । हेभगवंतः चंडशासनोहम स्मि तिष्ठामि । अतोनस्तेनादिरितिभावः । धनार्थिनश्चेदागतास्तर्हियक्ष्यमाणोहमस्मीतिवान्वयः । यावद्धनंएकैकस्मै

ऋत्विजेदास्यामि तावद्भगवद्भ्योदास्यामि । वसंतुभगवंतइत्युवाचेत्यन्वयः ॥ ५ ॥ एवंराज्ञोक्तास्तेपुरुषोयेनार्थेनप्रयोजनेन हेतुनाचरेत् तमेवार्थंवदेत्तंपुरुषंप्रति । वयंतुनार्थकामनयाचरामः । किंतुब्रह्मज्ञानकामनया । त्वंतुआत्मानमेवैनंवैश्वानरं संप्रत्यध्येषि तमेवनोस्मभ्यंब्रूहीत्यूचुः ॥ ६ ॥ तान्होवाचराजा । वःयुष्मान्प्रति प्रातर्वक्तास्मीति । तेहपरेद्युःप्रातःकाले समित्पाणयःपूर्वाह्णेप्रतिचक्रमिरे । राजसमीपंप्राप्ताः । तान्हराजाऽनुपनीय शिष्यत्वेनास्वीकृत्यैव एतत् वक्ष्यमाणमुवाच

तेहोचुर्येनहैवार्थेनपुरुषश्चरेत्तꣳहैववदेदात्मानमेवेमंवैश्वानरꣳसंप्रत्यध्येषितमेवनोब्रूहीति ॥ ६ ॥
तान्होवाचप्रातर्वःप्रतिवक्तास्मीतितेहसमित्पाणयःपूर्वाह्णेप्रतिचक्रमिरेतान्हानुपनीयैवैतदु
वाच ॥ ७ ॥ ११ ॥
औपमन्यवकंत्वमात्मानमुपास्सइतिदिवमेवभगवोराजन्निति होवाचैषवैसुतेजाआत्मावैश्वान
रोयंत्वमात्मानमुपास्सेतस्मात्तवसुतंप्रसुतमासुतंकुलेदृश्यते ॥ १ ॥

॥ ७ ॥ ११ ॥ एभिरवगतंवैश्वानरंक्रमेणपृष्ट्वातन्नामधेयंफलंचस्वयंवदन्विशेषाज्ञानेबाधकंचाह ॥ औपमन्यवइत्यादि ना । इत्येतदुवाचेत्यन्वयः । हेभगवोराजन् क्रीडात्मकत्वेनदिवमित्युक्तमात्मानमहमुपासइत्युवाचऔपमन्यवः । यंत्वमा त्मानमुपास्सेएषवै द्युनामा । अतितेजस्त्वात्सुतेजाइत्युक्तःद्युलोकाधारआत्मावैश्वानरः । तस्मात्तदुपासकत्वात्तवकुलेसु

तंप्रसुतमासुतं पुत्रःपौत्रःतत्पुत्रश्चदृश्यते ॥ १ ॥ अन्नमत्सि । प्रियंचपश्यसि । योऽधिकारीएतमेवंत्वदुपास्यमेवात्मानंवैश्वा
नरमेवंसुतेजस्त्वादिनोक्तप्रकारेणोपास्ते सोन्नमत्ति पश्यतिप्रियं । अस्यकुलेब्रह्मवर्चसंभवति । आत्मनस्तुहरेःएषद्युनामात्व
योपास्यःमूर्धा शिरः । एवमेकावयवोपासकस्त्वंयत्यदिमांनागमिष्यस्तर्हितेमूर्धाव्यपतिष्यदित्युवाचराजेति ॥ २ ॥ १२ ॥
अथानंतरं । सत्ययज्ञंपौलुषिमुवाचह । हेप्राचीनयोग्य । कंत्वमात्मानमुपास्सइति । सआह ॥ आदित्यमेवेति । आयु

अत्स्यन्नंपश्यसिप्रियमत्यन्नंपश्यतिप्रियंभवत्यस्यब्रह्मवर्चसंकुलेयएतमेवमात्मानंवैश्वानरमुपास्ते
मूर्धात्वेषआत्मनइतिहोवाचमूर्धातेव्यपतिष्यद्यन्मांनागमिष्यइति ॥ २ ॥ १२ ॥
अथहोवाचसत्ययज्ञंपौलुषिंप्राचीनयोग्यकंत्वमात्मानमुपास्सइत्यादित्यमेवभगवोराजन्निति हो
वाचैषवैविश्वरूपआत्मावैश्वानरोयंत्वमात्मानमुपास्से तस्मात्तवबहुविश्वरूपंकुलेदृश्यते ॥ १ ॥
प्रवृत्तोश्वतरीरथोदासीनिष्कोत्स्यन्नंपश्यसिप्रियमत्यन्नंपश्यतिप्रियंभवत्यस्यब्रह्मवर्चसंकुलेयएत
मेवमात्मानंवैश्वानरमुपास्तेचक्षुष्ट्वेतदात्मनइतिहोवाचांधोभविष्योयन्मांनागमिष्यइति॥२॥१३॥

षामादानादादित्यनामानमात्मानमुपासेइत्युवाचेत्यर्थः । राजाह ॥ एषइति । त्वंयमात्मानमुपास्से एषवैविश्वरूपः सर्व
रूपातिदर्शनात् । विश्वरूपनामा वैश्वानरआत्मावै । तस्माद्विश्वरूपोपासकत्वादेव । तवकुले गृहे । बहुविश्वरूपं अति
बहुवस्तुजातं । दृश्यते ॥ १ ॥ तद्व्यनक्ति ॥ प्रवृत्तइत्यादिना । एवमुपासकस्यफलमाह ॥ अत्त्यन्नमित्यादिना ।

आत्मनएतत्तुत्वयोपास्यमादित्याख्यमादित्याधारमंगं । चक्षुरेव । नसर्वांगं । अंधइत्यादिप्राग्वज्ज्ञेयं । इत्युवाचराजेत्यर्थः ॥ २ ॥ १३ ॥ अथहोवाचेत्यादिप्रश्नप्रतिवचनेप्राग्विवध्येये । हेवैयाघ्रपद्य व्याघ्रपात्पुत्रेतिसंबुद्धिः । ज्ञानायुरूपत्वाद्वायुनामकंवाय्वाधारं । एषत्वयोपास्योवायुःपृथग्वर्त्मा प्राणादिभिरशक्यकार्यकर्तृतयापृथग्वर्त्मेत्युक्तः । पृथङ्नानाविधाःव

अथहोवाचेंद्रद्युम्नंभाल्लवेयंवैयाघ्रपद्यकंत्वमात्मानमुपास्सइतिवायुमेवभगवोराजन्निति होवाचैषवैपृथग्वर्त्मात्मावैश्वानरोयंत्वमात्मानमुपास्सेतस्मात्त्वापृथग्वलयआयंतिपृथग्रथश्रेणयोनुयंति
॥ १ ॥ अत्स्यन्नंपश्यसिप्रियमत्त्यन्नंपश्यतिप्रियंभवत्यस्यब्रह्मवर्चसंकुले यएतमेवमात्मानंवैश्वानरमुपास्तेप्राणस्त्वेषआत्मनइतिहोवाचप्राणस्तउदक्रमिष्यद्यन्मांनागमिष्यइति ॥ २ ॥ १४ ॥
अथहोवाचजनꣳशार्कराक्ष्यꣳशार्कराक्ष्यकंत्वमात्मानमुपास्सइत्याकाशमेवभगवोराजन्निति होवाचैषवैबहुलआत्मावैश्वानरोयंत्वमात्मानमुपास्सेतस्मात्त्वंबहुलोसिप्रजयाचधनेनच ॥ १ ॥

लयः आवलयःआयंति । तद्विवृणोति ॥ पृथग्रथश्रेणयइति । गजाश्वाद्यावलीनामुपलक्षणमेतत् ॥ १ ॥ एवमुपासकस्यफलमाह ॥ अत्त्यन्नमित्यादि । आत्मनोवैश्वानरस्यैषत्वयोपास्योवायुःप्राणःप्राणाख्यावयवः ॥ २ ॥ १४ ॥ अथेत्यादिप्राग्वत् । आसमंतात्काशतेदीप्यतइत्याकाशाख्यमात्मानमुपासइतिहोवाच । विस्तीर्णत्वादेषबहुलइत्युक्तः । तस्माद्ब

हुलोपासकत्वात् ॥ १ ॥ एषत्वयोपास्योबहुलआत्मनःसंदे(दो)होमध्यदेहः । व्यशीर्यत्विशीर्णमभविष्यत् ॥ २ ॥ १५ ॥
अपएवेति । व्याप्तत्वादापइत्युक्तमात्मानमुपासइत्युवाच । रयिः रतिजनकत्वात्रयिनामा ॥ १ ॥ वस्तिस्त्वेषइति । वै

अत्स्यन्नंपश्यसिप्रियमत्यन्नंपश्यतिप्रियंभवत्यस्यब्रह्मवर्चसंकुलेयएतमेवमात्मानंवैश्वानरमुपास्ते
सं(दोह)देहस्त्वेषआत्मनइतिहोवाच(संदोह)संदेहस्तेव्यशीर्यद्यन्मांनागमिष्यइति ॥ २ ॥ १५ ॥
अथहोवाचबुडिलमाश्वतराश्विवैयाघ्रपद्यकंत्वमात्मानमुपास्सइत्यपएवभगवोराजन्नितिहोवा
चैषवैरयिरात्मावैश्वानरोयंत्वमात्मानमुपास्सेतस्मात्त्वंरयिमान्पुष्टिमानसि ॥ १ ॥ अत्स्यन्नं
पश्यसिप्रियमत्यन्नंपश्यतिप्रियंभवत्यस्यब्रह्मवर्चसंकुलेयएतमेवमात्मानंवैश्वानरमुपास्तेवस्ति
स्त्वेषआत्मनइतिहोवाचवस्तिस्तेव्यभेत्स्यद्यन्मांनागमिष्यइति ॥ २ ॥ १६ ॥
अथहोवाचोद्दालकमारुणिंगौतमकंत्वमात्मानमुपास्सइतिपृथिवीमेवभगवोराजन्नितिहोवाचै
षवैप्रतिष्ठात्मावैश्वानरोयंत्वमात्मानमुपास्सेतस्मात्त्वंप्रतिष्ठितोसिप्रजयाचपशुभिश्च ॥ १ ॥

श्वानरात्मनोवस्तिरूपावयवइत्यर्थः । व्यभेत्स्यत् भिन्नोऽभविष्यत् ॥ २ ॥ १६ ॥ पृथिवी प्रथनात्विस्तीर्णगुणत्वेनपृथि

व्याख्यं । प्रतिष्ठितिहेतुत्वात्प्रतिष्ठा ॥ १ ॥ एतावात्मनः पादौ । एतावितिविधेयापेक्षयापुल्लिंगंद्विवचनंच । व्यम्लास्येतां । भज्येयातां ॥ २ ॥ १७ ॥ एवंतैःषड्भिः प्रत्येकमुपास्यंभगवतःसुतेजःप्रभृतिनामकंशिरआद्यंगमेवेत्युपदिष्टमनुवदन् समग्रवैश्वानरस्वरूपंतदुपास्तिफलंचोवाचराजेत्याहश्रुतिः ॥ तान्होवाचेत्यादिना । एते प्रसिद्धाःयूयं । खलुवैश्वानरमात्मानंपृथगिवैकैकावयवं । विद्वांसो जानंतोन्नमत्थ भक्षयथ । भगवदवयवानांभेदाभावात्पृथगिवेत्युक्तं । यस्तुअधि

अत्स्यन्नंपश्यसिप्रियमत्त्यन्नंपश्यतिप्रियंभवत्यस्यब्रह्मवर्चसंकुलेयएतमेवमात्मानंवैश्वानरमुपास्ते पादौत्वेतावात्मनइतिहोवाचपादौतेव्यम्लास्येतांयन्मांनागमिष्यइति ॥ २ ॥ १७ ॥ तान्होवाचैतेवैखलुयूयंपृथगिवेममात्मानंवैश्वानरंविद्वांसोन्नमत्थयस्त्वेतमेवंप्रादेशमात्रमभिविमानमात्मानंवैश्वानरमुपास्तेससर्वेषुलोकेषुसर्वेषुभूतेषुसर्वेष्वात्मस्वन्नमत्ति ॥ १ ॥

कारी । तुशब्दोदेवरूपाधिकारिविशेषद्योतकः । एतं सर्वप्राणिसन्निहितं । वैश्वानरमात्मानं । प्रादेशमात्रं प्रादेशपरिमित हृदयकमलव्यापित्वाद्वा तावत्परिमाणव्यक्त्यावाप्रादेशमात्रं । हृद्यपेक्षयेतिसूत्रोक्तन्यायात् । अभिविमानं अभितोविगतंमानंमर्यादायस्येत्यभिविमानं । एवमुक्तदिशाशिरःप्रभृतिसर्वांगोपेततयोपास्ते ससर्वेष्वित्यादि । भूतेषु स्थावरादिजडेषु । आत्मसु चेतनेषु । देवत्वादेवोपासकस्यतस्यमुख्यंफलं । अन्येषांयथायोग्यं । वैश्वानरोऽत्रविष्णुर्ज्ञेयोनभूताग्निःतद

भिमानिदेवोवा । तदाहसूत्रे । वैश्वानरःसाधारणशब्दविशेषादिति ॥ १ ॥ भगवदंगानामुक्तनामधेयंसर्वथानुसंधेयमिति भावेनतदनुवदन्होमापेक्षितमाह ॥ तस्येत्यादिना । तस्यवैश्वानरनाम्नोहरेःमूर्धैवसुतेजाः । अतितेजस्त्वहेतुनासुतेजोनामाद्युलोकाश्रयः । तस्यचक्षुःविश्वरूपः सर्वपदार्थविषयकतयाविश्वरूपनामाविश्वरूपाख्यादित्याश्रयः । तस्यहरेः प्राणःपृथग्वर्त्मा । प्राणादिभिरशक्यकार्यकर्तृत्वात्पृथग्वर्त्मनामावाय्वाश्रयः । तस्यहरेःसंदे(दो)हःमध्यदेहःबहुलनामा

तस्यहवाएतस्यात्मनोवैश्वानरस्यमूर्धैवसुतेजाश्चक्षुर्विश्वरूपःप्राणःपृथग्वर्त्मात्मा(संदोहो)संदेहोबहुलोवस्तिरेवरयिःपृथिव्येवपादावुरएववेदिर्लोमानिबर्हिर्हृदयंगार्हपत्योमनोन्वाहार्यपचनआस्यमाहवनीयः ॥ २ ॥ १८ ॥

तद्यद्भक्तंप्रथममागच्छेत्तद्धोमीयंसयांप्रथमामाहुतिंजहुयात्तांजु(व्हीत)हुयात्प्राणायस्वाहेतिप्राणस्तृप्यति ॥ १ ॥

आकाशमान्याश्रयः । तस्यनाभ्यधोभागवस्तिरूपोऽवयवोरयिः रतिदत्वहेतुनारयिनामाअपामाश्रयः । तस्यपादौप्रथितत्वहेतुनापृथिवीनामानौपृथिव्याश्रयौ । तस्यवैश्वानरस्यहरेःउरोवक्षःवेदिः वेद्यभिमानिनीतदाश्रितेत्यर्थः । आश्रयाश्रयिभवाभिप्रायाऽभेदोक्तिः । एवमग्रेपि बर्हिरादिशब्दाअभिमानिपराः । तदाहसूत्रे पुरुषविधमपिचैनमधीयतइति ॥ २ ॥ १८ ॥ इतिकर्तव्यतासहितंहोममाह ॥ तद्यदिति । तत्प्रसिद्धंभोज्यंयत्भक्तमन्नंप्रथममागच्छेदास्यंप्रति तद्धोमीयं होमसाधन

द्रव्यं । होममंत्रानाहुतितृप्त्यांश्चाह ॥ सयामित्यादिना । सभुंजानः । जुहुयात्होमंकुर्यात् । जुह्वीत कुर्वीत । प्राणाय
स्वाहेत्याहुत्या । प्राणःप्राणवायोरभिमानिभूतंयदादित्यस्यरूपंहृदयकमलगतस्यवैश्वानराख्यस्यहरेःपूर्वद्वारपालकंतत्तृप्यति
॥ १ ॥ प्राणमानिरूपेतृप्यतिचक्षुर्मानियदादित्यस्यरूपंतत्तृप्यति । चक्षुर्मानिरूपेतृप्यतिआदित्यःरविबिंबमानिसूर्यरूपंतृप्य
ति । त्रिरूपेआदित्येतृप्यति द्यौर्द्युलोकमानिनीश्रीः तृप्यति । दिवितृप्यंत्यांद्यौःश्रीश्च प्राणचक्षुर्मंडलानामभिमानीआदित्य

प्राणेतृप्यतिचक्षुस्तृप्यतिचक्षुषितृप्यत्यादित्यस्तृप्यत्यादित्येतृप्यतिद्यौस्तृप्यतिदिवितृप्यंत्यांय
त्किंचद्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यतितस्यानुतृप्तिंतृप्यतिप्रजयापशुभिरन्नाद्येनतेजसाब्रह्म
वर्चसेनेति ॥ २ ॥ १९ ॥

अथयांद्वितीयांजुहुयात्तांजुहुयाद्व्यानायस्वाहेतिव्यानस्तृप्यति ॥ १ ॥ व्यानेतृप्यतिश्रोत्रंतृप्य
तिश्रोत्रेतृप्यतिचंद्रमास्तृप्यतिचंद्रमसितृप्यतिदिशस्तृप्यंतिदिक्षुतृप्यंतीषुयत्किंचदिशश्चंद्रमा
श्चाधितिष्ठंतितत्तृप्यतितस्यानुतृप्तिंतृप्यतिप्रजयापशुभिरन्नाद्येनतेजसाब्रह्मवर्चसेनेति॥२॥२०॥

श्चयत्किंचज्ञानानंदरूपंब्रह्माख्यंवस्तुअधिकृत्यतिष्ठतस्तद्ब्रह्मतृप्यति । तस्यब्रह्मणस्तृप्तिमनु । पश्चाद्यजमानःप्रजयापशुभिर
न्नाद्येनतेजसाब्रह्मवर्चसेनतृप्यति ॥ २ ॥ १९ ॥ दक्षिणद्वारपः व्यानवायुश्रोत्रचंद्रबिंबमानितयात्रिरूपश्चंद्रोव्यानायस्वाहे
तिमंत्रेणक्रियमाणद्वितीयाहुत्यातृप्यतीत्याह ॥ अथयांद्वितीयामिति । प्रागिवार्थः ॥ १ ॥ दिशःदिङ्नाम्नीरमादेवी

यत्किंच । ज्ञानरूपत्वात्यत् । सुखरूपत्वात्किं । यत्किंचज्ञानानंदरूपंब्रह्मेत्यर्थः ॥ २ ॥ २० ॥ अपानवायुवाग्भूताग्न्य भिमानीत्रिरूपोग्निदेवःपश्चिमद्वारपः अपानायस्वाहेतिमंत्रेणक्रियमाणाहुत्यातृप्यतीत्याह ॥ अथयांतृतीयामिति ॥ १ ॥ पृथिवीनाम्नीभूदेवी ॥ २ ॥ २१ ॥ समानवायुमनःपर्जन्यानामभिमानितयात्रिरूपइंद्रउत्तरद्वारपः समानायस्वाहेतिमंत्रेण

अथयांतृतीयांजुहुयात्तांजुहुयादपानायस्वाहेत्यपानस्तृप्यति ॥ १ ॥ अपानेतृप्यतिवाक्तृप्यति वाचितृप्यंत्यामग्निस्तृप्यत्यग्नौतृप्यतिपृथिवीतृप्यतिपृथिव्यांतृप्यंत्यांयत्किंचपृथिवीचाग्निश्चाधि तिष्ठतस्तत्तृप्यतितस्यानुतृप्तिंतृप्यतिप्रजयापशुभिरन्नाद्येनतेजसाब्रह्मवर्चसेनेति ॥ २ ॥ २१ ॥
अथयांचतुर्थींजुहुयात्तांजुहुयात्समानायस्वाहेतिसमानस्तृप्यति ॥ १ ॥ समानेतृप्यतिमनस्तृप्य तिमनसितृप्यतिपर्जन्यस्तृप्यतिपर्जन्येतृप्यतिविद्युत्तृप्यतिविद्युतितृप्यंत्यांयत्किंचविद्युच्चपर्जन्य श्चाधितिष्ठतस्तत्तृप्यतितस्यानुतृप्तिं तृप्यतिप्रजयापशुभिरन्नाद्येनतेजसाब्रह्मवर्चसेनेति ॥ २ ॥ २२ ॥
अथयांपंचमींजुहुयात्तांजुहुयादुदानायस्वाहेत्युदानस्तृप्यति ॥ १ ॥

क्रियमाणाहुत्यातृप्यतीत्याह ॥ अथयांचतुर्थीमिति ॥ १ ॥ पर्जन्यःमेघचक्रमानींद्रः । विद्युत्विद्युन्मानिनीवायुपत्नी ॥ २ ॥ २२ ॥ उदानवायुवाग्व्याकाशमानितयात्रिरूपोमुख्यवायुरूर्ध्वद्वारपः उदानायस्वाहेतिमंत्रेणक्रियमाणाहुत्यातृप्य

तीत्याह ॥ अथयांपंचमीमिति ॥ १ ॥ वायुः प्रसिद्धवायुमानी । आकाशः आकाशमानी । विशेषेणलक्ष्म्याविष्टतयाका
शइत्युक्तोमुख्यवायुःआकाशश्च । वायौविशेषसन्निधियुतालक्ष्मीरित्यर्थः ॥ २ ॥ २३ ॥ एवंवैश्वानरस्वरूपंतद्विषयहोमंचो
क्त्वातज्ज्ञानपूर्वकहोमफलंतदज्ञानपूर्वकहोमवैफल्योक्त्याह ॥ सयइदमिति । स भुंजानो यःकश्चित् इदं वैश्वानरस्वरू
पादिकं । अविद्वान् अजानन् । प्राणाग्निहोत्रंजुहोति करोति । अंगारानपोह्य परित्यज्य । भस्मनियथाजुहुयात् । तत्अ

उदानेतृप्यतिवायुस्तृप्यतिवायौतृप्यत्याकाशस्तृप्यत्याकाशेतृप्यतियत्किंचवायुश्चाकाशश्चा
धितिष्ठतस्तत्तृप्यतितस्यानुतृप्तिं तृप्यतिप्रजयापशुभिरन्नाद्येनतेजसाब्रह्मवर्चसेनेति ॥ २ ॥ २३ ॥
सयइदमविद्वानग्निहोत्रंजुहोतियथांगारानपोह्यभस्मनिजुहुयात्तादृक्ततस्यात् ॥ १ ॥ अथयएत
देवंविद्वानग्निहोत्रंजुहोतितस्यसर्वेषुलोकेषुसर्वेषुभूतेषुसर्वेष्वात्मसुहुतंभवति ॥ २ ॥ तद्यथेषी
कातूलमग्नौप्रोतंप्रदूयेतैवꣳहास्यसर्वेपाप्मनःप्रदूयंतेयएतदेवंविद्वानग्निहोत्रंजुहोति ॥ ३ ॥

ज्ञानकृतंप्राणाग्निहोत्रं । तादृक् तत्तुल्यं । निष्फलमितियावत् ॥ १ ॥ ज्ञानपूर्वानुष्ठानेफलोक्तिः ॥ अथयएतदिति । तस्य
तेन । हुतंभवतीत्यन्वयः । यद्वासर्वलोकादिषुहुतंतस्यैवभवतीत्यर्थः ॥ २ ॥ फलांतरंचाह ॥ तद्यथेति । वक्ष्यमाणनिदर्श
नंयथाइषीकातूलमितिच्छांदसोह्रस्वाभावः । इष्टकेषीकामालानांचिततूलभारिष्वित्युक्तेरिषीकतूलमितिभाव्यत्वात् ॥ ३ ॥

तस्मादुक्तरीत्यावैश्वानरज्ञानस्यसर्वपापक्षयादिहेतुत्वात् । उच्छिष्टमपात्रेदत्तवैश्वानरेआत्मनिअस्य अनेन । तद्धुतंस्यात्॥४॥
वैश्वानरज्ञानपूर्वकंकृतंप्राणाग्निहोत्रंसर्वाभीष्टप्रदमित्युक्तमर्थंमंत्रेणसंवादयति ॥ तदेषइति । इहलोकेसर्वाणिभूतानिअभी

तस्मादुहैवंविद्यद्यपिचंडालायोच्छिष्टंप्रयच्छेदात्मनिहैवास्यतद्वैश्वानरेहुतꣳस्यादिति ॥ ४ ॥
तदेषश्लोकः । यथेहक्षुधिताबालामातरंपर्युपासते । एवंसर्वाणिभूतान्यग्निहोत्रमुपासतइत्यग्निहो
त्रमुपासतइति ॥ ५ ॥ २४ ॥ ॥ इतिश्रीमच्छांदोग्योपनिषदिपंचमोध्यायः ॥ ५ ॥
हरिःॐ ॥ श्वेतकेतुर्हारुणेयआसतꣳहपितोवाचश्वेतकेतोवसब्रह्मचर्यंनवैसोम्यास्मत्कुलीनोऽननू
च्यब्रह्मबंधुरिवभवतीतिसहद्वादशवर्षउपेत्यचतुर्विंशतिवर्षःसर्वान्वेदानधीत्यमहामनाअनूचान
मानीस्तब्धएयाय तꣳहपितोवाचश्वेतकेतोयन्नुसोम्येदंमहामनाअनूचानमानीस्तब्धोस्युततमादे
शमप्राक्ष्योयेनाश्रुतꣳश्रुतंभवत्यमतंमतमविज्ञातंविज्ञातमिति कथंनुभगवःसआदेशोभवतीति
यथासोम्यैकेनमृत्पिंडेनसर्वंमृन्मयंविज्ञातꣳस्याद्वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यं॥१॥

ष्टापेक्षाणिप्राणाग्निहोत्रमुपासते । द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥ ५ ॥ २४ ॥ ॥ इतिच्छांदोग्योपनिषदर्थसंग्रहेराघवेंद्रयति
कृतेपंचमोऽध्यायः ॥ ५ ॥ जीवजडात्मकात्प्रपंचाद्भिन्नंततोधिकंभगवंतंजानतांस्वर्गमोक्षफलिकाउपास्तयउक्ताःपूर्वाध्यायेषु

षष्ठाध्यायेतुजीवेश्वरभेदविषयेसंदिग्धंविपर्यस्तंवाप्रतीश्वराद्भेदोमोक्षोपयोगीयुक्तिभिर्बोध्यते । तत्रतावत्श्वेतकेतुंनिमित्तीकृत्यजीवानांभगवतोभेदंबोधयन्भेदबोधनस्याभेदप्रसक्तिमाह ॥ **श्वेतकेतुरित्यादिना** । श्वेतकेतुर्नामतःअरुणस्यपौत्रआरुणेयः आस । ह प्रसिद्धं । तंपिताउवाचह ब्रह्मचर्यं वेदाध्ययनमुद्दिश्य । वस गुरुकुलेवेदाध्ययनादिकंकुर्वित्यर्थः । कुतः हेसोम्य अस्मत्कुलीनः अस्मत्कुलेजातःयःकोप्यननूच्यानधीत्य । ब्रह्मबंधुरिव ब्राह्मणाभासइवनवैनैवभवत्यतइत्युवाचेत्यन्वयः । एवंपित्रोक्तःश्वेतकेतुः । द्वादशवर्षः द्वादशवर्षवयस्कः । गुरुकुलमुपेत्य प्राप्यचतुर्विंशतिवर्षः तावद्वयस्कःसन् । सर्वान्वेदानधीत्यानूचानमानीसांगवेदाध्ययनवानहमित्यभिमानवान् । अतएवमहानस्मीतिमनोयस्यासौमहामनाः । अत एवस्तब्धः अविनीतः । एयाय आजगाम । तमागतंपुत्रं पितास्तब्धोसीत्यंतंवाक्यमुवाच । स्तब्धोसीतीदं यन्नु किंन्वित्यर्थः । येनश्रुतेनमतेनविज्ञातेनान्यदश्रुतममतमविज्ञातमपिश्रुतंमतंविज्ञातंभवतितमादेशमुद्दिश्यमानार्थमप्राक्ष्यः पृष्टवानभूः । उततत्किं यद्विषयश्रवणमननविज्ञानेनकर्मदेवतादिजगद्विषयश्रवणादिभवतितद्वस्तुश्रुतवानसिकिं । प्रायेणनश्रुतवान् । अन्यथाकथंतेमहामनस्त्वादिकंभवेदितिचोवाचेत्यन्वयः । अन्यज्ञानेनान्यज्ञानस्यक्वाप्यदर्शनादितिभावेनपुत्रःपृच्छति ॥ **कथमिति** । हेभगवः सआदेशः अन्यज्ञानेनान्यज्ञानंभवतीत्युपदेशः कथंनु कीदृशइतिपप्रच्छपुत्रइत्यर्थः । इति पृष्टःपिता उद्दालकः अन्यज्ञानेनान्यज्ञानप्रकारंषड्भिर्दृष्टांतैरुपपादयति ॥ **यथेति** । हेसोम्य एकेनमृत्पिंडेनविज्ञातेनसर्वं मृन्मयंमृद्विकारजातंमृत्त्वसादृश्यहेतुनाविज्ञातंभवति । एकस्मिन्मृत्पिंडेज्ञातेसतिमृन्मयेषुसर्वेषूपदेशंविनैवविज्ञातमृत्पिंडसा

दृश्यादेतेमृद्रूपाइतियथाज्ञायंतेतथाभगवतिसत्यत्वादिनाज्ञातेसतिसत्यत्वप्रामाणिकत्वादिसादृश्यात्जगदपितथाज्ञायतइ त्यर्थः । भगवतःप्रधानत्वाज्जगतोप्रधानत्वात् । प्रधानज्ञानादप्रधानज्ञानंज्ञातवद्भवतीत्येतद्दृष्टांतेनोपपादयति ॥ वाचारं भणमिति । यथासोम्येत्यनुषज्यते । हेसोम्य वाचा वागिंद्रियेण नाम्नां संस्कृतेतरभाषाशब्दानामारंभणमुच्चारणं । विकारः उत्पादनं । नतुसंस्कृतानामिवव्यंजनं । अतस्तान्यनित्यानि । मृत्तिकेतिउपलक्षणं मृत्तिकेत्यादिसंस्कृतंनामधेयं अविकारः अतएवसत्यंनित्यमित्यर्थः । अतोनित्यत्वात्संस्कृतंनामधेयंप्रधानं । संस्कृतान्यनामानितु पुरुषभेदेनविक्रियमाण तयाऽनित्यत्वेनाप्रधानानि संस्कृतेतरापभ्रंशभाषाशब्दज्ञानेनयत्फलंतत्फलं संस्कृतशब्दज्ञानेनयथाभवति तथाकर्मदेवता

यथासोम्यैकेनलोहमणिनासर्वंलोहमयंविज्ञातꣴस्याद्वाचारंभणंविकारोनामधेयंलोहमणिरित्येव सत्यं ॥ २ ॥

दिजगज्ज्ञानेनयत्फलंतत्सर्वंप्रधानभूतभगवज्ज्ञानेनभवतीतिभावेनयेनश्रुतेनमतेनविज्ञातेनाश्रुतममतमविज्ञातंजगत् । श्रुतम तविज्ञातफलंभवतीत्युक्तमितिस्वाभिप्रायंप्रकटितवानुद्दालकइत्यर्थः । अनुव्याख्यानसुधयोस्तूक्तं वाचारंभणमितिबहुव्री हिः । वाचावागिंद्रियेणारंभणंउच्चारणंयस्यतद्वाचारंभणं । नामधेयंविकारः । विक्रियमाणमुत्पत्तिमत् । अतएवानित्यं । तस्मात्तदप्रधानं । मृत्तिकेत्यादिकंवैदिकंनामधेयं । सत्यंनित्यं ततएवप्रधानमिति । तात्पर्यंतुप्राग्वत् ॥ १ ॥ प्रधानज्ञाना दप्रधानंज्ञातफलंभवतीत्यत्रदृष्टांतांतरमाह ॥ यथासोम्येति । एकेनलोहमणिनासुवर्णेन । ज्ञातेनेतिशेषः । यथास्वर्णस्य

विज्ञानात्साधनानुष्ठानेनतल्लाभेचसति । सर्वेलोहमयाःज्ञातलब्धफलाभवंति एवंप्रधानेनविष्णुना श्रुतादिनानिमित्तेनकर्मदे वतादिजगदश्रुताद्यपि श्रुतमतादिफलंभवतीतिभावेनयेनाश्रुतमितिवाक्येनएकविज्ञानेनसर्वज्ञानमुक्तमिति । अत्रैवार्थेदृष्टां तांतरं ॥ वाचेत्यादि । यथासोम्येत्यनुषज्यते । पूर्ववाक्यइवास्याप्यर्थः लोहमणिरित्येववैदिकंनामधेयंसत्यंनित्यमित्यर्थः । ॥ २ ॥ कैमुत्येनाप्येकज्ञानेनसर्वविज्ञानंदृष्टांतेनव्यनक्ति ॥ यथासोम्येति । एकेनात्यल्पेनापिनखनिकृंतनेनविज्ञातेनत त्साहश्यात्सर्वकार्ष्णायसंविज्ञातंभवति । किमुमहतोभगवतःसत्यत्वचिद्रूपत्वादिनाज्ञानेसतितत्साहश्यात्सर्वंजीवजडादिकं

यथासोम्यैकेननखनिकृंतनेनसर्वंकार्ष्णायसंविज्ञातꣳस्याद्वाचारंभणंविकारोनामधेयंकार्ष्णाय समित्येवसत्यमेवꣳसोम्यसआदेशोभवतीति ॥ ३ ॥

ज्ञायतइतिकिमुवाच्यमितिभावेनयेनाश्रुतमित्याद्युक्तमिति । प्रधानज्ञानादप्रधानज्ञानंज्ञातफलंभवतीत्यत्रदृष्टांतांतरं ॥ वा चेत्यादि । प्रागिवार्थः । नचवाचेत्यादिदृष्टांतत्रयंलोहमणिदृष्टांतश्चैकइतिदृष्टांतचतुष्टयंएकस्मिन्नेवार्थेकिमर्थमितिशंक्यं । तत्त्वस्यदुर्गमत्वेनानेकदृष्टांतोक्तेरर्थवत्त्वात् । अतएवात्रपूर्वाध्यायेएकस्मिन्नेवार्थेएकपाद्ब्रजन्रथोवाएकेनचक्रेणेति लवणेनसु वर्णमित्याद्यनेकदृष्टांतोक्तिः । तदाहसूत्रे अन्यार्थंतुजैमिनिःप्रश्नव्याख्यानाभ्यामपिचैवमेकइति । कथंनुभगवःसआदेशइ

तिप्रश्नस्योत्तरमुक्त्वोपसंहरति ॥ **एवंसोम्येति** ॥ ३ ॥ एवमुक्तःपुत्रआह ॥ **नवाइति** । भगवंतस्ते मह्यमुपदेष्टारः । एत त् त्वयोक्तं । एकविज्ञानरूपतत्त्वं । नूनंनवै नैवावेदिषुः नज्ञातवंतः कुतः । यत् यदि । अवेदिष्यन् ज्ञातवंतः । कथंमेमह्यं नावक्ष्यन्इतिहेतोर्नूनंप्रायोनावेदिषुरिति हियतोऽतःभगवानेवतुतत्मे मह्यं । ब्रवीत्विति पुत्रउवाचेत्यर्थः । तथास्त्विति पितो वाचहेति ॥ ४ ॥ १ ॥ प्रधानत्वाद्ब्रह्मणिज्ञातेअप्रधानंजगदपिज्ञातफलंभवतीत्युक्तं । कथंब्रह्मजगतोःप्राधान्याप्राधान्येइ

नवैनूनंभगवंतस्तएतदवेदिषुर्यद्येतदवेदिष्यन्कथंमेनावक्ष्यन्निति भगवाꣳस्त्वेवमेतद्ब्रवीत्विति तथासोम्येति होवाच ॥ ४ ॥ १ ॥

सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयं तद्धैकआहुरसदेवेदमग्रआसीदेकमेवाद्वितीयंतस्मादस तःसज्जायतइति ॥ १ ॥

त्यतःस्रष्टृसृष्टभावेनेतिभावेनसोपोद्घातंसृष्टिमाह ॥ **सदेवेत्यादिना** । इदं अस्यजगतः । अग्रे पूर्व प्रलये । सर्वोत्तमत्वहेतु नासदेव सन्नामकंब्रह्मैवासीत् अवर्तत । तद्विशिनष्टि ॥ **एकमिति** । एकं स्वीयगुणकर्मरूपादिभेदहीनं । एवंगुणकर्मादि भिर्भेदाभेदहीनं । अद्वितीयं समाभ्यधिकहीनं । स्वमतविरुद्धमनुवदन्दूषयतिश्रुतिः ॥ **तद्धैकइत्यादिना** । ततत्रसृष्टिवि षये । एके शून्यवादिनः । इदं जगदग्रे प्रलये । असदेव शून्यात्मकमेवासीत् । एकमेव भेदशून्यमेव । अद्वितीयं द्विती

यवस्तुहीनं । आसीत्तस्मादसतः शून्यात्सज्जायतेसदजायतइत्याहुर्हैत्यर्थः ॥१॥ तद्दूषयति । हेसोम्य कुतस्तुखलु एवंअसतस्स त्त्वंप्रलयेस्यादिति असतःसज्जायेतेतिचकथंस्यान्नकथमपीतिचहोवाचपिता । एवंपरमतंविनिंद्य पुनःस्वमतमेवस्थिरीकरोति॥ सत्त्वेवेति । सर्वोत्तममेवब्रह्मप्रपंचस्याग्रे एकमेवाद्वितीयंभूत्वा आसीदिति । तुशब्देनतस्यसस्वरूपत्वादासीदितिसत्त्वंजग त्कर्तृत्वंचयुक्तमितिसूचयति ॥ २ ॥ तस्यब्रह्मणःप्रलयांत्यभागेसृष्ट्यर्थंविचारःसमजनीत्याह ॥ तदैक्षतेति । तत् सच्छ ब्दितंब्रह्म । ऐक्षत व्यचारयत् । कथं । बहु नियामकनानारूपं स्यां भवेयं । नियामकनानारूपभवनार्थंनिय

> कुतस्तुखलुसोम्यैवꣳस्यादितिहोवाचकथमसतःसज्जायेतेति सत्त्वेवसोम्येदमग्रआसीदेकमेवा
> द्वितीयं ॥ २ ॥

म्यानि प्रजायेय प्रजनयेयं उत्पादयानीत्यैक्षतेत्यर्थः । तदाहसूत्रे ईक्षतिकर्मव्यपदेशात्सइति । तत् एवमीक्षमाणंस च्छब्दितंब्रह्म । तेजः ते ततेव्याप्तेहरौ प्रकृतौवा स्थितेनरूपेणाजत्वेनानुत्पत्तिमत्त्वेनवर्ततइतिवा । ते पंचम्यर्थेस प्तमी तात् । व्याप्ताद्धरेर्जायतेविद्याख्यजगत्स्रष्टृरूपेणप्रादुर्भवतीतिवातेजःशब्दिताश्रीः । तां तदभिमन्यमानंतेजोभू तंचासृजत । तत्तेजः तेजोभूतमानिनीश्रीरैक्षत । कथं बहुस्यामित्यादिप्राग्वत् । तत् तेजः । अपः अबभिमा निनमप्शब्दितंप्राणं तदभिमताअपश्चासृजत । अपांतेजः कार्यत्वमनुभवारूढंकरोति ॥ तस्मादिति । अपांतेजः

कार्यत्वात् । यत्रक्कचदेशेकालेवाशोचति तापोजायते । स्वेदतेवापुरुषः । तत् तत्रतदावा । तेजसएवापोजायंते ॥ ३ ॥ ताआपः प्राणऐक्षतेत्यादिप्राग्वत् । ताःअबभिमानीप्राणः । अन्नं अन्नशब्दितपृथिवीमानिनंरुद्रं । अत्र तेजःप्रभृतिशब्दाअभिमानिपराअपिध्येयाः । अभिमानिव्यपदेशस्तुविशेषानुगतिभ्यामितिसूत्रात् । अन्नंपृथिवीग्राह्या । पृथिव्यधिकाररूपशब्दांतरादिभ्यइतिसूत्रात् । अन्नस्याब्जातत्वमनुभवारूढंकरोति ॥ **तस्मादिति** । अन्न

तदैक्षत बहुस्यांप्रजायेयेति तत्तेजोसृजत तत्तेजऐक्षत बहुस्यांप्रजायेयेति तदपोसृजत तस्माद्यत्रक्कचशोचतिस्वेदतेवापुरुषस्तेजसएवत(दापो)द्ध्यापोजायंते ॥ ३ ॥ ताआपऐक्षंतबह्व्यःस्याम प्रजायेमहीति ताअन्नमसृजंत तस्माद्यत्रक्कचवर्षतितदेवभूयिष्ठमन्नंभवत्यद्भ्यएवत(द्ध्य)दन्नाद्यंजायते ॥ ४ ॥ २ ॥

तेषांखल्वेषांभूतानांत्रीण्येवबीजानिभवंत्यंडजंजीवजमुद्भिज्जमिति ॥ १ ॥

स्याब्जातत्वादेव यत्रक्कचवर्षति तदेव तत्रैव भूयिष्ठमन्नं पार्थिववस्तुजातं भवति । जायते निगमयति । अद्भ्यएवेति ॥ ४ ॥ २ ॥ अभिमानिसहिततेजोबन्नोत्पत्तिमुक्त्वा तत्प्राधान्यज्ञापनाय तानिचतुर्विधभूतकारणानीत्याह ॥ **तेषामिति** । तेषांप्रसिद्धानामेषांवक्ष्यमाणानांभूतानांप्राणिनांत्रीण्येवबीजानि कारणानि भवंतिखल्विति । उक्तभूतान्याह ॥

अंडजमिति । अंडजंपक्ष्यादि । जीवजं जरायुजंमनुष्यादि । उद्भिद्यजायतइतिउद्भिज्जंवृक्षादि । स्वेदजंचग्राह्यं ॥ १ ॥ तेजोबन्नसृष्ट्यनंतरंविचारपूर्वकंकृतमाहश्रुतिः ॥ सेयमिति । सा सदेवेत्युक्ताइयंतेजोबन्नस्रष्ट्रीविष्णवाख्यादेवताऐक्षत । कथंहंतहर्षे । अहं ताइमास्तिस्रस्तेजोबन्नाख्यादेवताः । साभिमन्यमानाइतिग्राह्यं । अनेनजीवेनजीवाख्येनानिरुद्धात्मना । अनुप्रविश्यनामरूपे शब्दात्मकार्थात्मकजगतीकरवाणि कुर्यामित्यैक्षतेत्यन्वयः ॥ २ ॥ नामरूपनिर्माणार्थं तासांमध्ये

सेयंदेवतैक्षतहंताहमिमास्तिस्रोदेवताअनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीति ॥ २ ॥ तासांत्रिवृतंत्रिवृतमेकैकांकरवाणीतिसेयंदेवतेमास्तिस्रोदेवताअनेनैवजीवेनात्मनानुप्रविश्यनामरूपेव्याकरोत् ॥ ३ ॥

एकैकांतदभिमन्यमानतेजःप्रभृतिष्वेकैकंचत्रिवृतंत्रिवृतंकरवाणि तिसृभ्योदेवताभ्यस्त्रिभ्यः तेजोबन्नेभ्यश्चक्रमात्त्रीन्चेतनांशान् त्रीन्जडांशांश्चोद्धृत्यांशषट्कंमिश्रीकृत्यएकंतेजआख्यमबाख्यंपृथिव्याख्यंचमिश्रीभूतवस्तुत्रयंकरवाणीतिचैक्षतेत्यर्थः । एवमीक्षित्वा तत्तथाकृतवानित्याह ॥ सेयंदेवतेति । देवताः अभिमन्यमानसहिताइतियोज्यं । नामरूपे देवदानवमानवादीनामिंद्राग्न्यादिनामानितत्तच्छरीरादिरूपशब्दितवस्तूनिचव्याकरोत् विशिष्याकरोत् ॥ ३ ॥ अ

त्रतासांत्रिवृतंकृत्वापश्चान्नामरूपेव्याकरोदितित्रिवृत्करणनामरूपकरणयोः पौर्वापर्यंध्येयं। त्रिवृत्करणपूर्वकंनामरूपकर्ताविष्णुरेवेत्युक्तंसूत्रकृता संज्ञामूर्तिक्लृप्तिस्तुत्रिवृत्कुर्वतउपदेशादिति । अत्रायंक्रमः । पूर्वंलक्ष्म्यादीन्तदभिमन्यमानंतेजःप्रभृतिसहितानुप्रविश्यतत्तदंशैस्त्रिवृतमेकैकंकृत्वातेभ्यइंद्रादिनामरूपाण्यकरोत्तानपिसाभिमन्यमानानतेजःप्रभृतिदेवतांशैरनुप्रविश्यतेषामंशान्मिश्रीकृत्यतेभ्यअभिमन्यमानसहिताग्न्यादिनामरूपाण्यकरोत् । पुनरग्न्यादिषुसर्वत्रतेजोबन्नदेवाननुगता

तासांत्रिवृतंत्रिवृतमेकैकामकरोद्यथातुखलुसोम्येमास्तिस्रोदेवतास्त्रिवृत्त्रिवृदेकैकाभवतितन्मे विजानीहीति ॥ ४ ॥ ३ ॥

यदग्नेरोहितꣳरूपंतेजसस्तद्रूपंयच्छुक्लंतदपांयत्कृष्णंतदन्नस्यापागादग्नेरग्नित्वंवाचारंभणंविकारोनामधेयंत्रीणिरूपाणीत्येवसत्यं ॥ १ ॥

नकरोदिति । एवमग्न्यादयः सर्वेभावाः साक्षात्परंपरयावातेजोबन्नकार्याणीत्युक्तं । सर्वेषांनामरूपेअपितेजोबन्नाद्यभिमानिलक्ष्म्याद्युद्भवत्वात्तदधीनेइतिचोक्तं । एतदुभयमनुभवारूढंदर्शयितुंप्रतिजानीते ॥ यथेति । हेसोम्यइमास्तिस्रोदेवताः एकैकात्रिवृत्त्रिवृद्भवतियथाखलुसर्वंतत्कार्यंचभवति । सर्वेषांनामरूपेतदधीनेइतियत्तत्सर्वंवदतोमेविजानीहि । यज्ज्ञानेसति । नकमपिनमस्कुर्यां महाप्राज्ञोहं इत्यहंकारंजह्याः । इत्युवाचपितेत्यर्थः ॥ ४ ॥ ३ ॥ अहंकारमोचनायप्रतिज्ञामाह ॥ यद

ग्नेरिति । अग्नेर्यल्लोहितंरूपंतत्तेजसोंरूपं । तेजोरूपसमुद्भवंतत्तेजोदेव्यधीनंच । यदग्नेःशुक्लंरूपंततत्अपांरूपं अब्रूपसंभवंअ ब्देवप्राणाधीनंच यदग्नेः कृष्णंरूपंततत्अन्नस्यपृथिव्याः रूपं । पृथिवीदेवशिवाधीनंचेत्यर्थः । नकेवलंरूपमेवान्याधीनत्वादि नानमुख्यं । किंतुनामापीत्याह ॥ अपागादिति । अग्नेरग्निनाम्नोयदग्नित्वमग्निनामप्रवृत्तिनिमित्तंतदग्नेःसकाशादपा गात् अपगतमभूत् । मुख्यतोनास्त्यतोग्निनामापिमुख्यंनास्तीत्यर्थः । कुतइत्यतआह ॥ वाचेति । यस्याग्निनाम्नोग्नौवाचा

यदादित्यस्यरोहितꣳरूपंतेजसस्तद्रूपंयच्छुक्लंतदपांयत्कृष्णंतदन्नस्यापागादादित्यादादित्यत्वंवा चारंभणंविकारोनामधेयंत्रीणिरूपाणीत्येवसत्यं ॥ २ ॥ यच्चंद्रमसोरोहितꣳरूपंतेजसस्तद्रूपंयच्छु क्लंतदपांयत्कृष्णंतदन्नस्यापागाच्चंद्राच्चंद्रत्वंवाचारंभणंविकारोनामधेयंत्रीणिरूपाणीत्येवसत्यं ॥ ३ ॥ यद्विद्युतोरोहितꣳरूपंतेजसस्तद्रूपंयच्छुक्लंतदपांयत्कृष्णंतदन्नस्यापागाद्विद्युतोविद्युत्त्वं वाचारंभणंविकारोनामधेयंत्रीणिरूपाणीत्येवसत्यं ॥ ४ ॥ एतद्धस्मवैतद्विद्वाꣳसआहुःपूर्वेमहा शालामहाश्रोत्रियाननोद्यकश्चनाश्रुतममतमविज्ञातमुदाहरिष्यतीतिह्येभ्योविदांचक्रुः ॥ ५ ॥

वागिंद्रियेणारंभणमुच्चारणंतन्नामधेयं विकारः जनिमत् । अन्यत्रमुख्यंसदग्नौसांकेतिकं । नत्वनादितस्तस्यैवसिद्धं अतोऽमु ख्यं । तर्हिकुत्रमुख्यमित्यतआह ॥ त्रीणीति । तेजोबन्नाख्यानियानित्रीणि श्रीप्राणशिवाख्यमेतत्त्रयमेवाग्निनाम्नः सत्यंमुख्यवाच्यमित्यर्थः ॥ १ ॥ एवमादित्यस्येत्यादिवाक्यत्रयस्यापिव्याख्याध्येया ॥०॥ ४ ॥ एकविज्ञानेनसर्वविज्ञाना

दिकमुपदेशपरंपरागतंचेत्याह ॥ एतद्धस्मेति । तत्साद्दश्यप्राधान्यरूपहेतुभ्यांब्रह्मज्ञानेनकर्मदेवतादिसर्वंजगज्ज्ञातमिव भवतीति । प्राधान्यंचहरेर्जगत्कर्तृत्वेन । कर्तृत्वंचतेजोबन्नानांसचेतनानांत्रिवृत्करणेनेत्यादिप्रमेयं विद्वांसोजानंतो महाशालामहाश्रोत्रियाः पूर्वेनोऽस्माकमश्रुतममतमविज्ञातमस्तीतिकश्चनकोप्यद्यतनोनोदाहरिष्यतिनव्यवहरिष्यतीत्येतदाहुर्हस्मवै। प्रधानभगवज्ज्ञानेनसर्वस्यज्ञातफलत्वादितिभावः । एभ्यः तद्विद्वांसइत्यत्रोक्तप्रमेयज्ञानिभ्यः । पूर्वेभ्यः अन्येविदां

यदुरोहितमिवाभूदितितेजसस्तद्रूपमितितद्विदांचक्रुर्यदुशुक्लमिवाभूदित्यपा ँरूपमितितद्विदांचक्रुर्यदुकृष्णमिवाभूदित्यन्नस्यरूपमितितद्विदांचक्रुः ॥ ६ ॥ यद्वविज्ञातमिवाभूदित्येतासामेव देवताना ँसमासइतितद्विदांचक्रुर्यथातुखलुसोम्येमास्तिस्रोदेवताःपुरुषंप्राप्यत्रिवृत्त्रिवृदेकैकाभवतितन्मेविजानीहीति ॥ ७ ॥ ४ ॥

चक्रुः । एकविज्ञानेनसर्वविज्ञानादिप्रकारंज्ञातवंतः ॥५॥ तैर्ज्ञातप्रकारंलेशतोऽनुवदतिश्रुतिः ॥ यदुरोहितमिति । रोहितमिवलोहितमिवाभूदितियत् । उ खलु अस्ति तत्तेजसोरूपं तेजोरूपसंभूतं । तेजोदेव्यधीनंचेति तद्विदांचक्रुरित्यर्थः । यदुशुक्लमित्यादिवाक्यद्वयमप्येवंध्येयं । इवशब्दोऽमुख्यत्वद्योतकः ॥ ६ ॥ यदुयत्खलु अविज्ञातमिवतेजःप्रभृत्यात्मकत्वेनस्फुटमविज्ञातमिवाभूत् तदप्येतासांतेजोबन्नदेवतानां । समासइति संक्षेपःसमुदायइति । तद्विदांचक्रुरित्यर्थः । पृथिव्यादेस्तेज

आद्यात्मकत्वंप्रकारांतरेणज्ञापयितुंप्रस्तावयति ॥ **यथातुखल्वित्यादिना** । इमाःतेजोबन्नसहिताःश्रीप्राणशिवाख्यास्तिस्रो देवताः । पुरुषंजीवशरीरं । इत्युवाचपितेत्यर्थः ॥ ७ ॥ ४ ॥ तन्मेविजानीहीतिप्रतिज्ञातंदर्शयति ॥ **अन्नमिति** । अन्नं अदनयोग्यंपार्थिवंवस्तु । प्राणिभिरशितं भक्षितंसत्त्रेधाविधीयते । कथं यत्तु यःस्थविष्ठःस्थूलतमस्तस्याशितस्यधातुर्भागः तत्पुरीषं विष्ठाभवति । योमध्यमःधातुरित्यनुषंगःतन्मांसं । योऽणिष्ठस्तन्मनस्तस्येतिमध्यमोऽणिष्ठइत्युभयत्राप्यनुषज्यते अत्रान्नपदेनपृथिव्याः प्रकृतत्वेपितस्याअदनायोगात्तदुपादानकतयातदात्मकंपार्थिवमदनार्हंग्राह्यं । अन्नाबादिशब्दैश्चपृथिव्य

अन्नमशितंत्रेधाविधीयतेतस्ययत्स्थविष्ठोधातुस्तत्पुरीषंभवतियोमध्यमस्तन्मा\ँसंयोऽणिष्ठस्तन्म नः ॥ १ ॥ आपःपीतास्त्रेधाविधीयंतेतासांयत्स्थविष्ठोधातुस्तन्मूत्रंभवतियोमध्यमस्तल्लोहितंयो ऽणिष्ठःसप्राणः ॥ २ ॥

स्तेजोभिमान्यंशैरुपेतान्मेवाद्यमानजडानिग्राह्याणि । अभिमान्यंशानामद्यमानत्वंप्राणिभिरुपजीव्यत्वमेव । चिदचिन्मिलितमेवअन्नादिकमद्यमानंसत्स्वस्वांशैस्त्रेधाभूत्वामांसाद्यात्मकंभवति । चिदंशस्यमांसादिभावस्तत्रसन्निधिविशेषएवेतिध्येयं । प्रत्यहंभुज्यमानान्नादिमध्यमाणिमाभ्यांमांसमनःप्रभृतेर्भवनंनामोपचयोध्येयः । गर्भेचमातृभुक्तान्नादिनाचपरिणामःकेषांचित्केषांचिदुपचयइतिज्ञेयं ॥ १ ॥ आपःअबभिमान्यंशोपेताआपःपीताःद्विरूपांशैस्त्रेधाविधीयंते । शिष्टंव्यक्तं । विष्ठामू

त्रयोरपभ्रष्टदेवांशावित्येके।अतएवभाष्येदेवताएवमांसादिशब्दवाच्यास्तत्रप्रवेशादित्येवोक्तमित्याहुः। अन्येतुअन्नाभिमान्यं शयोस्तत्रापिसत्त्वांगीकारेपिनिर्लेपत्वात्तयोर्नदोषइत्याहुः ॥ २ ॥ तेजोशितं तैजसंघृतादिसारवस्तु अभिमानिसहितं व्यक्त मन्यत् ॥ ३ ॥ उत्तरग्रंथोपयुक्ततयोक्तंमध्येप्राधान्यान्मनआद्यंशमेवानुवदति ॥ अन्नमयंहीति । आपोमयोम्मयइत्यर्थः। अत्रमांसादीनामन्नाद्येकैकभूतमयत्वोक्तावप्यन्नशब्दितपृथिव्यादेस्त्रिवृत्करणेनत्र्यात्मकत्वात्मांसादेस्त्र्यात्मकत्वमेवध्येयं ।

तेजोशितंत्रेविधीयतेतस्ययत्स्थविष्ठोधातुस्तदस्थिभवतियोमध्यमःसमज्जायोऽणिष्ठःसावाक्॥३॥ अन्नमयꣳहिसोम्यमनआपोमयःप्राणस्तेजोमयीवागिति भूयएवमाभगवान्विज्ञापयत्विति तथा सोम्येतिहोवाच ॥ ४ ॥ ५ ॥

दध्नःसोम्यमथ्यमानस्ययोऽणिमासऊर्ध्वःसमुदीषतितत्सर्पिर्भवति ॥ १ ॥ एवमेवखलुसोम्यान्न स्याश्यमानस्ययोऽणिमासउर्ध्वःसमुदीषतितन्मनोभवति ॥ २ ॥

तदुक्तं । मांसादिभौमंयथाशब्दमितरयोश्चेति । अन्नमयत्वादिविशेषोक्तिस्तुवैशेष्यात्तुतद्वादइत्युक्तदिशाध्येया । अन्नमयं हिमनइत्याद्युक्तमर्थंदृष्टांतेनस्पष्टंबोधयेतिभावेनाहपुत्रः ॥ भूयइति । भगवान् मा मां । भूयएव पुनरेव । विज्ञापयतुविशे षेणबोधयतुइतिपुत्रेणोक्तःपितोक्तवानित्याह ॥ तथास्त्वित्युवाचेति ॥४॥५॥ उक्तमर्थंदृष्टांतेनबोधयति ॥ दध्नइति । सोम्यदध्नोमथ्यमानस्यसमुदीषति नवनीतरूपेणोद्गच्छति ॥ १ ॥ अश्यमानस्यौदनादेरन्नस्यवैश्वानरेणपच्यमानस्य योऽणि

मा सारांशः । एवमग्रेपि । शिष्टंव्यक्तं । मनआदिभवनंमनआदेरुपचयोज्ञेयः ॥ ४ ॥ उक्तमुपपाद्योपसंहरति ॥ अन्नमयं
हिसोम्येत्यादिना । मनआदेरन्नमयादित्वमनुभवारूढंकुर्विंतिभावेनाहपुत्रः ॥ भूयएवेति । पितावक्ति ॥ तथेति ॥
॥ ५ ॥ ६ ॥ मनआदेरन्नादिमयत्वमनुभवारूढंव्यतिरेकान्वयोक्त्याकरोति ॥ षोडशकलइत्यादिना । हेसोम्य । पुरु
षोजीवः । षोडशकलः सप्राणमसृजत प्राणाच्छ्रद्धामित्यादिनाषट्प्रश्नोक्तदिशा प्राण वाणी विनायक प्राणसुतमरुत् पा

अपाँसोम्यपीयमानानांयोणिमासऊर्ध्वःसमुदीषतिसप्राणोभवति ॥ ३ ॥ तेजसःसोम्या
श्यमानस्ययोणिमासऊर्ध्वःसमुदीषतिसावाग्भवति ॥ ४ ॥ अन्नमयँहिसोम्यमनआपोमयः
प्राणस्तेजोमयीवागितिभूयएवमाभगवान्विज्ञापयत्विति तथासोम्येतिहोवाच ॥ ५ ॥ ६ ॥
षोडशकलःसोम्यपुरुषःपंचदशाहानिमाशीःकाममपःपिबापोमयःप्राणोनपिबतोविच्छेत्स्यत
इति ॥ १ ॥

वक बुध शनींद्र रुद्र चंद्र वरुण वह्नि स्वाहा पुष्कर पर्जन्योषाख्यषोडशदेवैरभिमन्यमानप्राण श्रद्धा ख वायु ज्योति
रप् पृथिवींद्रिय मनोन्न वीर्य तपो मंत्र कर्म लोक नामाख्यषोडशकलः । पंचदशाहानि । दिवसान् । माशीः नभुंक्ष्व ।
कामंयथेष्टमपःपिबकुतोपांपानं आपोमयःप्राणो नपिबतोऽपिबतोविच्छेत्स्यते छिन्नोभविष्यतिहि । यतोऽतइति ॥ १ ॥

सएवमुक्तःपुत्रः नाशीत् नभुक्तवान् । अथानंतरं । एनंपितरमुपससादह । भोपितः किंब्रवीमि अधीतमध्येकिंवदामीत्युवाचे तियोज्यं । पितावक्ति ॥ ऋचइत्यादि । ब्रूहीत्युवाचेतिशेषः । सपुत्रउवाच भोपितःइमाऋगाद्यानवा । नैव प्रतिभांती ति ॥ २ ॥ तंपुत्रमुवाचपिता । हेसोम्यमहतोभ्याहितस्योपचितस्यवह्निराशेरेकोंगारःखद्योतमात्रःपरिशिष्टस्स्यात् । तेनख

सहपंचदशाहानिना(शीदथ)शाथहैनमुपससाद किंब्रवीमिभोइत्यृचःसोम्ययजूꣳषिसामानी तिसहोवाचन(वेमाः)वैमाप्रतिभांतिभोइति ॥ २ ॥ तꣳहोवाचयथासोम्यमहतोभ्याहितस्यैकों गारःखद्योतमात्रःपरिशिष्टःस्यात्तेनततोपिनबहुदहेदेवꣳसोम्य तेषोडशानांकलानामेकाकला तिशिष्टास्यात्तयैतर्हिवेदाननुभवस्यशान ॥ ३ ॥ अथमेविज्ञास्यसीतिसहा(शीदथ)शाथहैनमु पससादतꣳहयत्किं(चित्प)चपप्रच्छसर्वꣳहप्रतिपेदेतꣳहोवाच ॥ ४ ॥

द्योतमात्रावशिष्टत्वहेतुनाततस्तादृशांगारादपिबहुवस्तुजातंनदहेत् दग्धंनभवेत् । यथाएवमेव ते तव षोडशानांकलानां एकाकलातिशिष्टाऽवशिष्टास्यात्अभूत् । तयाकलया एतर्हिंइदानीं वेदाननुभवसि । अशान भुंक्ष्व ॥ ३ ॥ अथ पश्चान्मेममसकाशाद्विज्ञास्यसीतिपितोवाच । सएवमुक्तःपुत्रआशीत्भुक्तवान्अथानंतरं । एनंपितरमुपससाद समीपमगा

त् । तंपुत्रंयत्किंचित्पप्रच्छपिता तत्पृष्टंसर्वं प्रतिपेदे ज्ञातवान्पुत्रः । तंपुत्रंपितोवाच ॥ ४ ॥ यथासोम्येत्यादि । व्य
क्तोर्थः । अभ्याहितस्योपचितस्य तेन समाहितत्वहेतुना । ततोपि परिशिष्टादपि ॥ ५ ॥ उपसमाहिता उपचिता । तया
षोडश्याकलया । एतर्हि इदानीं । व्यतिरेकान्वयाभ्यांमनसोन्नमयत्वमुपपाद्यप्राणादेरप्येवमुपपादनंसिद्धंमत्वोपसंहरति ॥
अन्नमयंहीति । तत्मनआदेःअन्नाद्यंशोपचितत्वं अन्नदेवताद्यधीनत्वंच । अस्य अनेनपुत्रेण । विजज्ञाविति ज्ञातमभूदि

यथासोम्यमहतोभ्याहितस्यैकमंगारंखद्योतमात्रंपरिशिष्टंतंतृणैरुपसमाधायप्रज्वलयेत्तेनततोपि
बहुदहेत् ॥ ५ ॥ एवꣳसोम्यतेषोडशानांकलानामेकाकलातिशिष्टाभूत्सान्नेनोपसमाहिताप्रा
ज्वालीत्तयैतर्हिवेदाननुभवस्यन्नमयꣳहिसोम्यमनआपोमयःप्राणस्तेजोमयीवागितितद्धास्यवि
जज्ञाविति विजज्ञाविति ॥ ६ ॥ ७ ॥

उद्दालकोहारुणिःश्वेतकेतुंपुत्रमुवाचस्वप्नांतंमेसोम्यविजानीहीति यत्रैतत्पुरुषःस्वपितिनामसता
सोम्यतदासंपन्नोभवतिस्वमपीतोभवति तस्मादेनꣳस्वपितीत्याचक्षतेस्वꣳह्यपीतोभवति ॥ १ ॥

तिवेदपुरुषवाक्यं । द्विरुक्तिर्विज्ञातमेवेत्यवधारणार्था । यद्वाऽस्यपितुःसकाशाद्विजज्ञौज्ञातवानेवश्वेतकेतुरितियोजना ॥
॥ ६ ॥ ७ ॥ एवंज्ञानाधिक्येनात्मानमीश्वरंमन्यमानस्यश्वेतकेतोरीश्वरस्यसर्वप्राधान्यंतस्याप्राधान्यंचप्रबोध्य तस्य
सुष्युप्त्यादावभेदशंकांप्रस्ताव्यतत्रापीश्वराधीनत्वज्ञापनेनपरिहरन्भेदमुपदिशतीत्याहश्रुतिः ॥ उद्दालकइत्यादिना । उ

द्दालकोनामतः । अरुणस्यापत्यंआरुणिः । हेसोम्य स्वप्नस्यांतंस्वप्नांतं । सुषुप्तिं । मेममसकाशात् । विजानी हि बुध्यस्वेतिपुत्रमुवाच । एतत्पुरुषः एषपुरुषः । यत्र यदा । स्वपिति निद्राति । नाम प्रसिद्धं । तदा सता सन्नाम्नाहरिणा संपन्नोभवति । तद्व्यनक्ति ॥ स्वमिति । स्वं स्वतंत्रंहरिं । हृदब्जगमपीतः इतरैरज्ञेयत्वेनानुप्रवि ष्टोभवति । कुतः । हि यस्मात्स्वं स्वतंत्रहरिमपीतः प्राप्तो भवति । तस्मादेनंस्वपितीत्याचक्षते जनाइत्यर्थः । तदाहसूत्रे तदभावोनाडीषुतच्छ्रुतेरात्मनिहेति । जाग्रत्स्वप्नयोः श्रांतोजीवःस्वप्नांतरूपसुषुप्तौ श्रमापनोदायभगवतास्वांतर्निवेशितत्वात्

सयथाशकुनिःसूत्रेणप्रबद्धोदिशंदिशंपतित्वान्यत्रायतनमलब्ध्वाबंधनमेवोपश्रयत एवमेवखलु सोम्यैतन्मनोदिशंदिशंपतित्वान्यत्रायतनमलब्ध्वाप्राणमेवोपश्रयते प्राणबंधनꣳहिसोम्यमन इति ॥ २ ॥

तदाकेवलंईश्वराधीनोनस्वतंत्रइत्युक्तं ॥ १ ॥ ईश्वराधीनत्वंसदृष्टांतंव्यनक्ति ॥ सयथेति । स प्रसिद्धोदृष्टांतोयथा शकुनिः पक्षी । सूत्रेणप्रबद्धः दिशंदिशंप्रति प्रतिदिशं । पतित्वा उत्पत्य । अन्यत्र पतितदेशे । आयतनं विश्रांतिकराश्रयं । अलब्ध्वा अप्राप्य । बंधनमेव बध्यतेऽत्रेतिबंधनंस्वपादलग्नसूत्रबंधनशंकुमेव । श्रांतिनिवृत्त्यर्थमुपश्रयते तत्समीपएवास्ते । एवमेवखलुहेसोम्य एतन्मनः मनुतेअवबुध्यतेइतिमनोनामैषजीवः । प्राणमेवप्रणयनहेतुनाप्राणनामकंहरिमेवोपश्रयते ।

शिष्टंप्राग्वत् । कुतः हि यस्मात् । मनो जीवः । प्राणबंधनं प्राणेनबध्यमानस्तस्मादिति । इतिशब्दःसुप्तौभगवदधीनत्वो क्तिसमाप्तौ ॥ २ ॥ जाग्रदवस्थायामपिजीवस्येशाधीनत्वंप्रस्ताव्यबोधयति॥ अशनायेति । अशनाया भोजनेच्छा । पिपा सा पानेच्छा। त उभेनजीवाधीनेतावदतोयदधीने तद्विजानीहीतिपितोवाचेत्यर्थः । कस्मिन्नायत्ते तद्विज्ञापयेतिपुत्रेणोक्तः पितावक्ति ॥ यत्रेति । एतत्पुरुषः एषजीवः । यत्र यदा । अशिशिषति अशितुंभोक्तुमिच्छति तदा अपएव आपएवाबभि मानीप्राणएवान्नेच्छामुत्पाद्यपश्चादशितंभुक्तमन्नंपाकेनतेजःसंयोगेनरसवीर्यादिकरणेननयंते । अन्नंरसादिरूपेणप्राणःपरिण

अशन(या)पिपासेसोम्यविजानीहीतियत्रैतत्पुरुषोऽशिशिषतिनामापएवतदशितंनयंते तद्य थागोनायोश्वनायःपुरुषनायइत्येवंतदपआचक्षतेऽशनायेतितत्रैतच्छुंगमुत्पतितꣳसोम्यविजा नीहिनेदममूलंभविष्यति ॥ ३ ॥

यत्यसावित्युक्तेः । अशितनेतृत्वमपांकुतइत्यतोशनायाशब्दवाच्यत्वादितिसदृष्टांतमाह ॥ तद्यथेति । वक्ष्यमाणंनिदर्शनं यथा गांनयतीतिगोनायोश्वंनयतीत्यश्वनायःपुरुषंनयतीतिपुरुषनायोयथा एवंतदपस्ताआपः अशंनयंतीत्यशनायेत्याचक्ष ते । अबभिमानीचप्राणःतेजोमानिश्रीद्वाराभगवदधीनइतिसिद्धमेवेतिभावः । यत्रैतत्पुरुषःपिपासतिनामेत्यादिवाक्यंयत्रै तत्पुरुषोशिशिषतीतिवाक्यसमाह्यनंतरंध्येयं । योजनाचतद्वदेवध्येया । तेजः तेजोमानिनीश्रीः । सदेवसोम्येत्यादिनाह

रेर्जगत्कर्तृत्वेनप्राधान्यात्तवतत्सृज्यत्वेनाप्रधानत्वात्तद्भिन्नस्तदधीनोसीत्युक्तमर्थंतात्पर्यंद्योतनायपुनराह ॥ तत्रैतच्छुंगमि
त्यादिना । तत्र भगवतोजगत्कर्तृत्वे । तेनप्राधान्येच एततुशुंगंअंकुराख्यंकार्यंज्ञापकमुत्पतितमुत्पन्नं प्राप्तमितिवा । सोम्यवि
जानीहीदंशुंगंजगद्वृक्षांकुरममूलंअकारणकंनभविष्यति ॥ ३ ॥ इतिहेतोस्तस्यान्नात्पृथिवीमानिनःशिवादन्यत्रान्यत् क्व किं

इतितस्यक्वमूलंस्यादन्यत्रान्नादेवमेवखलुसोम्यान्नेनशुंगेनापोमूलमन्विच्छाद्भिःसोम्यशुंगेनते
जोमूलमन्विच्छतेजसासोम्यशुंगेनसन्मूलमन्विच्छसन्मूलाःसोम्येमाःसर्वाःप्रजाःसदायतनाः
सत्प्रतिष्ठाः ॥ ४ ॥ अथयत्रैतत्पुरुषःपिपासतिनामतेजएवतत्पीतंनयते तद्यथागोनायोश्वना
यःपुरुषनायइत्येवंतत्तेजआचष्टउदन्येतितत्रैतदेवशुंगमुत्पतितंसोम्यविजानीहिनेदममूलंभवि
ष्यतीति ॥ ५ ॥ तस्यक्वमूलंस्यादन्यत्राद्भ्योद्भिःसोम्यशुंगेनतेजोमूलमन्विच्छतेजसासोम्यशुंगे
नसन्मूलमन्विच्छसन्मूलाःसोम्येमाःसर्वाःप्रजाःसदायतनाःसत्प्रतिष्ठा यथाखलुसोम्येमास्ति
स्रोदेवताःपुरुषंप्राप्यत्रिवृत्त्रिवृदेकैकाभवति तदुक्तंपुरस्तादेवभवत्यस्यसोम्यपुरुषस्यप्रयतोवाङ्मन
सिसंपद्यतेमनःप्राणेप्राणस्तेजसितेजःपरस्यांदेवतायां ॥ ६ ॥

मूलंस्यात् । अन्नशब्दितः शिवएव मूलं कर्तेत्यर्थः । अन्नेनचशुंगेनकार्येणाब्रूपमूलमन्विच्छ विजानीहीतियावत् ॥ ५ ॥ अ
द्भ्यःअबभिमानिप्राणात्तेजोरूपंमूलंश्रीतत्वमन्विच्छ । तेजसासोम्यशुंगेनसच्छब्दितंमूलं कर्तृ । अन्विच्छ । इमाःप्रजाःसन्मू

लाः सच्छब्दितब्रह्मकर्तृकाः । सदायतनाः सत्स्थितिकाः । मुक्तौसत्प्रतिष्ठाः । भगवदधीनलक्ष्म्याद्यधीनत्वात्सुतरांभगवद धीनःपुरुषइत्याह ॥ यथेति । इमाः श्रीप्राणशिवाख्याःदेवताः शरीरादिकर्तृत्वाल्लक्ष्म्याद्याध्येयाः । तदीशितृत्वेनभगवां श्चावश्यंमुमुक्षुणाध्येयः । इत्यनुसंधानकर्तव्यताज्ञापनायोक्तं ॥ तदुक्तमित्यादि । पुरस्तात्पूर्वमेवतदुक्तंभवतीत्यर्थः । मृ तिमुक्त्योःपरंपरयेशाधीनत्वान्नत्वमीश्वराभिन्नइत्याह ॥ अस्येत्यादिना । हेसोम्यप्रयतो म्रियमाणस्यमुच्यमानस्यचास्य जीवस्य । वाक् वाग्देवीउमा । मनसि मनःप्रेरकेरुद्रे संपद्यते । मनोरुद्रश्चप्राणे प्राणस्तेजसिश्रीतत्त्वेसंपद्यतइत्यन्वेति । प्रा

सयएषोणिमैतदात्म्यमिदꣳसर्वंतत्सत्यंसआत्मातत्त्वमसिश्वेतकेतोइतिभूयएवमाभगवान्विज्ञापयत्वितितथासोम्येतिहोवाच ॥ ७ ॥ ८ ॥

णस्यतेजसिसंपत्तिर्द्वारमात्रंनतुलयइतिज्ञेयं । तेजः श्रीतत्त्वंच । परस्यांदेवतायांसंपद्यते । पुरुषाःमृत्यादौवाग्देवीमुमांप्राप्य परंपरयाईश्वरंप्राप्नुवंतीत्यर्थः ॥ ६ ॥ सर्वनियामकत्वादिरूपत्वाच्चेश्वरस्यनत्वमीश्वरोऽसीत्याह ॥ **सयइति** । सारत्वात्सः । नियामकत्वाद्यः।अप्रतिहतसर्वेच्छारूपत्वादेषः।सूक्ष्मज्ञानेनमीयतेविषयीक्रियतइत्यणिमा।इदंसर्वऐतदात्म्यं । एषआत्मास्वामी अस्येत्येतदात्मा । तदेवैतदात्म्यं । स्वार्थेष्यञ् ।एतत्स्वामिकं । यद्वाकर्मधारयात्स्वस्वामिसंबंधेष्यञ्प्रत्ययः। ततत्वात्तत् परमानं

दरूपत्वात्सत्यं । सविष्णुरात्मा पूर्णगुणः । त्वमतदसितद्भिन्नवस्त्वसि श्वेतकेतो इत्युवाचपितेतियोज्यं । सयइत्यादिनानियामकतयाजीवेषुहरिस्तिष्ठतीत्युक्तं सतासोम्येत्यादिनासुप्तौप्राप्यइतिचोक्तं । तर्हिंकुतोनदृश्यतेतद्वदेतिभावेनाहपुत्रः ॥ भूयएवेति । तथासोम्येतिहोवाचपितेत्यर्थः ॥७॥८॥ स्वस्माद्भिन्नत्वेनादर्शनान्नास्तीतिशंकांहेतोःपुष्परसेष्वनैकांतिकोत्त्यानिराह ॥ यथेति । मधुकृतोभ्रमराःमधु निस्तिष्ठंति निर्ममते । कथं नानात्ययानां नानागतीनामन्योन्यविलक्षणानां । वृक्षाणांरसानां

यथासोम्यमधुमधुकृतोनिस्तिष्ठंतिनानात्ययानांवृक्षाणाꣳरसानाꣳसमवहारमेकतांगमयंति॥१॥
तेयथातत्रनविवेकंलभंतेमुष्याहंवृक्षस्यरसोस्म्यमुष्याहंवृक्षस्यरसोस्मीत्येवमेवखलुसोम्येमाःसर्वाः
प्रजाःसतिसंपद्यनविदुःसतिसंपत्स्यामहइति ॥ २ ॥ तइहव्याघ्रोवासिꣳहोवावृकोवावराहोवा
कीटोवापतंगोवादꣳशोवामशकोवायद्यद्भवंतितत्तदाभवंति ॥ ३ ॥

समवहारं समूहं एकतां मिश्रतां । गमयंति ॥ १ ॥ यथाचते नानावृक्षरसाः । तत्रमिश्रतायांविद्यमानमपि । विवेकमन्योन्यभेदं । नलभंते नजानंति । अमुष्याम्रवृक्षस्याहंरसोस्मिअयंत्वन्यस्येति । तथान्योपिअमुष्यपनसवृक्षस्याहंरसोस्म्ययंत्वन्यस्येति । एवमेवखलुसोम्येमाःसर्वाःप्रजाः परमेश्वरशक्तिभिरेवस्वेस्वेशरीरे । सतिसच्छब्दार्थेश्वरे । संपद्य तेनमिश्रीभावं

ग्राप्य । सतिसंपत्स्यामहे । उपलक्षणमेतत् । संपन्नाःसंपद्यामहइतिनविदुः ॥ २ ॥ इह लोके । ते प्रसिद्धाः । व्याघ्रोवेत्यादियद्यद्भवंतितत्तदापरमेश्वराश्रितत्वाज्ज्ञानापराधाद्भवंतीति । एतेन योयमात्मनोभेदेननपश्यति स ततोनभिद्यतइतिव्याप्तेर्भंगोदर्शितोभवति ॥ ३ ॥ एवंव्याप्तिंनिरस्यस्वतोभिन्नोन्योनियामकोस्तीत्युक्तंसूक्तमित्याह ॥ सयइति । प्रागिवार्थः ॥ ४ ॥ ९ ॥ अस्त्वचेतनानांवृक्षरसानामज्ञानं मयातुयश्चेतनोयमात्मनोभेदेननपश्यतिसततोनभिद्यतइतिव्याप्यांशेविशे

सयएषोणिमैतदात्म्यमिदꣳसर्वंतत्सत्यꣳसआत्मातत्त्वमसिश्वेतकेतोइति भूयएवमाभगवान्विज्ञापयत्विति तथासोम्येतिहोवाच ॥ ४ ॥ ९ ॥

इमाःसोम्यनद्यःपुरस्तात्प्राच्यःस्यंदंतेपश्चात्प्रतीच्यस्ताःसमुद्रात्समुद्रमेवापियंति ससमुद्रएवभवति तायथातत्रनविदुरियमहमस्मीयमहमस्मीति ॥ १ ॥

षणंदीयते । अतोनव्याप्तिभंगइत्यभिप्रायेण भूयएवेतिपुनःपृष्टे पितोवाच ॥ इमाःसोम्येत्यादि । इमाःप्रसिद्धाः । गंगाद्याःनद्यभिमादिदेवताःप्राच्यः प्रागंचनात्गमनात्प्राचीशब्दवाच्याःपुरस्तात्स्यंदंते स्रवंति । तथाप्रत्यगंचनात्प्रतीचीशब्दवाच्याःपश्चात्स्यंदंते । एवमत्यंतविलक्षणास्ताःमेघादिद्वारेणसमुद्रादुत्पन्नजलत्वात्समुद्रमेवापियंति प्रविशंति । तथापिसःसमुद्रएवभवति । तानदीदेवताः । यथातत्र समुद्रे । इयंगंगाहमस्मि इयंतुयमुना अयंतुसमुद्र इत्येवमन्याअपिनविदुः॥१॥

एवमेवखलुसोम्येमाःप्रजाःसतःपरमेश्वरादागम्योत्पद्यापि सतआगच्छामहे उत्पन्नाःस्मःइतिनविदुः । एवमीश्वरेस्थित्वापि तमाश्रिताःस्मइतिनविदुः । तइहेत्यादि पूर्ववत् । अनेनचेतनत्वविशेषितस्यापिव्याप्यत्वाभिमतस्यानैकांत्यमुक्तंभवति॥ २॥ एवंसविशेषणव्याप्तिंचनिरस्य स्वतोभिन्नोनियामकोन्योस्तीत्येतत्सिद्धमेवेत्याह ॥ **सयइति** ॥ ३ ॥ १० ॥ अस्त्वीश्वरः

एवमेवखलुसोम्येमाःसर्वाःप्रजाःसतआगम्यनविदुःसतआगच्छामहइति तइहव्याघ्रोवासिँ होवावृकोवावराहोवाकीटोवापतंगोवादंशोवामशकोवायद्यद्भवंतितत्तदाभवंति ॥ २ ॥ सयएषोणिमैतदात्म्यमिदँसर्वंतत्सत्यँसआत्मातत्त्वमसिश्वेतकेतोइति भूयएवमाभगवान्विज्ञापयत्विति तथासोम्येतिहोवाच ॥ ३ ॥ १० ॥

अस्यसोम्यमहतोवृक्षस्ययोमूलेभ्याहन्याज्जीवन्स्रवेद्योमध्येभ्याहन्याज्जीवन्स्रवेद्योग्रेभ्याहन्याज्जीवन्स्रवेत्सएषजीवेनात्मनानुप्रभूतःपेपीयमानोमोदमानस्तिष्ठति ॥ १ ॥

स्वतोभिन्नस्तथापिजीवस्यतदधीनत्वंकुतः । कथंचाहंजानीयामित्यभिप्रायवतापुनर्भूयएवेतिपृष्टःपिताब्रवीत् ॥ अस्यसोम्येति । हेसोम्य अस्यमहतोवृक्षस्य यःकश्चिन्मूलेअभ्याहन्यात् । जीवन् जीवेनभगवताधिष्ठितश्चेत् । स्रवेत् रसमेवोद्गीरेत् नतुम्रियते । एवंयोमध्यइत्यादि । एवंसएष वृक्षजीवः । अनेनप्रकृतजीवेनात्मनापरमेश्वरेणानुप्रभूतः प्राप्तो धिष्ठि

तदेहः । पेपीयमानःपुनःपुनःभृशंवापिबन्तिष्ठति ॥ १ ॥ अन्वयमुक्त्वाव्यतिरेकमाह ॥ अस्येति । अस्य वृक्षस्य । यदाए
कांशाखां । जीवो हरिः । जहाति त्यजति । अथानंतरं । सा शाखा शुष्यति । यदिद्वितीयां । शाखामित्यनुषंगः ॥ २ ॥
एवमेवखलुसोम्यविद्धीत्युक्तंविशदयति ॥ जीवापेतमिति । जीवेन हरिणाऽपेतं त्यक्तमिदंप्राणिजातं म्रियते । नजीवो ह
रिःम्रियते। अनेनेदमुक्तंभवति। यथावृक्षजीवस्यसदानुपहतात्यक्तदेहेनसुखिनैवस्थातव्यमितीच्छायामपिकदाचिदीश्वरानुग्र

अस्ययदैकांशाखांजीवोजहात्यथसाशुष्यति द्वितीयांजहात्यथसाशुष्यति तृतीयांजहात्यथसा
शुष्यति सर्वंजहातिसर्वःशुष्यत्येवमेवखलुसोम्यविद्धीतिहोवाच ॥ २ ॥ जीवापेतंवावकिलेदं
म्रियतेनजीवोम्रियतइतिसयएषोणिमैतदात्म्यमिदꣳसर्वंतत्सत्यꣳसआत्मातत्त्वमसिश्वेतकेतो
इति भूयएवमाभगवान्विज्ञापयत्वितितथासोम्येतिहोवाच ॥ ३ ॥ ११ ॥
न्यग्रोधफलमतआहरेतीदंभगवइति भिंधीतिभिन्नंभगवइति किमत्रपश्यसीत्यण्व्यइवेमाधा
नाभगवइत्यासामंगैकांभिंधीति भिन्नाभगवइति किमत्रपश्यसीतिनकिंचनभगवइति ॥ १ ॥

हेसति विघातिषुबाह्यकारणेषुसत्स्वप्यवस्थानंभवति । कदाचिदीश्वरानुग्रहाभावेबाह्यकारणबलवत्त्वाभावेपि शरीरशोषत्या
गाद्यनिष्टंभवति । एवंमानुषशरीरेपि । जीवस्येशाधीनत्वंज्ञातव्यमिति । एवंस्वतोन्यं जीवनियंतारं वृक्षदृष्टांतेनविज्ञाप्य
सयइत्यादिनायत्प्रागुक्तंतत्सुस्थमित्याह ॥ सयइति ॥ ३ ॥ ११ ॥ एवंजीवस्यसत्तादिप्रदःपरमात्मैवशरीरेवर्तमानोपिजीवे

नकुतोनदृश्यते । सौक्ष्म्यादितिचेन्न । वालाग्रशतभागस्यापि जीवात्मनःस्वस्यसूक्ष्मस्यदर्शनादितिभावेन । भूयएवेतिपृष्टःपि तोवाच ॥ न्यग्रोधेति । अतः पुरःस्थिताद्वृक्षात् न्यग्रोधफलं वटफलमाहरेत्युवाचपिता । आहृत्येदंन्यग्रोधफलमाहृतंभगवइ तिपुत्रउवाच । इदंफलंभिंधीतिपिता । तद्भित्वा भिन्नंफलमितिपुत्रः । अत्र भिन्नेफले । किंपश्यसीतिपिता । अण्व्यइवेमाः सूक्ष्माधाना बीजानि पश्यामीतिपुत्रः । हेअंग आसां धानानांमध्ये । एकां धानां । भिंधीतिपिता । भित्त्वाभिन्नेतिपुत्रः ।

तꣳहोवाचयंवैसोम्यैतमणिमानंननि(फाल)भालयसएतस्यवैसोम्यैषोणिम्नएवंमहान्यग्रोधस्तिष्ठ तिश्रद्धत्स्वसोम्येति ॥ २॥ सयएषोणिमैतदात्म्यमिदꣳसर्वंतत्सत्यꣳसआत्मातत्त्वमसिश्वेतकेतो इतिभूयएवमाभगवान्विज्ञापयत्वितितथासोम्येतिहोवाच ॥ ३ ॥ १२ ॥

अत्र भिन्नायांधानायां । किंपश्यसीतिपिता । किंचननपश्यामीतिपुत्रः ॥ १ ॥ एवमुक्तवंतमुवाचपिता । यमेतमणिमानंभा वभवित्रोरभेदात्परमसूक्ष्मं परमात्मानं । ननिफालयसे नपश्यसि । अस्याणिम्नःसूक्ष्मभगवतःसामर्थ्यात् । एवं परिदृश्य मानप्रकारेण । महान्न्यग्रोधस्तिष्ठति । श्रद्धत्स्व विश्वासंकुरु । सोम्येतिपिता । अत्रवृक्षःप्रपंचः । फलंशरीरं । धानाःजी वाः । तत्रयथासूक्ष्मेवटबीजेदृश्यमानेपि यत्प्रभावाद्वृक्षावस्थानं सबीजांतर्गतोहरिः परमसूक्ष्मत्वान्नदृश्यते । तथाजीवादपि

सूक्ष्मत्वात्तदंतर्गतइत्युक्तंभवति । अतोयदुक्तंनियंतान्योस्तीतितत्सुस्थमित्याह ॥ २ ॥ सयइति ॥ ३ ॥ १२ ॥ वटावस्थानादिकार्येणेश्वरसामर्थ्येंदृश्यमानेपितस्यादर्शनमित्येतत्कथमहंजानीयामितिभावेनभूयएवेतिप्रार्थितःपितोवाच ॥ लवणमित्यादि । एतल्लवणखंडं कुंभोदके दोषा रात्रौअवधायनिक्षिप्याथानंतरं प्रातः मा मां । उपसीदथाः प्राप्नुयाः । इत्युवाच पितेत्यर्थः । यत्यथापित्रोक्तं तत्तथाचकारहपुत्रः । तंप्रातःसमीपमागतंपुत्रमुवाचहपिता । किमिति । दोषा रात्रौ । यल्लवण

लवणमेतदुदकेवधायाथमाप्रातरुपसीदथाइति(सहत)तद्धतथाचकारत ँहोवाचयद्दोषालवणमुदकेऽवधाअंगतदाहरेतितद्धावमृश्यनविवेदयथाविलीनमेव ॥ १ ॥ अंगास्यांतादाचामेतिकथमितिलवणमिति मध्यादाचामेतिकथमितिलवणमित्यंत्यादाचामेतिकथमितिलवणमित्यभिप्रास्यैतदथमोपसीदथाइति तद्धतथाचकारतच्छश्वत्संवर्ततेत ँहोवाचात्रवावकिलसत्सोम्यननि(फाल)भालयसेत्रैवाकिलेति ॥ २ ॥

मुदकेऽवधाः अवाधाः निक्षिप्तवानसि हेअंग तदाहरेति । तत्कुंभमानीयतन्मध्येहस्तंस्थापयित्वा । अवमृश्य परामृश्य नविवेद नापश्यत् । विलीनमेव अत्यंतंनष्टंवस्तुयथानदृश्यतेतथानविवेदेत्यन्वयः ॥ १ ॥ हे अंग अस्योदकस्यांतात् पूर्वदिगवस्थितादवयवादुद्धृत्यैकदेशमाचामेतिपिता । आचांतवंतंपुत्रंप्रतिकथमितिपप्रच्छ । लवणं लवणरसोपेतमितिपुत्रो

ब्रवीत् । एवंमध्यान्मध्यभागादंत्यात्पश्चिमदिगवस्थिताच्चोद्धृत्याचामेत्यादिप्रश्नप्रतिवचनेध्येये । एतदुदकमभिप्रास्य निरवास्य । मामुपसीदथाःइतिपिता । तद्धतथाचकारपुत्रः । तल्लवणंकुत्रगतमितिजिज्ञासायांवेदपुरुषःस्वयमाह ॥ तदिति । तल्लवणंशश्वत् साकल्येनोदकएवसंवर्तते । नापगतमिति । तत्त्वनिर्णयटीकायांतु तद्धतथाचकारेति वाक्यंशश्वत्अंगतदाहरेत्यनंतरंसंवर्तते । अनुवर्तनीयमितिवार्थइत्युक्तं । तंहोवाचपिता ॥ अत्रवावेति । एतम

सयएषोणिमैतदात्म्यमिदꣳसर्वंतत्सत्यꣳसआत्मातत्त्वमसिश्वेतकेतोइति भूयएवमाभगवान्वि
ज्ञापयत्विति तथासोम्येतिहोवाच ॥ ३ ॥ १३ ॥
यथासोम्यपुरुषंगंधारेभ्योऽभिनद्धाक्षमानीयतंततोऽतिजनेविसृजेत्सयथातत्रप्राङ्वोदङ्वाधराङ्वा
प्राध्मायीताभिनद्धाऽक्षआनीतोभिनद्धाक्षोविसृष्टः ॥ १ ॥

णिमानंसूक्ष्मलवणंयत्रननिफालयसेतल्लवणमत्रैवोदकेसत्विद्यमानंकिल । अत्रैवकिलेतिपुनरुक्तिरादरार्था । अनेनलवणगुणे रसेदृश्यमानेपिलवणंनदृश्यते तथाहरेःसामर्थ्येदृश्यमानेपिनभगवानित्युक्तंभवति ॥ २ ॥ एवंपुत्रशंकितानुपपत्तिंपरिहृत्यत्व दन्योनियामकोस्तीत्युक्तंसूक्तमित्याह ॥ सयइति । एवंभूतोहरिरविद्यापटलपिहितनयनेनकथंदृश्यतेप्राप्यतेचेतितमुपायंव क्तुंप्रार्थयते ॥ भूयएवेति ॥ ३ ॥ १३ ॥ गुरूपदेशस्तद्दर्शनप्राप्त्योर्हेतुरितिसदृष्टांतमाहपिता ॥ यथासोम्येति । हेसोम्य

पुरुषं धनिकं । गंधारसंज्ञकेभ्योजनपदेभ्यः । अभिनद्धाक्षं नहबंधनेबद्धाक्षं । अक्षिणीबद्धेतियावत् । ततोनंतरंआनीय अतिजने जनरहिते । अरण्येविसृजेच्चोरः । सयथातत्रारण्ये । अभिनद्धाक्षआनीतोभिनद्धाक्षोविसृष्टइतिप्राङ्वोदङ्वाध राङ्वा प्रागादिदिगभिमुखोभूत्वेतियावत् । प्राध्मायीत । ध्माशब्दाग्निसंयोगयोः । उच्चैर्ब्रूयात् ॥ १ ॥ यथाकश्चित्कृपावा न्तद्वाक्यंसम्यक्श्रुत्वा तस्याभिनहनंबंधनंप्रमुच्यब्रूयात् एतांदिशं अस्यांदिशि गंधारा जनपदाःसंति । एतांदिशंव्रजेति । सएवमुक्तःपुरुषःतदुपदिष्टात्ग्रामान्निर्गत्यापरंग्रामंपृच्छन् । पंडितःप्राज्ञः । मेधावीस्मृतिमान् । गांधारानेवोपसंपद्येत एव

तस्ययथाभिनहनंप्रमुच्यप्रब्रूयादेतांदिशंगंधाराएतांदिशंव्रजेतिसग्रामाद्ग्रामंपृच्छन्पंडितोमेधा वीगंधारानेवोपसंपद्येतैवमेवेहाचार्यवान्पुरुषोवेदतस्यतावदेवचिरंयावन्नविमोक्ष्येथसंपत्स्यतइ ति ॥ २ ॥ सयएषोणिमैतदात्म्यमिदꣳसर्वंतत्सत्यꣳसआत्मातत्त्वमसिश्वेतकेतोइति भूयएव माभगवान्विज्ञापयत्वितितथासोम्येतिहोवाच ॥ ३ ॥ १४ ॥

मेवानाद्यविद्यादिभिराच्छादितनिजज्ञानःजीवःसंसारेपतितः परमेश्वराज्जातजिज्ञासोगुरूपदेशंलब्ध्वाक्रमापन्नानिश्रवणादी निसाधनान्यनुष्ठायस्वजन्मभूमिंभगवंतंपश्यतीतिभावेनोक्तमाचार्यवान्पुरुषोवेदेति । तस्यभगवद्वेदिनः । यावन्नविमोक्ष्ये प्रारब्धकर्मणोनविमोक्ष्यते । तावदेवचिरं विलंबोब्रह्मप्राप्तौ । अथ भोगेनप्रारब्धक्षयानंतरं । संपत्स्यतेब्रह्मप्राप्नोतिचेति ॥२॥ दर्शनादिप्राप्तिहेतुमुक्त्वाप्रागुक्तंनियामकाद्धरेर्भिन्नोजीवइतिसुस्थमित्याह ॥ सयइति । जीवस्यास्वातंत्र्यंवृक्षदेहेअवग

तंमानुषदेहएवबोधयेतिप्रार्थयते ॥ भूयएवेति ॥ ३ ॥ १४ ॥ तत्पृष्टमन्वयव्यतिरेकाभ्यांबोधयति ॥ पुरुषमिति । हे सोम्य उपतापिनं रोगिणं । ज्ञातयः बांधवाः । पर्युपासते परितउपविशंति । कथं । जानासिमांजानासिमामितिवदंतः । तस्योपतापिनः । यावत्वाक् उमा । मनसि रुद्रे । नसंपद्यते मुक्तव्यापारासती नरुद्रेतिष्ठतीतियावत् । एवमग्रेऽपि ।

पुरुषꣳसोम्योपतापिनंज्ञातयःपर्युपासतेजानासिमांजानासिमामितितस्ययावन्नवाङ्मनसिसंपद्यतेमनःप्राणेप्राणस्तेजसितेजःपरस्यांदेवतायांतावज्जानाति ॥ १ ॥ अथयदास्यवाङ्मनसिसंपद्यतेमनःप्राणेप्राणस्तेजसितेजःपरस्यांदेवतायामथनजानाति ॥ २ ॥ सयएषोणिमैतदात्म्यमिदꣳसर्वंतत्सत्यꣳसआत्मातत्त्वमसिश्वेतकेतोइतिभूयएवमाभगवान्विज्ञापयत्वितितथासोम्येतिहोवाच ॥ ३ ॥ १५ ॥

मनः रुद्रः । प्राणे नसंपद्यते । प्राणस्तेजसि श्रीतत्वे नसंपद्यते । तेजः परस्यांदेवतायां । नसंपद्यते तावज्जानाति ॥१॥ अथ अर्थांतरं । यदास्योपतापिनः । अथ तदा । नजानाति ॥२॥ एवंजीवस्यमानुषदेहेपिपरंपरयाईशाधीनत्वंस्पष्टंप्रबोध्य यदुक्तं नियम्याद्भिन्नत्वंतस्यसयइत्यादिना तत्सुस्थमित्याह ॥ सयइत्यादिना । एवंसर्वप्रेरकंभगवंतमात्मनोभेदेनयोजानाति । यश्च

सोहमस्मीत्यभेदेनजानातितयोःकीदृशंफलमितिभावेनाह ॥ भूयएवेति ॥ ३ ॥ १५ ॥ द्वयोरपिफलंदृष्टांतेनाह ॥ पुरुषमिति । राजद्रव्येऽपगते शंकास्पदंपुरुषमानयंतिराजभटाः । कथमयमपहार्षीत्स्तेयमकार्षीदितिवंदंतइतिशेषः । पश्यतोहरत्वमपहारोन्यत्स्तेयं । ततश्चोरेणेदंमयानकृतमित्युक्तेभटान्प्रतिराजावक्ति । परशुमस्मै अस्यपरीक्षार्थं तपतेति । परशुंतप्तमस्यहस्ते दत्तेतियावत् । सपुरुषोयदितस्यापहारादेःकर्ताभवति नेतिचब्रूते । ततएव कर्तासन्नपिनेतिवदतीतिहेतोरेवात्मानमनृतम

पुरुषꣳसोम्योतहस्तगृहीतमानयंत्यपहार्षीत्स्तेयमकार्षीत्परशुमस्मैतपतेति सयदितस्यकर्ताभवतितत एवानृतमात्मानंकुरुतेसोनृताभिसंधोऽनृतेनात्मानमंतर्धायपरशुंतप्तंप्रतिगृह्णाति सदह्यतेथहन्यते ॥ १ ॥ अथसयदितस्याकर्ताभवतिततएवसत्यमात्मानंकुरुतेससत्याभिसंधःसत्येनात्मानमंतर्धायपरशुंतप्तंप्रतिगृह्णातिसनदह्यतेथमुच्यते ॥ २ ॥ सयथातत्रनादाह्येतैतदात्म्यमिदꣳ सर्वंतत्सत्यꣳसआत्मातत्त्वमसिश्वेतकेतोइतितद्धास्यविजज्ञाविितिविजज्ञाविति ॥ ३ ॥ १६ ॥

॥ ॐमितिश्रीमच्छांदोग्योपनिषदिषष्ठोध्यायः ॥ ६ ॥

सत्यं कुरुते । सोनृताभिसंधः अनृतेअभिसंधोबुद्धिर्यस्यसोनृताभिसंधः । अनृतेनासत्यवचनेनात्मानमंतर्धायाच्छाद्य । तप्तं परशुंप्रतिगृह्णातिसदह्यते । अथानंतरं । सहन्यतेराजभटैः ॥ १ ॥ अथयदितस्येत्यादिव्यक्तं । सयथातत्रनदह्यते एवमेवभगवतःभेदज्ञानीनदह्यते । नहन्यते मुच्यतेचेत्यर्थः ॥ २ ॥ तथाऽभेदज्ञानीचचोरत्वादेवदह्यतेहन्यतेअंधेतमसिपात्यते ।

तथाचप्रागुक्तंसुस्थमित्याह ॥ सयइति । अस्यपितुःसकाशात्तत्पित्रोक्तंसर्वंविजज्ञौ ज्ञातवान्पुत्रइतिश्रुतिवाक्यं । द्विरुक्तिरवधारणार्था ॥ ३ ॥ १६ ॥ ॥ इतिश्रीमच्छांदोग्योपनिषदर्थसंग्रहेराघवेंद्रयतिकृतेषष्ठोऽध्यायः ॥ ६ ॥ ॥ पूर्वाध्यायेप्रज्ञाधिक्येनात्मानमीश्वरंमन्यमानंश्वेतकेतुंप्रतिभेददृष्टांतैर्भेदज्ञानपूर्वमीश्वरोपासनाकार्येत्युक्तं । अत्रपुनरध्याये तारतम्यज्ञानपूर्वंतदंतर्गतत्वेनोपासितोहरिर्मोक्षादिसर्वपुमर्थप्रदइत्यतोदेवानांतारतम्यमाह ॥ अधीहीत्यादिना । नारदः । हेभगवः

॥ हरिः ॐ ॥ अधीहिभगवइतिहोपससादसनत्कुमारंनारदस्त ँहोवाचयद्वेत्थतेनमोपसीद ततस्तऊर्ध्वंवक्ष्यामीति ॥ १ ॥ सहोवाचऋग्वेदंभगवोध्येमियजुर्वेदंसामवेदमाथर्वणंचतुर्थमितिहासपुराणंपंचमंवेदानांवेदंपित्र्य ँराशिंदैवंनिधिंवाकोवाक्यमेकायनंदेवविद्यांब्रह्मविद्यांभूतविद्यांक्षत्रविद्यांनक्षत्रविद्या ँसर्पदेवजनविद्यामेतद्भगवोऽध्येमि ॥ २ ॥

भगवन् । अधीहिमामध्यापयेतिब्रुवन् । सनत्कुमारमुपससाद उपसत्तिमगात् । तंनारदमुवाचहसनत्कुमारः । किमिति । अज्ञातांशस्यैवोपदेष्टव्यत्वात्ज्ञातंभागंवदेत्युवाचेत्याह ॥ यद्वेत्थेति । तेन वेदितकथनेन । मामुपसीद । ततःज्ञातात्ऊर्ध्वंअज्ञातांशंवक्ष्यामीत्युवाचेत्यन्वयः । स इत्युक्तोनारदः उवाचह । तदाह ॥ ऋग्वेदमिति । हेभगवः भगवन् सनत्कुमार इतिहासपुराणमितिद्वंद्वैकवद्भावः । वेदानां ऋगादीनां । पंचमं पंचत्वसंख्यापूरकं । इतिहासपुराणरूपंवेदं । अध्ये

मीतिसर्वत्रान्वेति । पित्र्यं पितृलक्षणोक्तिपरग्रंथं । राशिं गणनशास्त्रं । देवलक्षणपरंदैवं । निधिं निक्षेपएतादृशेस्थलेति
ष्ठतीतितच्चिह्नोपदर्शनपरंशास्त्रं । वाकोवाक्यं मूलवेदं । एकायनं वेदसारसंग्रहशब्दितंपंचरात्रं । समयपादांत्यनयसुधाया
मेकायनंपंचरात्रमित्युक्तेः । देवैर्ज्ञेयाविद्यादेवविद्या तां । ब्रह्मविद्यां आरण्यकं । भूतचिह्नपरंशास्त्रंभूतविद्यां क्षत्रविद्यां
नीतिशास्त्रं । नक्षत्रविद्यां ज्योतिःशास्त्रं । सर्पलक्षणशास्त्रंसर्पविद्यां । देवजनविद्यां देवपरिवारप्रतिपादकंशास्त्रं । एतद्वि
द्याजातमध्येमि ॥ २ ॥ किंतर्हित्वयाज्ञातव्यमित्यतआह ॥ **सइति** । एतावदध्येताप्यहंहेभगवः मंत्रविदेव निर्णेतव्यभ

**सोहंभगवोमंत्रविदेवास्मिनात्मविच्छ्रुतꣳह्येवमेभगवद्दृशेभ्यस्तरतिशोकमात्मविदिति सोहंभ
गवःशोचामि(तंमा)तन्माभगवांꣳश्छोकस्यपारंतारयत्विितितꣳहोवाचयद्वैकिंचैतदध्यगीष्ठानामै
वैतत् ॥ ३ ॥**

गवद्गुणप्रतिपादकशब्दराशिज्ञएवास्मि । नात्मवित् निर्णायकोपक्रमादिन्यायैर्ऋगादिशब्दराशेरर्थंनिर्णीयात्मशब्दितभग
वंतंनज्ञातवान् । किमात्मवेदनेनकृत्यमित्यतआह ॥ **श्रुतंह्रीति** । भगवद्दृशेभ्यः युष्मत्तुल्येभ्यः । महानुभावेभ्यः । आ
त्मविदेवशोकंतरतीतिमेमयाश्रुतंहि । यतोऽतःहेभगवः । शोचामि दुःखमनुभवामि । तंतादृशंमां भगवान् पूज्योभवान्
शोकस्यपारंतारयत्वित्युवाचनारदइत्यन्वयः । तमेवंवक्तारंनारदमुवाचकुमारः। किंतदित्यतआह ॥ **यदिति** । हेनारद त्वं ॥ ९७ ॥

यत्किंचिदृगादिकमध्यगीष्ठाः अधीतवानभूः । एतद्ग्रंथजातंनामैव भगवद्गुणराशिप्रतिपादकनामधेयमेव वैप्रसिद्धं ॥ ३ ॥
तत्किमित्यतःप्रागुक्तंसर्वमनुवदति ॥ **नामवाऋग्वेदइति** । नामवाइतिपदंसर्वत्रान्वेति । भगवन्नामत्वंदृढीकर्तुमंतेप्यव
धारयति ॥ **नामैवैतदिति** । तदाहसूत्रे । संज्ञातश्चेत्तदुक्तमस्तितुतदपीति । यद्वा एतत् नामैव अमेया । अज्ञेयानभवति।
किंतूषःकालमानित्वादुषसिज्ञायतइतिनामाख्यया । उषोदेव्याऽभिमन्यमानमेतत्ग्रंथजातमित्यर्थः । तर्हिकिंकार्यमित्यतआ

**नामवाऋग्वेदोयजुर्वेदःसामवेदआथर्वणश्चतुर्थइतिहासपुराणःपंचमोवेदानांवेदः पित्र्योराशिर्दै
वोनिधिर्वाकोवाक्यमेकायनंदेवविद्याब्रह्मविद्याभूतविद्याक्षत्रविद्यानक्षत्रविद्यासर्पदेवजनविद्या
नामैवैतन्नामोपास्स्वेति ॥ ४ ॥ सयोनामब्रह्मेत्युपास्तेयावन्नाम्नोगतंतत्रास्ययथाकामचारोभवतियो
नामब्रह्मेत्युपास्तेस्तिभगवोनाम्नोभूयइति नाम्नोवावभूयोस्तीतितन्मेभगवान्ब्रवीत्विति ॥५॥१॥**

ह ॥ **नामेति** । नाम्निउषोदेव्यां ब्रह्मास्तीत्युपास्स्व । इतितमुवाचेत्यन्वयः । तदाहसूत्रे नप्रतीकेनहिसइति ॥४॥ फलमाह॥
सयइति । सप्रसिद्धो योऽधिकारी । नामब्रह्मेति नाम्निब्रह्मास्तीत्युपास्ते । अस्योपासकस्य । यावन्नाम्नःउषोदेव्याः । गतं
व्याप्तिः । तत्र तावतिदेशे । यथाकामचारोभवति । योनामेतिपुनरुक्तिरादरार्था । नाम्नो नाममानिन्याउषसःसकाशात् ।
भूयः श्रेष्ठं । वस्त्वस्तिकिमितिप्रश्नस्योत्तरमाहकुमारः ॥ **नाम्नोवावेति** । तन्मेब्रवीत्वितिनारदः । अत्र नाम्नःपूर्वं । कर्म

भूमिमानिनौक्रमान्नीचोच्चौपुष्करशनैश्चरौग्राह्यौ ॥ ५ ॥ १ ॥ वाग्वाव वागभिमानिनीस्वाहादेव्येव । नाम्नो नामाभिमानि
न्याअश्विपत्न्याःउषोदेव्याः । भूयसी । धर्मज्ञानादिसर्वगुणैःश्रेष्ठा । साचाग्निभार्या । वं वसुं अंचतिगच्छतीतिवसुनामका
र्श्यंचनहेतुना वागित्युक्ता । वाग्देव्यामाहात्म्यमाह ॥ वाग्वाइति । वाग्देवी स्वाहाख्या ऋग्वेदंविज्ञापयतिवै । वागिंद्रि

वाग्वावनाम्नोभूयसीवाग्वाऋग्वेदंविज्ञापयतियजुर्वेद꣡ꣳसामवेदमाथर्वणंचतुर्थमितिहासपुराणं
पंचमंवेदानांवेदंपित्र्यंराशिंदैवंनिधिंवाकोवाक्यमेकायनंदेवविद्यांब्रह्मविद्यांभूतविद्यांक्षत्रवि
द्यांनक्षत्रविद्या꣡ꣳसर्पदेवजनविद्यांदिवंचपृथिवींचवायुंचाकाशंचापश्चतेजश्चदेवा꣡ꣳश्चमनुष्या꣡ꣳश्च
पशू꣡ꣳश्चवया꣡ꣳसिचतृणवनस्पतीञ्छ्वापदान्याकीटपतंगपिपीलिकं धर्मंचाधर्मंचसत्यंचानृतंच
साधुचासाधुचहृदयज्ञंचाहृदयज्ञंचयद्वैवाङ्नाभविष्यन्नधर्मोनाधर्मोव्यज्ञापयिष्यन्नसत्यंनानृतंन
साधुनासाधुनहृदयज्ञोनाहृदयज्ञो वागेवैतत्सर्वंविज्ञापयतिवाचमुपास्स्वेति॥ १ ॥

यदेवताप्रसादेनहिगुरूच्चारणानूच्चारणादिनाऋग्वेदादिकंजानातिजीवइत्यर्थः । श्वापदानि आरण्यजंतुविशेषः । आकीटप
तंगपिपीलिकं कीटपतंगपिपीलिकापर्यंतं । हृदयज्ञं हृद्ययतेवर्ततइतिहृदयंब्रह्म तज्जानातीतितज्ज्ञं भगवत्तत्त्वज्ञं । अहृदयज्ञं
ब्रह्मेतरवस्तुज्ञंच वाग्विज्ञापयतीतिसर्वत्रान्वेति । अन्वयमुक्त्वाव्यतिरेकमाह ॥ यद्वैवाङ्नाभविष्यदिति । यत् यदि । ॥ ९८ ॥

वाङ्नाभविष्यत् तर्हिधर्मादि कोपिनव्यज्ञापयिष्यत् विज्ञातोनभवेत् । व्यज्ञापयिष्यदितिनसत्यमित्यादौसर्वत्रान्वेति । निर्धारयति ॥ वागेवेति । वाचमुपास्स्वेतिद्वितीयासप्तम्यर्थे । वाचिवाग्देव्यां ब्रह्मास्तीत्युपास्स्वेत्यर्थः ॥ १ ॥ सयइत्यादि प्राग्वत् । अत्रनाम्नः उच्चः वाचोनीचो जलमानीबुधोमध्येग्राह्यः ॥२॥ २ ॥ वृष्ट्यादिनांकुरादिनिर्माणहेतुना मनःशब्दोक्तः पर्जन्यः वाचोवाग्देव्याःस्वाहातः भूयोवाव प्रसिद्धं । मनसोभूयस्त्वंदृष्टांतपूर्वंव्यनक्ति ॥ यथेति । द्वेआमलके धात्रीफले

सयोवाचंब्रह्मेत्युपास्तेयावद्वाचोगतंतत्रास्ययथाकामचारोभवतियोवाचंब्रह्मेत्युपास्तेस्तिभगवो वाचोभूयइतिवाचोवावभूयोस्तीति तन्मेभगवान्ब्रवीत्विति ॥ २ ॥ २ ॥

मनोवाववाचोभूयोयथावैद्वेवाऽऽमलकेद्वेवाकोलेद्वौवाऽक्षौमुष्टिरनुभवत्येवंवाचंचनामचमनोनुभ वति सयदामनसामनस्यतिमंत्रानधीयीयेत्यथाधीतेकर्माणिकुर्वीयेत्यथकुरुतेपुत्रांश्चपशूंश्चेच्छेये त्यथेच्छत इमंचलोकममुंचेच्छेयेत्यथेच्छतेमनोह्यात्मामनोहिलोकोमनोहिब्रह्ममनउपास्स्वेति ॥१॥

द्वेवाकोले क्रमुकफले । द्वौवाअक्षौ विभीतकाक्षौ । मुष्टिरनुभवति स्वांतर्भावयतियथा । एवंवाचंवाग्देवीं नामच नामदेवीं उषसं । मनो मनःशब्दितःपर्जन्यः । अनुभवति । स्वसामर्थ्येअंतर्भावयति । स्वाधीनतयाकरोतीतियावत् । स मनस्वीपु मान् । मनसामनस्यति आलोचयति । किमिति मंत्रानधीयीयेति मंत्राध्ययनंकरवाणीति । अथानंतरमधीते । मनसामन

स्यतीत्येतत् कर्माणिकुर्वीयेत्याद्युत्तरवाक्यत्रयेप्यन्वेति । आत्मनोमनोधीनप्रवृत्तिकत्वान्मनोह्यात्मा । उक्तदिशामनोधीनत्वान्मनोहिलोकः । मनोब्रह्म । मनसिसान्निध्यविशेषात्मनउपास्स्व मनसिपर्जन्येब्रह्मास्तीत्युपास्स्वेत्यर्थः ॥ १ ॥ सयइत्यादिप्राग्वत् । मनसोगतं पर्जन्यस्ययावद्देशेव्याप्तिरित्यर्थः । अत्रपर्जन्यवाचकमनःशब्देनवरुणानी संज्ञा रोहिणी धार्मी विराट्चेतितत्समानाःपंचदेव्योग्राह्याः ॥ २ ॥ ३ ॥ ७ ॥ **संकल्पइति** । अह्निसंकल्पहेतुतयासंकल्पनामामित्रदेवः मनसः

सयोमनोब्रह्मेत्युपास्तेयावन्मनसोगतंतत्रास्ययथाकामचारोभवतियोमनोब्रह्मेत्युपास्तेस्तिभगवोमनसोभूयइति मनसोवावभूयोस्तीति तन्मेभगवान्ब्रवीत्विति ॥ २ ॥ ३ ॥

संकल्पोवावमनसोभूयान्यदावैसंकल्पयतेथमनस्यत्यथवाचमीरयतितामुनाम्नीरयतिनाम्निमंत्राएकंभवंतिमंत्रेषुकर्माणि ॥ १ ॥

मनःशब्दोपात्तपर्जन्यात्तत्समेभ्यश्चेत्यर्थः । एतच्चोपलक्षणं । रैवतप्रभृत्येकादशमनु च्यवनोचथ्यवैन्यशशबिंदुहैहयप्रियव्रतगयानुक्तशतस्थदेवादयश्चपर्जन्यादिभ्यःषड्भ्योभूयांसः । तेभ्यश्चाश्विविघ्नेशवित्तपविष्वक्सेनाःभूयांसस्तेभ्यस्संकल्पनामामित्रःभूयानित्यर्थः । संकल्पशब्दितमित्रग्रहणेनचनिर्ऋतिर्बृहस्पतिभार्यातराप्रावहीचेतितिस्रोदेवतास्तत्समानाग्राह्याः । यदापुमान्संकल्पाख्यमित्रेणप्रेरितःसंकल्पयते मननादिकंकरोमीतिसंकल्पंकरोति । अथानंतरं मनस्यति मनःप्रेरयति । अ

थानंतरं । वाचं वागिंद्रियमीरयति सव्यापारंकरोति । तांनाम्निभगवन्नामभूतेशब्दराशिविषये । ईरयतिप्रेरयति । भगवन्नामभूतशब्दराशिमुच्चारयति । नाम्नि शब्दराशौ । मंत्राएकंभवंति । अंतर्भवंतिएकार्थकाभवंति । मंत्रेषुकर्माणि एकंभवंतीत्यनुषंगः । तत्रप्रतिपाद्यानिभवंतीत्यर्थः ॥ १ ॥ तानिहवाएतानि मनोवाङ्नाममंत्रकर्माणि तदभिमानिनःपर्जन्यादयश्च । प्रागुक्ताःसंकल्पैकायनानिसंकल्पाख्यमित्राधीनानि । अतएवसंकल्पात्मकानि । मित्रात्मकानिवोच्यंते संकल्पेमित्रेप्रतिष्ठिता

तानिहवाएतानिसंकल्पैकायनानिसंकल्पात्मकानिसंकल्पेप्रतिष्ठितानिसमक्लृपतांद्यावापृथिवीसमकल्पेतां वायुश्चाकाशश्चसमकल्पंता(मा)पश्चतेजश्चतेषांसंक्लृप्त्यैवर्षंसंकल्पतेवर्षस्यसंक्लृप्त्याअन्नंसंकल्पतेऽन्नस्यसंक्लृप्त्यैप्राणाःसंकल्पंतेप्राणानांसंक्लृप्त्यैमंत्राःसंकल्पंतेमंत्राणांसंक्लृप्त्यैकर्माणिसंकल्पंतेकर्मणांसंक्लृप्त्यैलोकाःसंकल्पंतेलोकानांसंक्लृप्त्यैसर्वंसंकल्पतेसएषसंकल्पःसंकल्पमुपास्स्वेति २

निमुक्तौ । मुक्तावपितदधीनानीतियावत् । नकेवलमेतावत् संकल्पादेवचद्यावाभूम्याद्युत्पत्तिरपीत्याह ॥ **समक्लृपतामिति** । समकल्पेतां अजायेतामित्यर्थः । समकल्पंतअजायंत । तेषां द्यावापृथिव्यादीनां । संक्लृप्त्यै संक्लृप्त्याएव । एवमग्रेपि । संकल्पते उत्पद्यते । प्राणाःसंकल्पंतेउपचीयंते । अत्रद्यावापृथिव्यादयोजडाश्चेतनाश्च । जडानांसंक्लृप्तिःसंकल्पाख्यमित्रात् । चेतनानांसंक्लृप्तिर्वाय्वादितइतिविवेकः । उपसंहरति ॥ सइति । ससंकल्पोमित्रः । एष एतादृशइत्यर्थः । संकल्पमुपास्स्व । मित्रे त

तत्समानेषुच। ब्रह्मोपास्स्वेत्यर्थः॥२॥कॢप्तान्संकल्पाधिष्ठितान्। ध्रुवान्प्रतिष्ठितान्।अव्यथमानान् व्यथाशून्यान्। लोकान् ध्रुवः प्रतिष्ठितो व्यथमानःअभिसिध्यति। प्राप्नोति। संकल्पस्य मित्रस्य। यावद्गतंयावतीव्याप्तिः। संकल्पात् मित्रात्। तत्समानदेवेभ्यश्चभूयोस्तिकिमित्यर्थः॥३॥४॥चित्तं अस्थिरस्मृतिरूपचित्तमानी होमकुंडेचितत्वहेतुनाचित्तनामाग्निः तत्समानौभृगु(दक्ष

सयःसंकल्पंब्रह्मेत्युपास्तेकॢप्तान्वैसलोकान्ध्रुवान्ध्रुवःप्रतिष्ठितान्प्रतिष्ठितोऽव्यथमानानव्यथमो नाभिसिध्यतियावत्संकल्पस्यगतंतत्रास्ययथाकामचारोभवतियःसंकल्पंब्रह्मेत्युपास्तेस्तिभग वःसंकल्पाद्भूयइतिसंकल्पाद्वावभूयोस्तीतितन्मेभगवान्ब्रवीत्विति ॥ ३ ॥ ४ ॥

चित्तंवावसंकल्पाद्भूयोयदावैचेतयतेऽथसंकल्पयतेऽथमनस्यत्यथवाचमीरयतितामुनाम्नीरयति नाम्निमंत्राएकंभवंतिमंत्रेषुकर्माणि ॥ १ ॥

प्रजापतिभार्या)प्रसूतीचेतिदेवतात्रयं संकल्पात् मित्रात्। तत्समेभ्योनिर्ऋतितारप्रावहीरूपदेवेभ्यश्च भूयःश्रेष्ठं। उपलक्षणमेतत्। मरीच्यत्र्यंगिरःपुलस्त्यपुलहक्रतुवसिष्ठविश्वामित्रवैवस्वतमनुभ्योमित्रादिदेवचतुष्टयादुत्तमेभ्योपिभूयइतिज्ञेयं। वावेत्यवधारणे। यदापुमान्चित्तमानिप्रेरितश्चेतयते कर्तव्याकर्तव्यंजानाति। अथानंतरंसंकल्पयते इदंकर्मकरोमीत्यादि

रूपेणसंकल्पं मनोवृत्तिविशेषंकरोति । अथमनस्यति मनःप्रेरयति । शिष्टंप्राग्वत् ॥ १ ॥ तानिहवाएतानि चेतनाचेतनरूपसंकल्पादीनि । चित्तैकायनानि अग्निभृगुप्रसूतिरूपदेवतात्रयाधीनानि । चित्तात्मकानि चित्तप्रधानानितस्मात्संकल्पादेश्चित्ताधीनत्वात् । यत् यदि । बहुविदपि बहुज्ञोपि । अचित्तः स्मरणहीनश्चेत्भवति । एनमनुभूतमस्मरंतंपुरुषं । अयंनास्तीत्याहुः । अविद्यमानप्रायमेवाहुर्जनाः । पुनर्जनोक्तिप्रकारमाह ॥ यदिति । यत् यदि । अयंवेद सामान्यतोजाना

तानिहवाएतानिचित्तैकायनानिचित्ता(त्मकानि)त्मानिचित्तेप्रतिष्ठितानितस्माद्यदपिबहुविदचित्तोभवतिनायमस्तीत्येवैनमाहुर्यदयंवेदय(दिवा)द्वाअयंविद्वान्नेत्थमचित्तःस्यादित्यथयद्यल्पविच्चित्तवान्भवतितस्मादेतच्छुश्रूषंतेचित्तꣳह्येकायनंचित्तमात्माचित्तंप्रतिष्ठाचित्तमुपास्स्वेति ॥ २ ॥

ति । यदिवाविद्वान्विशेषतोजानीयात् । तर्हिइत्थमचित्तःस्मरणहीनःनस्यादितिचाहुरित्यर्थः । अथेत्यर्थांतरे । यद्यल्पविदपिचित्तवान्स्मृतिमान्भवति । तस्मात् पुरुषात् । एतत् स्वस्वाभिमतंप्रमेयं । शुश्रूषंते श्रोतुमिच्छंतिजनाः । उपसंहरति । चित्तंह्येकायनं चित्तमानित्रयंमुख्याश्रयः । संकल्पमनःप्रभृतेरित्यर्थः । चित्ताधीनसंकल्पादिमत्त्वादात्माचेतनश्चित्तमित्यु

च्यते । चित्तंप्रतिष्ठा मुक्तावाश्रयः । चित्तमुपास्स्वेति अग्न्यादित्रयेब्रह्मोपास्स्वेत्यर्थः ॥ २॥ चित्तान्लोकानग्न्याद्यधिष्ठिता न्लोकान् । शिष्टंव्यक्तं॥ चित्ताद्वावेति। अग्निभृगुप्रसूतिभ्यःभूयोस्तिकिमित्यर्थः ॥ ३॥ ५॥ ध्यानमिति । ध्यानमानी। सत्यानृतविवेचनार्थंब्रह्मणानिहितत्वहेतुनाध्याननामावरुणः । चित्तात् चित्तशब्दिताग्निभृगुप्रसूतिरूपदेवतात्रयात् । भू

सयश्चित्तंब्रह्मेत्युपास्तेचित्तान्वैसलोकान्ध्रुवान्ध्रुवःप्रतिष्ठितान्प्रतिष्ठितोऽव्यथमानानव्यथमानो भिसिध्यतियावच्चित्तस्यगतंतत्रास्ययथाकामचारोभवतियश्चित्तंब्रह्मेत्युपास्तेस्तिभगवश्चित्ताद्भू यइति चित्ताद्वावभूयोस्तीतितन्मेभगवान्ब्रवीत्विति ॥ ३ ॥ ५ ॥

ध्यानंवावचित्ताद्भूयोध्यायतीवपृथिवीध्यायतीवद्यौर्ध्यायतीवांतरिक्षंध्यायंतीवापोध्यायंती वपर्वताध्यायंतीवदेवमनुष्यास्तस्माद्यइहमनुष्याणांमहत्तांप्राप्नुवंतिध्यानापा(दां)दंशाइवैवते भवंत्यथयेल्पाःकलहिनःपिशुनाउपवादिनस्तेथयेप्रभवोध्यानापा(दां)दंशाइवैवतेभवंतिध्यानमु पास्स्वेति ॥ १ ॥

यः श्रेष्ठः । उपलक्षणमिदं । अग्न्यादित्रयादुत्तमान्नारदाद्भूयइतिज्ञेयं । ध्यानात्मनोवरुणस्यमहिमानमाह ॥ ध्यायतीवे ति । पृथिव्यादयःसर्वेंचेतनाःध्यायंतीव भगवद्ध्यानपराएवतिष्ठंति । ध्यानस्यभूयस्त्वादेवेतिभावः । इवशब्दोस्वातंत्र्यद्यो

तकः । नबहुभाषिणइतिवा । एकेतुपृथिव्यादयोजडाः । निश्चलत्वात्ध्यायंतीवेत्यर्थइत्याहुः । मनुष्यतांप्राप्तादेवादेवमनु ष्याः । तेध्यायंतीव नबहुभाषिणइत्यर्थः । तस्मात् ध्यानस्यभूयस्त्वादेव । इह लोके । ये जनाः । मनुष्याणांमध्येमहत्तां ज्ञानबलैश्वर्यादिभिर्महत्त्वं । प्राप्नुवंति तेजनाः । ध्यानापादांशाइव ध्यानस्यआपाद्यतइत्यापादःध्यानसंपाद्यफलं । तस्यांशः । ध्यानापादस्यांशोयेषांते । ध्यानापादांशाइतिव्यधिकरणबहुव्रीहिः । ध्यानापादांशएषामस्तीतिध्यानापादांशाइति अर्शआद्यच्प्रत्ययांतोवा । इवशब्दोऽस्वातंत्र्यद्योतकः । इदानींजनेषुदृश्यमानमहत्त्वंपूर्वकृतध्यानजन्यफलैकदेशइत्यर्थः ।

सयोध्यानंब्रह्मेत्युपास्तेयावद्ध्यानस्यगतंतत्रास्ययथाकामचारोभवतियोध्यानंब्रह्मेत्युपास्तेस्ति भगवोध्यानाद्भूयइतिध्यानाद्वावभूयोस्तीतितन्मेभगवान्ब्रवीत्विति ॥ २ ॥ ६ ॥

साधनेफलेचभगवानेवस्वतंत्रइतिभावः । अथयेअल्पाः ज्ञानबलैश्वर्यादिहीनतयावर्तंते । ते कलहिनः कलहवंतः । पिशुनाः राजादौपरवित्तादिवाचकाः । उपवादिनः परदोषानुवादकाःभवंतीत्यर्थः । नतुध्यानलेशभागिनइतिभावः । अथयेप्रभवः प्रबुभूषवः । भूतिमंतोभवामेतीच्छवः तेध्यानापादांशाइवैवभवंति । ध्यानानुष्ठानेनतज्जन्यफलैकदेशभागिनोभवंतीत्यर्थः । एवंध्यानमाहात्म्यमुक्त्वाकर्तव्यमाह ॥ ध्यानमिति । ध्यानमानिनिवरुणेब्रह्मोपास्स्वेत्यर्थः ॥ १ ॥ यावद्ध्यानस्येति ।

ध्यानमानिनोवरुणस्येत्यर्थः ॥ २ ॥ ६ ॥ विज्ञानमिति । विज्ञानमानीसत्यस्यविवेचनहेतुनाविज्ञाननामाचंद्रः । त
त्समौसूर्ययमौस्वायंभुवमनुपत्नीशतरूपाचेतितिस्रोदेवताश्चग्राह्याः । विज्ञानादिचतुष्टयंध्यानाद्वरुणाद्भूयः । तस्यमहिमा

विज्ञानंवावध्यानाद्भूयोविज्ञानेनवाऋग्वेदंविजानातियजुर्वेदꣳसामवेदमाथर्वणंचतुर्थमितिहा
सपुराणंपंचमंवेदानांवेदंपित्र्यꣳराशिंदैवंनिधिंवाकोवाक्यमेकायनंदेवविद्यांब्रह्मविद्यांभूतवि
द्यांक्षत्रविद्यांनक्षत्रविद्याꣳसर्पदेवजनविद्यांदिवंचपृथिवींचवायुंचाकाशंचापश्चतेजश्चदेवाꣳश्च
मनुष्याꣳश्चपशूꣳश्चवयांसिचतृणवनस्पतीञ्छ्वापदान्याकीटपतंगपिपीलिकंधर्मंचाधर्मंचसत्यंचा
नृतंचसाधुचासाधुचहृदयज्ञंचाहृदयज्ञंचान्नंचरसंचेमंचलोकममुंचविज्ञानेनैवविजानातिविज्ञान
मुपास्स्वेति ॥ १ ॥ सयोविज्ञानंब्रह्मेत्युपास्तेविज्ञानवतोवैसलोकान्ज्ञानवतोभिसिद्ध्यति
यावद्विज्ञानस्यगतंतत्रास्ययथाकामचारोभवतियोविज्ञानंब्रह्मेत्युपास्तेऽस्तिभगवोविज्ञानाद्भू
यइतिविज्ञानाद्वावभूयोस्तीतितन्मेभगवान्ब्रवीत्विति ॥ २ ॥ ७ ॥

नमाह ॥ विज्ञानेनेति । शिष्टंप्राग्वत् । हृदयंभगवंतं । अहृदयंभगवतोन्यत् । विज्ञानमुपास्स्वेति । विज्ञानशब्दित
चंद्रादिचतुष्टयेब्रह्मोपास्स्वेत्यर्थः ॥ १ ॥ विज्ञानवतः चंद्राद्यधिष्ठितलोकान् ॥ विज्ञानादिति । विज्ञानशब्दितचंद्रसूर्य

धर्मशतरूपाख्यदेवताचतुष्टयाद्भूयोस्तिकिमित्यर्थः ॥ २ ॥ ७ ॥ बलमिति । बलंद्विविधं । युक्तिजन्यनिर्णयवस्त्वरूपमांत रंबलं । देहदार्ढ्यादिरूपंबाह्यबलंचेति । तद्विविधबलमानीबलनामाभूतवायुःप्रवहः । विज्ञानात् विज्ञानशब्दितचंद्रादिचतु

बलंवावविज्ञानाद्भूयोपीहशतंविज्ञानवतामेकोबलवानाकंपयते सयदाबलीभवत्यथोत्थाताभव त्युत्तिष्ठ(न्नु)न्परिचरिताभवतिपरिचरन्नुपसत्ताभवत्युपसीदन्द्रष्टाभवतिश्रोताभवतिमंताभव तिबोद्धाभवतिकर्ताभवतिविज्ञाताभवति बलेनवैपृथिवीतिष्ठति बलेनांतरिक्षंबलेनद्यौर्बलेना पोबलेनपर्वताबलेनदेवमनुष्याबलेनपशवश्चवयाꣳसिचतृणवनस्पतयःश्वापदान्याकीटपतंगपि पीलिकंबलेनवैलोकस्तिष्ठति बलमुपास्स्वेति ॥ १ ॥ सयोबलंब्रह्मेत्युपास्ते यावद्बलस्यगतंतत्रा स्ययथाकामचारोभवति योबलंब्रह्मेत्युपास्तेस्तिभगवोबलाद्भूयइतिबलाद्वावभूयोस्तीति तन्मे भगवान्ब्रवीत्विति ॥ २ ॥ ८ ॥

ष्टयात्भूयः । भूयस्त्वंव्यनक्ति ॥ अपीति । विज्ञानवतांशतमप्येकोयुक्तिजन्यनिर्णयरूपांतरबलवान्आकंपयते कंपमानं करोति । सपुमान्यदाबली युक्तिज्ञतारूपांतरबलवान् । अथतदा । संसारादुत्थाता उद्गतोभवति । यदिदेहादिबाह्यबल वान्तर्हिंकर्मकरणाद्यर्थंउत्थितोभवति । उत्तिष्ठन् उएव । परिचरिता गुर्वादिपरिचर्यकर्ताभवति । परिचरंश्चउपसत्ता ।

तृजंतोयं उपसत्तिकर्ताभवति । उपसीदंश्चतेभ्यःभगवंतंश्रोता मंता बोद्धा द्रष्टा भवतीतियथायोगंपौर्वापर्येणयोजना । कर्ता वर्णाश्रमोचितधर्माद्यनुष्ठाता । तेनचविज्ञाता विशेषज्ञाताभवति । बलमानिनोमहिमांतरमाह ॥ बलेनेति । बलशब्दितभूतवायुमानिना । तदभिमन्यमानस्वबलेनेतिवा । प्रवहेणपृथिव्यादयस्तिष्ठंतीत्यर्थः । देवामनुष्यतांप्राप्ताः देवमनुष्याः ॥ आकीटेति । कीटपतंगपिपीलिकापर्यंतंतिष्ठंतीतियथायोगंविभक्तिविपरिणामेनसर्वत्रान्वेति ॥ बलमिति । बल

अन्नंवावबलाद्भूयस्तस्माद्यद्यपिदशरात्रीर्नाश्नीयाद्यद्युहजीवेदथवाऽद्रष्टाऽश्रोताऽमंताऽबोद्धाऽकर्ताऽविज्ञाताभवत्यथान्नस्याशीद्रष्टाभवतिश्रोताभवतिमंताभवतिबोद्धाभवतिकर्ताभवतिविज्ञाताभवत्यन्नमुपास्स्वेति ॥ १ ॥

मानिनिप्रवहे ब्रह्मोपास्स्वेत्यर्थः ॥ १ ॥ बलस्य बलमानिनःप्रवहस्य ॥ २ ॥ ८ ॥ अन्नमिति । एतदपिज्ञानजन्यरतिरूपमांतरमन्नं प्रसिद्धंबाह्यमन्नंचेतिद्विविधं । द्विविधान्नमानीअनुनादित्वहेतुनाऽन्ननामाअनिरुद्धः । बलात्द्विविधबलात्प्रवहात्भूयः श्रेष्ठः । तत्रयुक्तिज्ञत्वरूपांतरबलमानिरूपादांतरान्नमान्यनिरुद्धरूपंभूयः । देहदार्ढ्यादिरूपबाह्यबलरूपाद्बाह्यान्नंभूयइतिविवेकः । एतच्चोपलक्षणं । अनिरुद्धसमाःस्वायंभुवमनु बृहस्पति दक्ष शची रतयः पंचानिरुद्धश्चेतिषडपिदेवाः बलाख्यप्रवहाद्भूयांसइतिज्ञेयं । अन्नस्यमहिमानमाह ॥ तस्मादिति । बलादन्नमानिनोभूयस्त्वात् । यद्यपिदशरात्रीर्ना ॥१०३॥

श्नीयात्यदिजीवेत् । प्राणान्बिभृयात् । उह चेत् । जीवेच्चेत् । अथतर्हिअद्रष्टेत्यादि । अन्नाशनाभावेश्रवणादिकंकिमपिनभवेदेवेत्यर्थः । व्यतिरेकमुक्त्वान्वयंचाह ॥ अथेति । अन्नस्याशी भोक्ता । द्रष्टाभवतीत्यादि ॥ अन्नमुपास्स्वेति । अन्नमान्यनिरुद्धेतत्समेषुस्वायंभुवादिपंचसुचब्रह्मोपास्स्वेत्यर्थः ॥ १ ॥ अन्नवतोन्नमान्यधिष्ठितलोकान् । यद्वाअन्नपाना

सयोन्नंब्रह्मेत्युपास्तेऽन्नवतोवैसलोकान्पानवतोभिसिध्यतियावदन्नस्यगतंतत्रास्ययथाकामचारोभवतियोन्नंब्रह्मेत्युपास्तेस्तिभगवोन्नाद्भूयइत्यन्नाद्वावभूयोस्तीतितन्मेभगवान्ब्रवीत्विति ॥ २ ॥ ९ ॥

आपोवावान्नाद्भूयस्यस्तस्माद्यदासुवृष्टिर्नभवतिव्याधीयंतेप्राणाअन्नंकनीयोभविष्यतीत्यथयदासुवृष्टिर्भवत्यानंदिनःप्राणाभवंत्यन्नंबहुभविष्यतीत्यापएवेमामूर्तायेयंपृथिवीयदंतरिक्षंयद्द्यौर्यत्पर्वतायद्देवमनुष्यायत्पशवश्चवयांसिचतृणवनस्पतयःश्वापदान्याकीटपतंगपिपीलिकमापएवेमामूर्ताअपउपास्स्वेति ॥ १ ॥

दिभोगवतोलोकानित्यर्थः । अन्नात् अनिरुद्धादिदेवताषट्कात्भूयोस्तिकिमित्यर्थः ॥ २ ॥ ९ ॥ आपोवावेति । आपोपिज्ञानरत्याजायमानविषयालंबुद्धिरूपतृप्तिलक्षणांतराआपो द्रवरूपाबाह्याआपश्चेतिद्विविधाः । तदुभयमानी देहमाप्नोतिव्याप्नोतीतिअप्शब्दितआहंकारिकप्राणः । अन्नात् अन्नशब्दोपात्तादनिरुद्धादिषट्कात्भूयस्यः श्रेष्ठः । अत्राप्यांतरान्नात्ज्ञा

नजन्यरतिरूपात्आंतराःविषयालंबुद्धिरूपतृप्तिलक्षणाआपःश्रेष्ठाः । बाह्यान्नाद्बाह्याःद्रवरूपाआपःश्रेष्ठाइतिविवेकः । अ
म्मानिनःप्राणवायोःव्यतिरेकान्वयाभ्यांमहिमानमाह । तस्मात् । अन्नादपिश्रेष्ठत्वात्अपं । यदा यदि । सुवृष्टिर्नभवति
तर्हि । प्राणाः प्राणंतिचेष्टंतइतिप्राणाः प्राणिनः । कनीयःस्वल्पमन्नंभविष्यतीतिव्याधीयंते विशिष्टाधियुक्ताभवंति । मनो

**सयोपोब्रह्मेत्युपास्तआप्नोतिसर्वान्कामाꣳस्तृप्तिमान्भवतियावदपांगतंतत्रास्ययथाकामचारो
भवतियोऽपोब्रह्मेत्युपास्तेऽस्तिभगवोऽद्भ्योभूयइत्यद्भ्योवावभूयोस्तीतितन्मेभगवान्ब्रवीत्विति॥२॥१०॥
तेजोवावाऽद्भ्योभूयस्तद्वाएतद्वायुमागृह्याकाशमभितपतितदाहुर्निशोचतिनितपतिवर्षिष्यति
वाइतितेजएवतत्पूर्वंदर्शयित्वाथाऽऽपःसृजतेतदेतदूर्ध्वाभिश्चतिरश्चीभिश्चविद्युद्भिराह्रादाश्च
रंतितस्मादाहुर्विद्योततेस्तनयतिवर्षिष्यतिवाइतितेजएवतत्पूर्वंदर्शयित्वाथापःसृजतेतेजउपा
स्स्वेति ॥ १ ॥**

व्यथावंतोभवंतीत्यर्थः । अथसुवृष्टिर्भवति । बह्वन्नंभविष्यतीतिआनंदिनः मोदमानाभवंति । आपएवमूर्ताः मूर्ताःप
दार्थाः । अबभिमान्यधीनत्वादापएवेत्युच्यंते । येयमित्यादिनाआपएवेमामूर्ताइत्यंतेनमूर्तानांवस्तूनामब्जन्यत्वादिनापए
वेत्युच्यंतइत्युच्यते । इमाआपएवमूर्ताःपदार्थाइत्यर्थः ॥ अपउपास्स्वेति । अप्शब्दितप्राणेब्रह्मोपास्स्वेत्यर्थः ॥१॥ अद्भ्यः
आहंकारिकप्राणात् ॥ २ ॥ १० ॥ तेजइति । तेजोपिप्रातिभाख्यमांतरंबाह्यंचेतिद्विविधं तदुभयमानीओजोरूपत्वेन

तेजःशब्दितःपुरंदरेंद्रस्तत्समःकामश्चाद्यःप्राणाद्भूयःश्रेष्ठः।तत्रांतरात्अप्शब्दितात्ज्ञानरतिजन्यतृप्तिरूपविषयालंबुद्धिरूपां
तरंप्रातिभाख्यंतेजोभूयः।बाह्यद्रवरूपाद्भ्योबाह्यंजडरूपंतेजोभूयइतिविवेकः। तेजःशब्दितपुरंदरस्यमहिमानमाह।तद्वाएतत्
तेजःवायुमागृह्यावष्टभ्यनिश्चलीकृत्येतियावत्। आकाशमभितपति । आकाशंव्याप्यतपतिधर्मरूपतापंजनयतितदाजनाआ
हुः। किमिति। निशोचतिनितपतिवर्षिष्यतिवैइत्याहुरित्यन्वयः। निशोचतिनितपतीत्यनयोर्बाह्यांतरतापभेदेनवा सामान्यवि
शेषभावादिभेदेनवा भेदोध्येयः।तेजएव पुरंदरएव। तत् स्वस्वरूपंवायुस्तंभादिकं। पूर्वंदर्शयित्वा प्रदर्श्यापःसृजते। तदा एतत्

सयस्तेजोब्रह्मेत्युपास्तेतेजस्वीवैसतेजस्वतोलोकान्भास्वतोपहततमस्कानभिसिध्यतियावत्तेजसो
गतंतत्रास्ययथाकामचारोभवतियस्तेजोब्रह्मेत्युपास्तेऽस्ति भगवस्तेजसोभूयइतितेजसोवावभूयो
स्तीतितन्मेभगवान्ब्रवीत्विति ॥ २ ॥ ११ ॥

एते। आह्लादाःस्तनयित्नवःआह्लादकामेघाः।ऊर्ध्वाभिस्तिरश्चीभिश्चविद्युद्भिस्सहचरंति।यद्वातदेतदितिपंचम्यर्थे। तदेतत्तस्मा
त्तेजःशब्दितपुरंदरादाह्लादाःस्तनयित्नवःविद्युद्भिःचरंतीति । तस्माद्विद्युद्भिःस्तनयित्नुचरणाद्धेतोर्विद्योततेस्तनयतिवर्षिष्यती
त्याहुः। वैप्रसिद्धं। तेजएव तत् विद्युदादिपूर्वंदर्शयित्वाथानंतरमपःसृजते॥ तेजउपास्स्वेति। तेजःशब्दितेपुरंदरेकामेच ब्रह्मो
पास्स्वेत्यर्थः ॥१॥ शिष्टंप्राग्वत् । तेजस्वतोभास्वतइत्यनयोरवांतरभेदेनापौनरुक्त्यंज्ञेयं। अतएवापहततमस्कानित्यर्थः ॥२॥

॥११॥ आकाशइति। आकाशोपिस्थिरप्रतिभारूपांतरश्छिद्रात्मकोबाह्यश्चेतिद्विविधः। तदुभयमानिनीदीप्तत्वादाकाशना
म्नीउमादेवी। तत्समभूतेसौपर्णीवारुणीचेत्येतत्त्रयं। तेजसः तेजःशब्दोक्तेंद्रकामाभ्यां। भूयान् श्रेष्ठः। तत्रांतरचंचलप्रातिभा
ख्यात्तेजसआंतरस्थिरप्रतिभाख्यःआकाशःश्रेष्ठः। बाह्यतेजसोबाह्याकाशइतिध्येयं। आकाशाख्यदेवीनांमहिमानमाह॥ आ

आकाशोवावतेजसोभूयानाका(शोवै)शेवैसूर्याचंद्रमसावुभौविद्युन्नक्षत्राण्यग्निराकाशेनाह्वय
त्याकाशेनशृणोत्याकाशेनप्रतिशृणोत्याकाशेरमतआकाशेनरमतआकाशेजायतआकाशमभि
जायतआकाशमुपास्स्वेति ॥१॥ सयआकाशंब्रह्मेत्युपास्तआकाशवतोवैसलोकान्प्रकाशवतो
संबाधानुरुगायवतोभिसिध्यतियावदाकाशस्यगतंतत्रास्ययथाकामचारोभवतियआकाशंब्रह्मे
त्युपास्तेऽस्ति भगवआकाशाद्भूयइत्याकाशाद्वावभूयोस्तीतितन्मेभगवान्ब्रवीत्विति ॥२॥१२॥

काशोवैसूर्याचंद्रमसावित्यादि। तदधीनत्वहेतुनाराजाराष्ट्रमितिवदयमभेदव्यपदेशः। किंचसर्वोपिव्यापारः आकाशाय
त्तइत्याह। आकाशेनाह्वयतीत्यादि। श्रुतवतोक्तंवचनंवक्तान्यःप्रतिशृणोति। आकाशमभिजायते पुत्रपौत्रादि ॥ आकाश
मुपास्स्वेति। आकाशशब्दितेदेवीत्रये ब्रह्मोपास्स्वेत्यर्थः॥१॥ आकाशवतःआकाशमान्यधिष्ठितलोकानवकाशयुक्तलोकानि

तिवा। आकाशात् आकाशपदोपात्तदेवीत्रयाद्भूयोऽस्तिकिमित्यर्थः । अत्रबलान्नाप्तेजआकाशानांद्विविधानांमध्येबाह्येषुचोत्तरोत्तराणांपूर्वकारणत्वमांतरेषुचोत्तरोत्तरंप्रतिपूर्वस्यव्यंजकत्वरूपकारणत्वंज्ञेयं ॥ २ ॥ १२ ॥ **स्मरइति** । अच्छिद्रस्मृतिरूपस्मरमानी सममेकप्रकारंरमतइतिस्मरनामाशिवःतत्समौसुपर्णशेषौचेतित्रयःआकाशादुमादेःभूयान् । श्रेष्ठाः । एतदुपलक्षणंउमादिदेवीत्रयादाकाशशब्दितात्भूयसोजांबवत्यादिदेवीषट्कादपिभूयान्स्मरःशिवादिरितिज्ञेयं । तस्यमहिमानमह ॥

स्मरोवाआकाशाद्भूयाꣳस्तस्माद्यद्यपिबहवआसीरन्नस्मरंतोनैवतेकंचनश्शृणुयुर्नमन्वीरन्नविजानीरन्यदावावतेस्मरेयुरथश्शृणुयुरथमन्वीरन्नथविजानीरन्स्मरेणवैपुत्रान्विजानातिस्मरेणपशूꣳस्मरमुपास्स्वेति ॥१॥ सयःस्मरंब्रह्मेत्युपास्तेयावत्स्मरस्यगतंतत्रास्ययथाकामचारोभवतियःस्मरंब्रह्मेत्युपास्तेऽस्तिभगवःस्मराद्भूयइतिस्मराद्वावभूयोस्तीतितन्मेभगवान्ब्रवीत्विति ॥२॥१३॥

तस्मादित्यादिना । तस्मादाकाशादितोभूयस्त्वादेवोक्तरूपस्मरस्य । यद्यपियदिबहवएकत्रासीरन्नपि उपविशेयुःतेप्रागनुभूतमस्मरंतःश्रवणमननविज्ञानहीनाएवभवंति । यदावातेएकत्रमिलिताःप्राक्ज्ञातंस्मरेयुरथतर्हिश्रवणादिमंतोभवेयुरित्यर्थः । स्मरेण स्मृत्याममैतेपुत्राः पशवइतिपुत्रान्पशून्जानाति ॥ **स्मरमिति** । स्मरशब्दितेशिवादिदेवत्रयेब्रह्मोपास्स्वेत्य

र्थः ॥ १ ॥ स्मरात् स्मरशब्दितदेवत्रयात् ॥ २ ॥ १३ ॥ आशेति । आसमंतात्शंसुखंयस्याइतिव्युत्पत्त्यापूर्णसुखरूपत
याऽऽशानाम्नीआशामानिनीभारती । तत्समासरस्वतीच । स्मरात् स्मरशब्दितदेवत्रयात् । भूयसी सर्वगुणैःश्रेष्ठा । इयं
चप्राणिनामीश्वरापरोक्षज्ञानस्वामिनी । तस्याः महिमानमाह ॥ आशेद्धोवाइति । आशेद्धः मंत्रानधीयेतिआशयासमृ

आशावावस्मराद्भूयस्याशेद्धोवैस्मरोमंत्रानधीतेकर्माणिकुरुतेपुत्राꣳश्चपशूꣳश्चेच्छतइमंचलोक
ममुंचेच्छतआशामुपास्स्वेति ॥ १ ॥ सयआशांब्रह्मेत्युपास्तेआशयास्यसर्वेकामाःसमृध्यंत्यमो
घाहास्याशिषोभवंतियावदाशायागतंतत्रास्ययथाकामचारोभवतियआशांब्रह्मेत्युपास्तेऽस्ति
भगवआशायाभूयइत्याशायावावभूयोस्तीतितन्मेभगवान्ब्रवीत्विति ॥ २ ॥ १४ ॥
प्राणोवाआशायाभ्रूयान्यथावाअरानाभौसमर्पिताएवमस्मिन्प्राणेसर्वꣳसमर्पितंप्राणःप्राणेन
यातिप्राणःप्राणंददातिप्राणायददातिप्राणोहपिताप्राणोमाताप्राणोभ्राताप्राणःस्वसाप्राणआ
चार्यःप्राणोब्राह्मणः ॥ १ ॥

द्धः स्मरःस्मृतिमान्भवति । अथानंतरमधीते । कर्माणिकुर्वीयेतिआशयेद्धःस्मरःस्मृतिमान् अथकर्मकुरुते । इच्छेयेतिआशे
द्धःस्मरःस्मृतिमानिच्छतेइत्यर्थोज्ञेयः आशामाशाशब्दितभारतीसरस्वत्योर्ब्रह्मोपास्स्वेत्यर्थः ॥१॥ आशया आशादेवीप्रसादे
नेतियावत् ॥ २ ॥ १४ ॥ प्राणइति । प्रकृष्टसुखरूपस्वरूपानंदलक्षणमुक्त्यभिमानी । सर्वचेष्टकत्वहेतुनाप्राणनामामु

स्तुवादी । वैप्रसिद्धमेतत् । नामवागादिपूर्वतनप्रकरणेष्विवात्रप्रश्नप्रतिवचनयोरश्रवणेप्यर्थांतरवाचिनातुशब्देनपूर्वप्रकरण विच्छेदसूचनेन अस्तिभगवःप्राणाद्भूयइतिप्राणाद्वावभूयोऽस्तीति तन्मेभगवान्ब्रवीत्विति सत्यंवावप्राणाद्भूयइति प्रश्नप्रतिव चनयोरध्याहार्यत्वादितिभावः । तदाहसूत्रे व्यतिहारोविशिंषंतिहीतरवदिति । हेभगवोनारद सोहंसत्येनातिवदामि सत्या ख्यंब्रह्मैवसर्वातिशायीतिवदामि । सत्यंत्वेवविजिज्ञासितव्यमित्युवाचकुमारइत्यर्थः । सत्यं सत्यनामकमहंविजिज्ञासे ज्ञातु मिच्छामीतिनारदः । अत्रप्रकरणेतुशब्दःसोपपत्तिकमेवसत्यंविजिज्ञासितव्यमित्यादिरूपविशेषद्योतको नपूर्वत्रेवार्थांतरद्योत

यदावैविजानात्यथसत्यंवदतिनाविजानन्तसत्यंवदतिविजानन्नेवसत्यंवदतिविज्ञानंत्वेवविजिज्ञा सितव्यमितिविज्ञानंभगवोविजिज्ञासइति ॥ १७ ॥

कइतिज्ञेयं । तदाहसूत्रे सैवहिसत्यादयइति । कुतोहेतोर्निर्दोषोनियामकश्चसन्सत्यनामाहरिः । तंहेतुभूतंगुणंज्ञातुमिच्छामीति प्रश्नाभिप्रायः ॥ खं० ॥१६॥ स्वपरगताशेषविशेषविषयकज्ञानवत्त्वादुक्तरूपसत्यमासीदितिभावेन लोकेविज्ञानसत्यवचनयो र्हेतुहेतुमद्भावमाह सनत्कुमारः । यदेतिअन्वयव्यतिरेकावुक्त्वा निगमयति ॥ **विजानन्नेवेति** । एवमग्रेऽपि । **विज्ञानंत्वेवे ति** सोपपत्तिकंविज्ञानगुणात्मकत्वंसत्यनाम्नोहरेर्विंजिज्ञासितव्यमित्यर्थः । उक्तरूपविज्ञानवत्त्वंभगवतःकेनगुणेन तंहेतुभूतं

गुणंज्ञातुमिच्छामीतिभावेनपृच्छति॥विज्ञानंभगवोविजिज्ञासइति॥खं०॥१७॥ अशेषमंतृत्वादेवसत्यनामाहरिर्विज्ञातेति भावेनमननविज्ञानयोर्हेतुहेतुमद्भावमाह॥यदावाइति। मतिस्त्वेव मननगुणवत्त्वमेव।सत्यस्यहरेःसोपपत्तिकंविजिज्ञासितव्य मित्यर्थः ॥ **मतिमिति**। मननगुणवत्त्वेहेतुंविजिज्ञासइतिनारदः ॥खं०॥१८॥ आस्तिकत्वात्मत्यात्मासत्योहरिरितिभावेनत योर्हेतुहेतुमद्भावमाह॥ यदावाइति । श्रद्दधाति आस्तिकोभवति । शिष्टस्यप्रागिवार्थोध्येयः॥ श्रद्धात्वेवेति। सहेतुकमा

यदावैमनुतेथविजानातिनामत्वाविजानातिमत्वैवविजानातिमतिस्त्वेवविजिज्ञासितव्येतिम तिंभगवोविजिज्ञासइति ॥ १८ ॥ यदावैश्रद्दधात्यथमनुतेनाश्रद्दधन्मनुतेश्रद्दधदेवमनुतेश्रद्धात्वे वविजिज्ञासितव्येतिश्रद्धांभगवोविजिज्ञासइति ॥१९॥ यदावैनिस्तिष्ठत्यथश्रद्दधातिनानिस्ति ष्ठञ्छ्रद्दधातिनिस्तिष्ठन्नेवश्रद्दधातिनिष्ठात्वेवविजिज्ञासितव्येतिनिष्ठांभगवोविजिज्ञासइति॥२०॥ यदावैकरोत्यथनिस्तिष्ठतिनाकृत्वानिस्तिष्ठतिकृत्वैवनिस्तिष्ठतिकृतिस्त्वेवविजिज्ञासितव्येति कृतिंभगवोविजिज्ञासइति ॥ २१ ॥

स्तिकत्वं। श्रद्धांश्रद्धाहेतुगुणं ॥खं०॥१९॥ सुस्थिरत्वादास्तिकइतिभावेनतयोःकार्यकारणभावमाह ॥ यदावाइति। निस्तिष्ठ तिस्थिरोभवति । निष्ठात्वेव सुस्थिरत्वमेवं । निष्ठां निष्ठाहेतुगुणं ॥ खं० ॥ २० ॥ सर्वकर्तृत्वादेवस्थिरत्वमितिभावेनतयोः कार्यकारणभावमाह ॥ यदावाइति। कृतिस्त्वेव कर्तृत्वंसहेतुकमेव ॥ **कृतिमिति** । कर्तृत्वेहेतुगुणं ॥ खं० ॥ २१ ॥

ख्यवायुर्ब्रह्माचाऽऽशायाःभारत्यादिदेवीद्वयात्श्रेष्ठः। उपासकवर्गेऽयमेवोत्तमइत्यर्थः। तदाहसूत्रे इयदामननादिति। तस्य महिमानमाह। यथावाइति। रथनाभौरथचक्रे। अराःयथासमर्पिंताःसंप्रोता एवमेतस्मिन्प्राणे। सर्वंजगत्समर्पितंसंप्रोतं। प्राणःमुख्यवायुःप्राणेनहरिणायाति। प्राणः हरिः। प्राणंवायुंप्रत्यभीष्टंददाति। यद्वाप्राणोवायुःप्राणंभगवंतंददाति शिष्येभ्यउपदिशतीत्यर्थः। प्राणाय हरये। ददाति मुक्तौहरिंप्रापयतिभक्तानितियावत्। मातापित्रादिसर्वजीवनहेतुतयासर्वत्र

सयदिपितरंवामातरंवाभ्रातरंवास्वसारंवाऽऽचार्यंवाब्राह्मणंवाकिंचिद्भृशमिवप्रत्याहधिक्त्वास्त्वित्येवैनमाहुःपितृहावैत्वमसिमातृहावैत्वमसिभ्रातृहावैत्वमसिस्वसृहावैत्वमस्याचार्यहावैत्वमसिब्राह्मणहावैत्वमसीति ॥ २ ॥ अथ यद्यप्येनानुत्क्रांतप्राणाञ्छूलेनसमासंव्यतिषंदहेन्नैवैनंब्रूयुःपितृहासीतिनमातृहासीति नभ्रातृहासीतिनस्वसृहासीति नाचार्यहासीतिनब्राह्मणहासीति ॥ ३ ॥

सन्निहितत्वमहिमानमाह। प्राणोवैपिता तज्जीवनहेतुतयातत्रस्थितत्वात्पितेत्युच्यते। एवमग्रेऽपि ॥ १ ॥ अन्वयव्यतिरेकाभ्यामुक्तमेवव्यनक्ति॥ सयदीति ॥ किंचिदिति। मुख्यवायुसन्निधियुतंपित्रादिकंप्रतिकिंचिद्भृशमिवनिष्ठुरतयाप्रत्याह। निराकरोति। तदाएनंप्रत्याचक्षाणंनिराकुर्वाणंप्रति। त्वात्वांधिक्दहेत् यद्वाधिक्अस्तुअभद्रमस्तु तवेत्याहुर्जनाः। कुतआहुरित्यतोहेतुमाह। पितृहावैत्वमसीति। इतिशब्दःसर्वत्रहेत्वर्थः ॥२॥ अथेत्यर्थांतरे। एनान् पित्रादीन्। उक्रांतप्राणान् उक्रांतः

प्राणोयेभ्यस्तइतिबहुव्रीहिः । मुख्यप्राणेनत्यक्तदेहान् समासेन संकोचेन । एकैकावयवेनदहेत् । व्यतिषंविलुंठ्यसामस्त्येनेति यावत् । शूलेनदहेत्कश्चित् । शिष्टंव्यक्तं ॥३॥ उपसंहरति॥ प्राणोह्येवैतानीति । पित्रादीनिसर्वाणितदायत्तजीवनत्वात्ता च्छब्द्यंस प्रसिद्ध एष अधिकारी । कश्चिदेवमुक्तदिशाप्राणमाहात्म्यश्रवणमननविज्ञानवान् । अतिवादी सर्वातिशायिभूत वस्तुवादीभवति । तंचेद्ब्रूयुःअतिवाद्यसीति । अतिवाद्यस्मीतिब्रूयात्नापह्नुवीत नापलपेदित्यर्थः । अत्रपूर्वपूर्वेभ्यउत्तरोत्तरे

प्राणोह्येवैतानिसर्वाणिभवतिसवाएषएवंपश्यन्नेवंमन्वानएवंविजानन्नतिवादीभवतितंचेद्ब्रूयुर तिवाद्यसीत्यतिवाद्यस्मीतिब्रूयान्नापह्नुवीत ॥ ४ ॥ १५ ॥

एषतुवाअतिवदतियःसत्येनातिवदतिसोहंभगवःसत्येनातिवदानीतिसत्यंत्वेवविजिज्ञासितव्य मितिसत्यंभगवोविजिज्ञासइति ॥ १६ ॥

षामुत्तमत्वेहेतुर्बाह्याद्व्योबाह्यमन्नंचेत्यादिभाष्यादवसेयं । आधिक्येपरिमाणंच सर्वेत्वेतेदशोत्तराः । पर्जन्यमित्रशिखिनोभूत वायुस्तथैवच । द्विगुणाएवानिरुद्धोनिलात्पंचगुणाधिकइत्यादिभाष्यात्ज्ञेयं ॥४॥१५॥ किमयमेवसर्वोत्तमइत्यतउपासकव र्गेस्यसर्वातिशायित्वं उपास्यस्तुसर्वश्रेष्ठोन्योस्तीत्याह ॥ एषत्विति । तुशब्दोर्थांतरवाची । यःसत्येन निर्दोषत्वनियाम कत्वहेतुभ्यांसत्यनामकेन । हरिणायोतिवदति सत्याख्यंब्रह्मैवसर्वातिशायीतिवदति । एषतुवाअतिवादी । अतिशयितव

पूर्णसुखोद्रेकादेवकर्तृत्वमितिभावेनतयोर्हेतुहेतुमद्भावमाह ॥ यदावाइति ॥ सुखमेवेति । सुखोद्रिक्तत्वहेतुं ॥ खं०॥२२॥ पूर्णगुणत्वादेवपूर्णसुखत्वमितिभावेनतयोर्व्याप्तिमाह ॥ योवैभूमेति । भूमपदस्यबहुत्ववाचित्वेपिभावभवित्रोरभेदेनेहपूर्ण गुणरूपधर्मिपरत्वंज्ञेयं । योभूमा पूर्णगुणः । तत्वै सएव । विधेयापेक्षयानपुंसकं । सः सुखं पूर्णसुखरूपः । अल्पेऽपूर्ण गुणे । सुखं पूर्णसुखंनास्ति । तदाहसूत्रे भूमासंप्रसादादध्युपदेशादिति । सत्यत्वादिगुणसप्तकस्यापिभूमशब्दितपूर्णगुणत्व स्यमूलहेतुत्वात्तस्यमहिमानंपृच्छति ॥ भूमानंभगवोविजिज्ञासइति । अत्र सैवहिसत्यादयइति भूमासंप्रसादादित्यधि

यदावैसुखंलभतेथकरोतिनासुखंलब्ध्वाकरोतिसुखमेवलब्ध्वाकरोतिसुखंत्वेवविजिज्ञासितव्य मितिसुखंभगवोविजिज्ञासइति ॥ २२ ॥ योवैभूमातत्सुखंनाल्पेसुखमस्तिभूमैवसुखंभूमात्वे वविजिज्ञासितव्यइतिभूमानंभगवोविजिज्ञासइति ॥ २३ ॥

करणद्वयेन सत्यादीनांसर्वेषांपरमात्मत्वं व्यतिहारइत्यधिकरणेनतुप्राणात्सत्याद्यात्मनोभूम्न उत्तमत्वंचप्रकरणभेदाश्रयेणसि द्धं । भूमेतिसूत्रेभाष्योक्तदिशाप्राणस्यसत्याद्यात्मनोभूम्नश्चब्रह्मत्वमेवेत्यंगीकारपक्षेप्राणपदेनप्राणमविहायैतदंतर्यामितयाहरे ग्रहणात्प्राणादप्युत्तमत्वसिद्धिः । प्राणानुक्तिदोषश्चनेतिज्ञेयं । अत्रयद्यपितारतम्योक्तिप्रस्तावेप्राणादनंतरंसत्यात्पूर्वंप्रश्नप्रति वचनाभ्यांश्रीतत्त्वमपिवक्तव्यं । तथापि नामादयस्तुबद्धत्वान्मोचकत्वात्परोपिच । उभयोरप्यभावेनयथाव्यक्तंनतूदितमि

ति कामादितिसूत्रभाष्योक्तदिशातदनुक्त्याशयोध्येयः ॥ खं० ॥ २३ ॥ भूम्नोमहिमानमाह ॥ **यत्रेति** । यस्मिन्वस्तुनि ज्ञाते । अन्यत्रान्यद्वस्तु । स्वातंत्र्येणनपश्यति नशृणोति नविजानाति तदधीनमेवेत्येवजानाति सभूमेत्यर्थः । एवंमहिमा भूम्नोन्यत्रनेत्याह ॥ **यत्रेति** । यस्मिन्दृष्टे श्रुते विज्ञाते चान्यदस्वातंत्र्येणपश्यतिशृणोतिविजानातिच तदल्पंलक्ष्म्यादिज गत् । महिमांतरमाह ॥ **योवैभूमेति** । श्रीतत्त्वमल्पंचेदपिहरिप्रियत्वबलात्अमृतैवेतिज्ञेयं । तदाहसूत्रे समनाचासृत्युपक्र

यत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानातिसभूमाथयत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजा नातितदल्पंयोवैभूमातदमृतमथयदल्पंतन्मर्त्यंसभगवःकस्मिन्प्रतिष्ठितइतिस्वेमहिम्नियदिवान महिम्नीति ॥ १ ॥ गोअश्वमिहमहिमेत्याचक्षतेहस्तिहिरण्यंदासभार्यंक्षेत्राण्यायतनानीतिना हमेवंब्रवीमीतिहोवाचान्योह्यन्यस्मिन्प्रतिष्ठितइति ॥ २ ॥ २४ ॥

मादमृतत्वंचानुपोष्येति । नारदःपृच्छति ॥ **सइति** । सभूमाकस्मिन्प्रतिष्ठितइति । उत्तरमाह ॥ **स्वेमहिम्नीति** । प्रति ष्ठितइत्यनुषंगः । यदिवास्वेमहिम्निनप्रतिष्ठितइत्युच्यते ॥ १ ॥ तदागोअश्वं द्वंद्वैकवद्भावःसर्वत्र । गवाश्वादिकंमहिमेत्या चक्षते । इतिवदहमेवंनब्रवीमीतितमुवाचसनत्कुमारः । अन्योऽज्ञोऽन्यस्मिन्गवाश्वादौभिन्नमहिम्निप्रतिष्ठितइतिवदहंनब्र

वीमिकिंतुस्वेमहिम्निप्रतिष्ठितइत्येवब्रवीमीतितमुवाचेत्यर्थः ॥ २ ॥ २४ ॥ भूम्नःस्वमहिमप्रतिष्ठितत्वोपपादनायसर्वव्यापि त्वरूपमहिमानमाह ॥ **सएवेति** । सएवेदंसर्वंजगद्व्याप्यस्थितइत्युपसंहारः । सएव भूमैव । सामीप्यादिदंनामा । सर्वं पूर्ण इतिवार्थः । तदाहसूत्रे धर्मोपपत्तेश्चेति ॥ १ ॥ अहंकाराख्यमात्माख्यंचरूपद्वयंक्रमेणाह ॥ **अथातइति** । अथ योग्या

सएवाधस्तात्सउपरिष्टात्सपश्चात्सपुरस्तात्सदक्षिणतःसउत्तरतःसएवेदꣳसर्वमित्यथातोहंकारा देशएवाहमेवाधस्तादहमुपरिष्टादहंपश्चादहंपुरस्तादहंदक्षिणतोहमुत्तरतोहमेवेदꣳसर्वमिति ॥१॥ अथातआत्मादेशएवात्मैवाधस्तादात्मोपरिष्टादात्मापश्चादात्मापुरस्तादात्मादक्षिणतआत्मो त्तरतआत्मैवेदꣳसर्वमिति सवाएषएवंपश्यन्नेवंमन्वानएवंविजानन्नात्मरतिरात्मक्रीडआत्ममि थुनआत्मानंदःसस्वराड्भवति तस्यसर्वेषुलोकेषुकामचारोभवत्यथयेन्यथातोविदुरन्यराजानस्ते क्षय्यलोकाभवंतितेषाꣳसर्वेषुलोकेष्वकामचारोभवति ॥ २ ॥ २५ ॥

धिकारिणः । अतःफलवत्त्वात् । यद्वाअथेतिरूपांतरे । अतस्तत्प्रसादादहमित्याक्रियतइत्यहंकारनाम्नोजीवस्थानिरुद्धाख्य स्यहरेरादेशउपदेशउच्यतइत्यर्थः । तस्यब्रह्मरूपत्वख्यापनायभूमलक्षणंतस्मिन्नाह ॥ **अहमेवेति** ॥ **अथातइति** । अथे तिरूपांतरापेक्षया । अतस्तत्प्रसादात् आत्मनोव्याप्तस्यहरेरादेशउपदेशउच्यतइत्यर्थः । अत्रभूमानारायणः । अहंकारो जीव

स्थोऽनिरुद्धः । आत्मा व्याप्तोवासुदेवइतिज्ञेयं । आत्मापरोक्षज्ञानिनोविपरीतज्ञानिनश्चफलमाह ॥ सवाएषइति । सप्र सिद्धएषएवमुख्योऽधिकारीचतुर्मुखः । एवंपश्यन् साक्षात्कुर्वन् । तस्यसाधनेमननश्रवणेकुर्वन्निति भावेनोक्तमेवंमन्वानएवं विजानन्निति । आत्मरतिः आत्मनारतिर्यस्यसआत्मरतिः । भगवद्रतिः । आत्मनाक्रीडतइत्यात्मक्रीडः । स्त्रीरूपःसन्आ त्मनामिथुनीभूतइत्यात्ममिथुनः । आत्मनानंदतइत्यात्मानंदःसब्रह्मा । स्वराट् स्वःपरमात्मा । प्रत्यक्षतोराट्नियंतायस्यस इतिस्वराड्भवति । तस्यसर्वेषुलोकेषुकामचारोभवति ॥ २ ॥ २५ ॥ आत्मज्ञानिनोमहिमानमाह ॥ तस्यहवाइति ।

तस्यहवाएतस्यैवंपश्यतएवंमन्वानस्यैवंविजानतआत्मतःप्राणआत्मतआशाआत्मतःस्मरआ
त्मतआकाशआत्मतस्तेजआत्मतआपआत्मतआविर्भावतिरोभावावात्मतोन्नमात्मतोबलमा
त्मतोविज्ञानमात्मतोध्यानमात्मतश्चित्तमात्मतःसंकल्पआत्मतोमनआत्मतोवागात्मतोनामा
त्मतोमंत्राआत्मतःकर्माण्यात्मतएवेदꣳसर्वमिति ॥ १ ॥

तस्यहवाएतस्यैवात्मसाक्षात्कारादिमतश्चतुर्मुखादेरात्मतःप्राणइत्यादौजायतेपाल्यतेलीयतेनियम्यतेचेतिसाक्षात्कारोभवती तिसर्वत्रशेषोध्येयः । आत्मापरोक्षज्ञानीमुक्तःसन्प्राणा शा स्मरा काश तेज अप् अन्न बल विज्ञान ध्यान चित्त संकल्प मनो वाक् नाम मंत्र कर्म शब्दितानांमुख्यवायुप्रभृतीनांप्रागुक्तदेवानांजननादिकं । आत्मतोभवतीतिपश्यतीत्यर्थः । नके वलमेतावत् । आत्मतःकृत्स्नजगतआविर्भावतिरोभावौभवतइत्यपि । तस्यप्रत्यक्षंभवतीत्यर्थः । इतिशब्दःसमाप्तौ ॥ १ ॥

आत्मज्ञानिनःसर्वलोकेषुकामाचारित्वसिद्ध्यर्थंमृत्युदर्शनाद्यभावंश्लोकेनाह ॥ तदेषश्लोकइति । तत्रआत्मज्ञानिमाहात्म्ये । एष वक्ष्यमाणःश्लोकोभवति । तमाह ॥ नपश्यइति । पश्यतीतिपश्योजीवः । मृत्युंनपश्यति नरोगं नो(त)थदुःखतांदुःखित्वं । पश्योजीवःसर्वपूर्णंभगवंतं । आत्मतःप्राणइत्यादिनोक्तंसर्वमितिवापश्यति । सर्वपूर्णंभगवंतंप्राप्नोति । सर्वशःकामांश्चाप्नोतीत्यर्थः । आत्मज्ञानिनोवस्थितिप्रकारमाह ॥ सएकधेति । सआत्मापरोक्षज्ञानी । एकधाभवतित्रिधाभवती

तदेषश्लोकः ॥ नपश्योमृत्युंपश्यतिनरोगंनोतदुःखताꣳसर्वꣳहपश्यःपश्यति सर्वमाप्नोतिसर्वशइति ॥ सएकधाभवतित्रिधाभवतिपंचधासप्तधानवधाचैवपुनश्चैकादशस्मृतः ॥ शतंचदशचैकश्चसहस्राणिचविꣳशतिः ॥ आहारशुद्धौसत्त्वशुद्धिःसत्त्वशुद्धौध्रुवास्मृतिः ॥ स्मृतिलंभेसर्वग्रंथीनांविप्रमोक्षस्तस्मैमृदितकषायायतमसःपारंदर्शयतिदेवर्षयेनारदायभगवान्सनत्कुम(रोयस्तं)रस्तꣳस्कंदइत्याचक्षतेतꣳस्कंदइत्याचक्षते ॥ २ ॥ २६ ॥ ॥ ॐमितिश्रीमच्छांदोग्योपनिषदिसप्तमोध्यायः ॥ ७ ॥

त्येवंरूपेणस्मृतः सज्ञानी शतंचदशचएकश्चसहस्राणिचपंचविंशतिश्चभवतीत्यर्थः । भगवज्ज्ञानसामर्थ्याद्देशैर्नानारूपाणिधत्तइत्यर्थः । अविद्याविषकषायनिरसनहेतुभूतभगवदापरोक्ष्यस्यस्थैर्येणावस्थितिकारणमाह ॥ आहारेति । गुरोस्सकाशात्श्रवणरूपाहारशुद्धौसत्त्वशुद्धिः सत्त्वशब्दितज्ञानशुद्धिः । सत्त्वशुद्धौचध्रुवास्मृतिः । स्थिरस्मृतिः । स्थिरस्मृतिलाभेचसर्वा

विद्याकामकर्मादिग्रंथीनांविप्रमोक्षः । तस्मैमृदितकषायायापगतसमस्ताविद्याकामकर्मादिरूपकषायाय नारदायदेवर्षये । तमसःपारंअविद्यायास्तीरंपरमात्मस्वरूपंदर्शयति । अदर्शयत्सनत्कुमारः । भगवानित्युक्त्याविष्णुरितिभ्रांतिंनिराह ॥ यस्तमिति । योदर्शयतितंस्कंदइत्याचक्षते । द्विरुक्तिःसमाप्त्यर्था ॥२॥२६॥ ॥ इतिश्रीमच्छांदोग्योपनिषदर्थसंग्रहेराघवेंद्रयतिकृतेसप्तमोऽध्यायः ॥ ७ ॥ ॥ पूर्वत्रसर्वगतत्वादिसर्वगुणैर्भूमादिरूपोविष्णुरुपास्यइत्युक्तंसचनसर्वमुमुक्षुभिरुपासितुंशक्यइतिसर्वमुमुक्षुसाधारणमुपास्यरूपंनिरूपयत्यत्राध्याये ॥ अथयदिदमिति । विद्यांतरारंभेऽथशब्दः । अत्रब्रह्मपुरशब्दःक

॥ हरिः ॐ ॥ अथयदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्मदहरोस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यंतद्वावविजिज्ञासितव्यमिति ॥ १ ॥

र्मधारयःषष्ठीतत्पुरुषश्चतंत्रेणोपात्तोज्ञेयः । पुरशब्दःपॄपालनपूरणयोरित्यतोऋदोरबित्यप्प्रत्ययेऋकारस्यचोकारेपुरमितिरूपं । बृहत्त्वात्पूर्णगुणत्वात्ब्रह्म । पूर्णकामत्वात्पुरं । ब्रह्मचतत्पुरंचब्रह्मपुरं । ब्रह्माख्यंपूर्णवस्तु । तस्मिन्ब्रह्मपुरेहरौतदाधारत्वेनवर्तमाने ब्रह्मणःपुरमितिव्युत्पत्त्याब्रह्मपुरशब्दितेऽस्मिन्देहे । यदिदं । दहरं दभ्रमल्पं । पुंडरीकं कमलरूपंवेश्म । गृहमस्ति अस्मिन्दहरपुंडरीकरूपवेश्मनि । अंतराकाशो भूताकाशो वर्तते । तस्मिन्पुंडरीकांतस्थदहराकाशेंतर्यद्वर्तते । तद्वस्तु । अन्वेष्टव्यं । तद्व्यनक्ति ॥ तद्वावेति । तद्वाव तदेव । विजिज्ञासितव्यं । श्रवणमननध्यानैर्विषयीकर्तव्यं । इद

मेवान्वेषणंनाममनान्यदित्यर्थः । इतिगुरुर्ब्रूयादित्यर्थः ॥ १ ॥ तमेवंवक्तारंगुरुं । शिष्याःयदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकं वेश्मदहरोस्मिन्नंतराकाशःतत्राकाशेकिंविद्यते किन्नामकंकिंमहिमकं । यदन्वेष्टव्यमित्याद्युक्तंत्वयेतिचेत्ब्रूयुः ॥ २ ॥ सए वंतैरुक्तोगुरुर्ब्रूयात् ॥ यावानित्यादि । अंतर्हृदये हृद्ययतइतिहृदयशब्दोक्तेपुंडरीकवेश्मस्थदहराकाशेंतः। आकाशः आसमं तात्काशतेदीप्यतइतिवा । आसमंतात्कंसुखमश्नात्यनुभवतीतिवा । आसमंतात्कान्कामान्शुभभोग्यान् अश्नातीतिवा । आकाशनामाहरिर्वर्ततइति । किन्नामकमित्यस्योत्तरंब्रूयात् । अयंबाह्यःबहिर्विद्यमानःआकाशनामाहरिर्यावान् देशकाल

तंचेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्म दहरोस्मिन्नंतराकाशः किंतदत्रविद्यतेयदन्वेष्टव्यं यद्वावविजिज्ञासितव्यमिति ॥ २ ॥ सब्रूयाद्यावान्वाअयमाकाशस्तावानेषोंतर्हृदय आकाशउभेअस्मिन्द्यावापृथिवीअंतरेवसमाहितेउभावग्निश्चवायुश्चसूर्याचंद्रमसावुभौविद्युन्नक्षत्राणिय च्चास्येहास्तियच्चनास्तिसर्वंतदस्मिन्त्समाहितमिति ॥ ३ ॥

गुणैर्यावद्व्याप्तिमान् तावानेषहृत्पुंडरीकस्थाकाशगतोहरिरिति । किंमहिमकइत्यस्योत्तरंब्रूयादित्यर्थः । तस्यसर्वाधारत्वादि महिमांतरंचाह ॥ उभेअस्मिन्निति । हृत्पद्मस्थभूताकाशगतेआकाशाख्येहरावित्यर्थः । न्यायविवरणादौतुअंतर्हृदयइ त्यतःपूर्वंतस्येतिशेषः । योभगवानन्वेष्टव्यतयोक्तः । किंभूतःसइतिपृष्टश्च । तस्यहरेर्हृदयेयावान्वाअयमाकाशस्तावान्सर्वो प्याकाशोविद्यते । अस्मिन्नुभेइत्यादीत्युक्तं । अत्रद्यावापृथिव्यादिशब्देनतदभिमानिग्रहःउभेइत्युक्तिर्मुक्तामुक्तरूपवर्गद्वय

ग्रहणाय । तदेवविशदमाह ॥ यच्चास्येति । अस्यसंसारिणःउपकारित्वेनेहयदुक्तं द्यावाभूम्यादिकं । यच्चास्यसंसारिणो ऽनुपकारित्वेननास्त्यविद्यमानमिवोच्यते मुक्तद्यावापृथिव्यादिकमितियावत् । तदपि अत्रपुंडरीकस्थाकाशगतेहरौसमाहि तंवर्ततइतिसब्रूयादितिपूर्वेणान्वयः ॥ ३ ॥ उक्तंसर्वाधारत्वमाहात्म्यमाक्षिप्यसमाधत्ते ॥ तंचेदिति । एवमुक्तवंतमाचा र्यंशिष्याश्चेत्ब्रूयुः किमिति । ब्रह्मपुरेकर्मधारयाश्रयेणतंत्रेणप्रागुक्तेब्रह्मपुराख्ये । षष्ठीतत्पुरुषाश्रयणेनब्रह्मपुरपदोक्तदेहग

तंचेद्ब्रूयुरस्मिꣳश्चेदिदंब्रह्मपुरे सर्वꣳसमाहितंसर्वाणिचभूतानि सर्वेचकामायदै(त)नज्जराऽवाप्नो तिप्रध्वꣳसतेवाकिंततोतिशिष्यतइति ॥४॥ सब्रूयान्नास्यजरयैतज्जीर्यतिनवधेनास्यहन्यतएत त्सत्यंब्रह्मपुरमस्मिन्कामाःसमाहिताएषआत्मापहतपाप्माविजरोविमृत्युर्विशोकोऽविजिघत्सो पिपासःसत्यकामःसत्यसंकल्पोयथाह्येवेहप्रजाअन्वाविशंतियथानुशासनंयंयमंतमभिकामाभवं तियंजनपदंयंक्षेत्रभागंतंतमेवोपजीवंति॥ ५ ॥

तहृत्पुंडरीकस्थाकाशगतेअस्मिन्हरौ । यदिदंद्यावाभूम्यादिकंसर्वंसमाहितं । सर्वाणिभूतानिसमाहितानि । सर्वेचकामाः समाहिताः चेत्तर्हियदाएतत्ब्रह्मणःपुरेत्युक्तब्रह्मपुरशब्दितंशरीरंकर्म । जरावाप्नोति । एततशरीरंकर्तृ प्रध्वंसतेवा । ना शमाप्नोतिवा ततोदेहनाशानंतरंकिमतिशिष्यतइतिचेद्ब्रूयुरितिपूर्वेणान्वयः ॥ ४ ॥ सएवमुक्तोगुरुर्ब्रूयात् । किमिति ।

अस्यब्रह्मपुरशब्दितदेहस्यजरया एतत्ब्रह्मपुरशब्दितंब्रह्म । द्वयोरपिप्राक्तंत्रेणब्रह्मपुरपदेनसमासभेदेनप्रकृतत्वात् । न जीर्यति अस्यवधेनैतत्नहन्यते । एतत्ब्रह्मपुरंकर्मधारयाश्रयेणोक्तंब्रह्मपुराख्यंब्रह्म सत्यं नित्यं । अतःसर्वाधारत्वं तस्ययुक्तमितिभावेनोपलक्षणतयाह ॥ **अस्मिन्कामाःसमाहिताइति** । नास्यजरयैतज्जीर्यतीत्युक्तं । प्रपंचेनाह ॥ **एषआत्मेत्यादिना** । विजिघत्सः विगतबुभुक्षः । तदाहसूत्रे । दहरउत्तरेभ्यइति । तस्यमुक्ताश्रयत्वादिम हिमांतरंचाह ॥ **यथाहीति** । यथा यथायोग्यमेव । यथानुशासनं भगवदाज्ञानुसारेण । प्रजाः इह मुक्ताभगव

तद्यथेहकर्म(चि)जितोलोकःक्षीयतएवमेवामुत्रपुण्य(चि)जितोलोकःक्षीयतेतद्यइहात्मानमनु विद्यव्रजंत्येतांश्चसत्यान्कामांस्तेषांसर्वेषुलोकेष्वकामचारोभवत्यथयइहात्मानमनुविद्य व्रजं त्येतांश्चसत्यान्कामांस्तेषांसर्वेषुलोकेषुकामचारोभवति ॥ ६ ॥ १ ॥

तिवा । अन्वाविशंति प्रविशंति । नकेवलंप्रवेशमात्रं । यंयमंतंदेशमभिकामाः प्राप्तीच्छवोभवंतिमुक्ताः । यंयमंतमित्यु क्तंव्यनक्ति । यंजनपदंयंक्षेत्रभागं क्षेत्रप्रदेशंतंतमेवोपजीवंत्येतत्प्रसादादेवेत्यर्थः । उपलक्षणमिदं समस्तकामितभोगा नेतत्प्रसादादुपजीवंतीत्यर्थः ॥ ५ ॥ दहराकाशस्थस्याक्षय्यफलहेतुज्ञानविषयत्वमाहात्म्यंचव्यतिरेकान्वयाभ्यामाह ॥ **तद्यथेति** । तन्निदर्शनंयथा । इहलोकेकर्मचितःकर्मसंपादितोलोकोगृहारामादिःक्षीयते । एवमेवामुत्रपुण्यचि

तः यज्ञादिपुण्यसंपादितः स्वर्गादिलोकोमुत्रपरत्रक्षीयते । केषामित्यतआह । तत्तत्रजनेषु । ये इह लोके । आत्मानंभ गवंतमननुविद्य अज्ञात्वा । एतांश्चसत्यान्कामान्सत्यकामत्वादिप्रागुक्तात्मगुणांश्चाननुविद्ययेत्रजंति तेषामितिपूर्वेत्रोत्तर

सयदिपितृलोककामोभवतिसंकल्पादेवास्यपितरःसमुत्तिष्ठंतितेनपितृलोकेनसंपन्नोमहीयते॥१॥ अथयदिमातृलोककामोभवतिसंकल्पादेवास्यमातरःसमुत्तिष्ठंतितेनमातृलोकेनसंपन्नोमहीयते ॥ २ ॥ अथयदिभ्रातृलोककामोभवतिसंकल्पादेवास्यभ्रातरःसमुत्तिष्ठंतितेनभ्रातृलोकेनसंपन्नो महीयते॥३॥अथयदिस्वसृलोककामोभवतिसंकल्पादेवास्यस्वसारःसमुत्तिष्ठंतितेनस्वसृलोकेनसं पन्नो महीयते॥४॥ अथयदिसखिलोककामोभवतिसंकल्पादेवास्यसखायःसमुत्तिष्ठंतितेनसखि लोकेनसंपन्नोमहीयते ॥ ५ ॥ अथयदिगंधमाल्यलोककामोभवतिसंकल्पादेवास्यगंधमाल्येसमु त्तिष्ठतस्तेनगंधमाल्यलोकेनसंपन्नोमहीयते ॥ ६ ॥ अथयद्यन्नपानलोककामोभवतिसंकल्पादेवा स्यान्नपानेसमुत्तिष्ठतस्तेनान्नपानलोकेनसंपन्नोमहीयते ॥ ७ ॥ अथयदिगीतवादित्रलोककामो भवतिसंकल्पादेवास्यगीतवादित्रेसमुत्तिष्ठतस्तेनगीतवादित्रलोकेनसंपन्नोमहीयते ॥ ८ ॥ अथयदिस्त्रीलोककामोभवतिसंकल्पादेवास्यस्त्रियःसमुत्तिष्ठंतितेनस्त्रीलोकेनसंपन्नोमहीयते॥९॥ ॥११३॥

त्रचान्वेति । अथेत्यर्थांतरे ॥ ६ ॥ १ ॥ यंयमंतमित्युक्तंसत्यकामत्वंविशदमाह ॥ सयदीत्यादिना । स ब्रह्मज्ञानी । पि

तृलोककामोभवति पितृदर्शनेच्छावान्भवति । अस्य ज्ञानिनएवमिच्छावतः । संकल्पादेवेच्छामात्रादेव । पितरःसमुत्ति ष्ठंति पुरतःउपस्थिताभवंति । तेनपितृलोकेन पितृदर्शनेन । संपन्नो युक्तो महीयते । एवमग्रेप्यर्थोध्येयः । तथाचसूत्रं । संकल्पादेवचतच्छ्रुतेरिति ॥ ९ ॥ यंयमंतं देशं । अभिकामोभवतिसदेशःसंकल्पादेवसमुत्तिष्ठति ॥ १० ॥ २ ॥ मुक्तस्यो क्तंसत्यकामत्वंप्राग्विद्यमानमेवमुक्तावभिव्यज्यतइतिवाच्यंतत्रकिमावरणमित्यपेक्षायामाह ॥ तइमइति । तइमे मुक्तौव्य

यंयमंतमभिकामोभवतियंकामंकामयतेसोस्यसंकल्पादेवसमुत्तिष्ठतितेनसंपन्नोमहीयते ॥१०॥२॥
तइमेसत्याःकामाअनृताऽपिधानास्तेषाꣳसत्यानाꣳसतामनृतमपिधानंयोयोह्यस्येतःप्रैतिनतमिह
दर्शनायलभते ॥ १ ॥ अथयेचास्येहजीवायेचप्रेतायच्चान्यदिच्छन्नलभतेसर्वंतदत्रगत्वाविंदतेत्र
ह्यस्यैतेसत्याःकामा(अनृतापिधाना)स्तद्यथाऽपिहिरण्यनिधिंनिहितमक्षेत्रज्ञाउपर्युपरिसंचरंतो
नविंदेयुरेवमेवेमाःसर्वाःप्रजाअहरहर्गच्छंत्यएतंब्रह्मलोकंनविंदंत्यनृतेनहिप्रत्यूढाः ॥ २ ॥

क्ताःसत्याःकामाः । मुक्तेःपूर्वंअनृतापिधानाः । तद्व्यनक्ति । तेषांसत्यकामानांसतां प्राग्विद्यमानानामनृतमनाद्यज्ञानमपि धानमाच्छादनमिति । कुतएतदित्यतआह ॥ योयोहीति । हि यस्मात् । अस्यानृतापिहितसत्यकामस्यामुक्तस्यपुंसः । योयःपिताभ्रात्रादिर्वाइतोलोकात्प्रैति तंप्रेतंपित्रादिकं । दर्शनायद्रष्टुं । इहलोकेनलभते नशक्तोभवति । तस्मादनृतापि धानाइति । अज्ञानाच्छादितसत्यकामत्वादेवप्रेतपित्रादिदर्शनंनलभतेसंसारिजीवइत्यर्थः ॥ १ ॥ अनृतनिवृत्तौतुसर्वाभी

ष्टप्राप्तिरित्याह ॥ अथेति । अर्थांतरे । अनृतनिवृत्त्यनंतरमितिवा । अस्य मुक्तस्य । इह लोके । येचजीवाः जीवंतः पित्राद्याः । येचप्रेताःमृताःतद्दर्शनादिकंनलभते । यद्यदन्यच्चेच्छन्इहसंसारदशायांनलभते तत्सर्वमत्रवैकुंठादिविष्णुलोके गत्वा । विंदते लभते । अज्ञानावृतत्वमेवव्यक्तमाह ॥ अत्रह्यीति । अत्रसंसारेसत्याःकामाःअनृतापिधानाः ब्रह्मणःहृत्पद्माकाशेऽनुपलंभान्नास्तिब्रह्मेतिशंकांसदृष्टांतंनिराह ॥ तद्यथेति । तन्निदर्शनंयथा । हिरण्यनिधिंअपिनिहितं । अक्षेत्रज्ञाः हिरण्यनिक्षेपस्थलमजानंतः उपर्युपरिसंचरंतोपिनविंदेयुर्नपश्यंति । एवमेवेमाःसंसारिण्यःसर्वाःप्रजाःअहरहःप्रत्यहंएतं

सवाएषआत्माहृदितस्यैतदेवनिरुक्तꣳहृद्ययमितितस्माद्धृदयमहरहर्वाएवंवित्स्वर्गंलोकमेति॥३॥

ब्रह्मलोकं कर्मधारयः । सर्वाश्रयंब्रह्म । सुप्तौगच्छंत्योपिनविंदंतिनजानंति । तत्रहेतुमाह ॥ अनृतेनहिप्रत्यूढाः । अज्ञानेनाच्छादिताहि ॥ २ ॥ यतोऽतः सवाएषआत्माहृदिविद्यमानोनोपलभ्यतइत्यर्थः । तदाहसूत्रे गतिशब्दाभ्यामिति । पूर्वत्रकिमत्रविद्यतइत्यत्रकिन्नामकमितिकृतप्रश्नस्याकाशइत्येकंनामोक्तं । निरुक्तिपूर्वंनामांतरंचाह ॥ तस्येति । तस्यहृत्पुंडरीकाकाशांतर्वर्तिनः । हृदयनाम्नः हृदिअयतेगच्छतिवर्ततइत्येतदेवनिरुक्तं निर्वचनमवयवार्थकथनमितियावत् । तस्मादेवं निर्वचनवत्त्वात् । हृदयमितिनामकमित्यर्थः । निरुक्तिपूर्वंहृदयनामकहरिज्ञानिनःफलमाह ॥ अहरिति । अहरहर्वैएवंवि

त्स्वर्गलोकंविष्णुलोकमेति ॥ ३ ॥ ज्ञानसामर्थ्यादेवमुक्तोभवतिकिमित्यतोभगवत्प्रसादादित्याह ॥ अथेति । यएषसंप्र सादःसम्यक्प्रसादोयस्यासौसंप्रसादः भगवत्प्रसादवान् ज्ञानी । अस्माच्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यप्राप्य । स्वेन रूपेणज्ञानानंदादिशुद्धरूपेणाभिनिष्पद्यते । परंज्योतिरित्युक्तःकइत्यतआह ॥ एषआत्मेति । एषपरंज्योतिःशब्दोक्तः आत्मापरमात्मा । नसन्निहितोजीवइत्युवाचह रमादेवीमंत्रद्रष्ट्रीत्यर्थः । तदाहसूत्रे अन्यार्थश्चपरामर्शइति । आत्मानं

अथयएषसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतएषआत्मे तिहोवाचैतदमृतमभयमेतद्ब्रह्मेतितस्यहवाएतस्यब्रह्मणोनामसत्यमिति ॥ ४ ॥ तानिहवाएता नित्रीणयक्षराणिसत्तियमितितद्यत्सत्तदमृतमथयत्तितन्मर्त्यमथयद्यंतेनोभेयच्छतियदनेनोभेय च्छतितस्माद्यमहरहर्वाएवंवित्स्वर्गंलोकमेति ॥ ५ ॥ ३ ॥

विशिनष्टि । एतदमृतमभयमेतत्ब्रह्मेतीतिचोवाचेत्यर्थः । तस्यानामांतरंचाह ॥ तस्यहवाइति । तस्यहवाएतस्यब्रह्मणः सत्यमितिनामभवति ॥ ४ ॥ तन्नामनिर्वक्ति ॥ तानीति । कथमित्यतआह । सत् ति यमिति । त्रीण्यक्षराणी त्यन्वयः । अक्षराणामर्थमाह ॥ तद्यदिति । तत्तत्राक्षरत्रयमध्येयत्सदित्यक्षरंतदमृतंमुक्तजातवाचकं । अथयत्ती त्यक्षरंतन्मर्त्यसंसारिजीववाचि । अथयत्यमित्यक्षरंतेनाक्षरेणउभेमुक्तामुक्तजातेसत्तीतिशब्दाभ्यामुक्तेयच्छति निय

च्छतिनियमयतीह्येषोर्थउच्यतइत्यर्थः । तस्मान्नियंतृत्वात्यमिति । ज्ञानिनःफलमाह ॥ अहरहरिति । एवंमुक्त नियंतृत्वेनसत्यशब्दार्थंजानन्भगवल्लोकमेतीति ॥ ५ ॥ ३ ॥ हृत्पद्मस्थस्यहरेर्जिज्ञास्यत्वेमहिमांतरमाह ॥ अथेति । य आत्मा प्रागुक्तः । सविधृतिर्धारणक्षमः । सेतुः षिञ्बंधनेसितमस्मिन्जगदितिसेतुराश्रयः । एषां प्रमाणप्रमितानां । लोकानामसंभेदायासांकर्यायसेतुरित्यन्वयः । एतंसेतुं हरिं । अहोरात्रे नतरतः नातिक्रामतः । अहोरात्रेसएवाती

अथयआत्मासप्तसेतुर्विधृतिरेषांलोकानामसंभेदायनैतꣳसेतुमहोरात्रेतरतोनजरानमृत्युर्नशोको नसुकृतंनदुष्कृतं ॥ १ ॥ सर्वेपाप्मानोतोनिवर्तंतेपहतपाप्माह्येषब्रह्मलोकस्तस्माद्वाएतꣳसेतुंती र्त्वांधःसन्ननंधोभवतिविद्धःसन्नविद्धोभवत्युपतापीसन्ननुपतापीभवतितस्माद्वाएतंसेतुंतीर्त्वाऽ पिनक्तमहरेवाभिनिष्पद्यतेऽसकृद्विभातोह्येवैषब्रह्मलोकः ॥ २ ॥

त्यवर्तंतइत्यर्थः । अहोरात्राभ्यामतार्यत्वंव्यनक्ति ॥ नजरेत्यादिना । एनमाप्नोतीतियोज्यं ॥ १ ॥ अतः आत्मतः । सर्वेपाप्मानोनिवर्तंते सर्वपापरहितइतियावत् । कुतःअपहतपाप्माह्येषब्रह्मलोकःब्रह्माख्योलोकोहरिरित्यर्थः । तदाहसू त्रे । धृतेश्चमहिम्नोस्यास्मिन्नुपलब्धेरिति । तस्यसर्वपापास्पृष्टत्वमुपपादयति ॥ तस्मादिति । अपहतपाप्मनःप्रसा दादेवखलुएतंसेतुंप्राप्तुमन्यत्संसारंतीर्त्वाप्रागंधःसन्ननंधोभवतीत्यादि । विद्धःदुरुक्त्यादिवेधवान् । उपतापी रोगवान् ।

तस्माद्वा सर्वपापहीनभगवत्प्रसादादेवैतं सेतुंगंतुमन्यत्तीर्त्वा वर्तमानस्य । नक्तं रात्रिरप्यहरेवनिष्पद्यते । तत्रकारण माह ॥ **असकृद्विभातोह्येवैषब्रह्मलोको** हरिरिति ॥ २ ॥ एतस्यज्ञानफलत्वात्तत्राभ्यर्हितसाधनापेक्षायामाह **तद्यइति** । तत्तत्रजनेषुमध्येयएवैतंब्रह्मलोकं भगवंतं । ब्रह्मचर्येणमनोवाक्कर्मभिःब्रह्मणिवेदेचरणेनवर्तनेनानुविंदंति जानंतिप्राप्नुवंतिवा तेषामेवैषब्रह्मलोकःभगवल्लोकःसर्वेषुलोकेषुकामचारोभवतीति ॥ ३ ॥ ४ ॥ ज्ञानस्यश्रवणादि रूपब्रह्मचर्यसाधनंचेत्विविदिषंतीत्यादिनायज्ञादेर्ज्ञानसाधनत्वोक्तिःकथमित्यतस्तत्सर्वंब्रह्मचर्यमेवेत्याह ॥ **अथयद्यज्ञ**

तद्यएवैतंब्रह्मलोकंब्रह्मचर्येणानुविंदंतितेषामेवैषब्रह्मलोकस्तेषाꣳसर्वेषुलोकेषुकामचारोभवति॥३॥४॥
अथयद्यज्ञइत्याचक्षतेब्रह्मचर्यमेवतद्ब्रह्मचर्येणह्येवयोज्ञातातं(अनु)विंदतेथयदिष्टमित्याचक्षतेब्रह्म
चर्यमेवतद्ब्रह्मचर्येणह्येवेष्ट्वात्मानमनुविंदते ॥ १ ॥ अथयत्सत्रायणमित्याचक्षतेब्रह्मचर्यमेवत
द्ब्रह्मचर्येणह्येवसतआत्मनस्त्राणंविंदतेथयन्मौनमित्याचक्षतेब्रह्मचर्यमेवतद्ब्रह्मचर्येणह्येवात्मानम
नुविद्यमनुते ॥ २ ॥

इति । अथ ज्ञातव्यांतरमुच्यतइत्यथपदस्यार्थः । यज्ञइतियदाचक्षतेप्राज्ञाःतत्ब्रह्मचर्यमेव ब्रह्मज्ञानसाधनीभूतंमनोवा क्कर्मभिर्ब्रह्मणिचरणमेव । कथं यातिजानातिज्ञंभगवंतमितियज्ञइतिव्युत्पत्तेरितिभावेनयज्ञपदंव्युत्पाद्यदर्शयति ॥ **ब्रह्म चर्येणेति** । यज्ञपदगतं यइत्येतदनूद्यार्थमाह ॥ **योज्ञातेति** । ज्ञमित्यस्यार्थस्तमिति । अनुविंदतेजानातीति ।

एतेन यातिजानातिज्ञंयेनब्रह्मचर्येणेतिव्युत्पत्तिःसूचिता । यदिष्टमिष्टिरित्याचक्षतेब्रह्मचर्यमेवतत् । कथमित्यतोव्युत्पा द्यदर्शयति ॥ ब्रह्मचर्येणह्यीति । अनेनात्मज्ञानमुद्दिश्ययजतेऽनेनब्रह्मचर्येणहरिमितिव्युत्पत्त्याब्रह्मचर्यमेवेष्टमिति व्युत्पत्तिःसूचिता । एवमग्रेपियोजनाध्येया । ब्रह्मचर्येणह्येवेत्यादिनासतोहरितःत्राणंअयतेलभतेयेनब्रह्मचर्येणतत्सत्रा यणमितिव्युत्पत्तिःसूचिता । ब्रह्मचर्येणह्यात्मानमनुविद्यज्ञात्वामनुतेमननंकरोतीत्यनेनमनुतेअवगच्छत्यनेनब्रह्मचर्येणेति मौनंब्रह्मचर्यमित्युक्तंभवति ॥ २ ॥ एषह्यात्मेति । यमात्मानंहरिंब्रह्मचर्येणानुविंदतेजानातिएषआत्मातस्यज्ञानि

अथयदनाशकायनमित्याचक्षतेब्रह्मचर्यमेवतदेषह्यात्माननश्यतियंब्रह्मचर्येणानुविंदतेथयदरण्या यनमित्याचक्षतेब्रह्मचर्यमेवतदरश्चहवैण्यश्चार्णवौब्रह्मलोकेतृतीयस्यामितोदिवितदैरंमदीयꣳसर स्तदश्वत्थःसोमसवनस्तदपराजितापूर्ब्रह्मणःप्रभुविमितꣳहिरण्मयं ॥ ३ ॥

नोननश्यति । इष्टप्रदोभवतीतियावत् । तस्याहंनप्रणश्यामीतिगीतोक्तेः । एतेनानाशकमयतेलभतेयेनतद्ब्रह्मचर्यम नाशकायनमित्युक्तंभवति । अरण्यौ अरण्यनामकौसमुद्रावयते प्राप्नोतियेनब्रह्मचर्येणतदरण्यायनमितिव्युत्पत्तिःप्रा गिवोह्येतिभावेनतामप्रदश्यारण्यौ कौ कुत्रत्यौ यत्प्राप्तिसाधनंब्रह्मचर्यमित्यतआह ॥ अरश्चेति । अरश्चवैण्यश्चेति संज्ञकौद्वौचिदानंदरसात्मकौअमृतमयौसमुद्रौब्रह्मलोके श्वेतद्वीपे । इतः भूलोकात् । तृतीयस्यांतृतीयायां दिवि द्यु

शब्दितेब्रह्मलोके । वर्ततेइत्यर्थः । समुद्रप्रसंगादन्यदप्याह ॥ तदिति । तत् तत्र ब्रह्मलोके । ऐरं सुरामयं मदीयं मदकारि सरश्चविद्यते । तत् तत्र । सोमसवनोऽमृतस्राव्यश्वत्थस्तिष्ठति । तत् तत्र ब्रह्मणःअपराजितानाम्नीपूः नगरी वर्तते । प्रभुविमितंप्रभुपरिमाणसमपरिमाणं । हिरण्मयंपर्यंकंचास्ति ॥ ३ ॥ तत् तत्रलोके । ये अरंचवैण्यंचार्णवौब्रह्मलोकेवर्तमानौब्रह्मचर्येणानुविंदंति तेषामेवैषब्रह्मलोकः । तेषांसर्वेषुलोकेषुकामचारोभवतीति । तदाह गतिशब्दाभ्यामिति

तद्यएवैतावरंचवैण्यंचार्णवौब्रह्मलोकेब्रह्मचर्येणानुविंदंतितेषामेवैषब्रह्मलोकस्तेषाꣳसर्वेषुलोकेषुकामचारोभवति ॥ ४ ॥ ५ ॥

अथयाएताहृदयस्यनाड्यस्ताःपिंगलस्याणिम्नस्तिष्ठंतिशुक्लस्यनीलस्यपीतस्यलोहितस्येत्यसौवाआदित्यःपिंगलएषशुक्लएषनीलएषपीतएषलोहितः ॥ १ ॥

सूत्रांशेनतथाहिदृष्टंलिंगंचेति॥४॥५॥ हृदयस्योपास्तिप्रकारंविविच्याह॥ अथयाइत्यादिना। अथेतिविद्यांतरे। हृदयस्य हृदयनाम्नोहृद्गतस्यहरेः। पंचरूपस्याधिष्ठानभूताःयाएतानाड्यःहृत्पुंडरीकस्यपरितःस्थिताःसुषुम्ना नांदिनी पिंगला वज्रिका इडा इतिनाम्न्यः ताःपंचनाड्यःपिंगलस्यपिंगलवर्णस्याणिम्नःसूक्ष्मतमस्यसंकर्षणस्य । शुक्लस्यश्वेतवर्णस्याणुतमस्यवासुदेवस्य । नीलस्य नीलवर्णस्याणिम्नोनिरुद्धस्य । पीतस्य पीतवर्णस्यप्रद्युम्नस्याणिम्नः । रोहितस्यरक्तवर्णस्याणिम्नोनारायणस्याधिष्ठानभूतास्तिष्ठंतीतिजिज्ञासितव्यमित्यर्थः । तत्रायंविवेकः । रोहितवर्णोनारायणोहृन्मध्यगतसुषुम्नायांतिष्ठति । शुक्लोवासु

देवः अग्रतःस्थितनांदिन्यां । पिंगलःसंकर्षणस्तुपश्चिमभागस्थपिंगलाख्यायां । पीतःप्रद्युम्नस्तुवामभागस्थवज्रिकाख्यायां । नीलोनिरुद्धस्तुदक्षभागस्थेडायांतिष्ठतीति । तंत्रसारेतुचतुर्थे । मध्येसुषुम्नाविज्ञेयावज्रिकाख्याप्रकाशिनी । वैद्युताब्रह्मनाडीतिसैवपंचप्रभेदिनी ॥ पृष्ठवामाग्रदक्षांतर्भेदाऽऽस्तेचक्रमेणतु । हरिन्नीलःसितःपिंगोलोहितश्चात्रकेशवः ॥ प्रद्युम्नादिस्वरूपेणध्येयइत्युक्तं । आदित्येपिपिंगलादिपंचरूपीतिष्ठतीत्याह ॥ असाविति । आदित्वादादित्यनामादित्यमभिव्याप्यस्थितो

तद्यथामहापथआततउभौग्रामौगच्छतीमंचामुंचैवमेवैताआदित्यस्यरश्मयउभौलोकौगच्छंती मंचामुंचामुष्मादादित्यात्प्रता(ती)यंतेतआसुनाडीषुसृप्ताआभ्योनाडीभ्यःप्रता(ती)यंतेमुष्मिन्नादित्येसृप्ताः ॥ २ ॥

हरिःपिंगलःसंकर्षणः । एषशुक्लःवासुदेवः । एषनीलोनिरुद्धः । एषपीतःप्रद्युम्नः । एषलोहितोनारायणः ॥ १ ॥ नकेवलंहृद्गतस्यहरेरादित्यस्थता किंतुतद्रश्मिषुव्याप्तताचास्तीत्याह ॥ तद्यथेति । तन्निदर्शनंयथा । महापथोमहान्मार्गः । इमंसन्निहितममुंविप्रकृष्टंचेत्युभौग्रामावाततोव्याप्तःसन्गच्छति एवमेताआदित्यस्यादित्यस्थस्यादित्यनाम्नोहरेः रश्मयःआदित्यरश्मिषुव्याप्ताःसंतःइमंजीवममुमादित्यंचेत्युभौलोकौगच्छंतीत्युक्तगतिप्रकारंविशदमाह ॥ अमुष्मादिति । अमुष्मादादित्याद्येरश्मयःप्रतीयंते तत्रप्रतीयंतइत्यर्थः । तेआसुनाडीषुसृप्ताःव्याप्ताः । आभ्योनाडीभ्यःयेरश्मयःप्रतीयंतेतत्रत्याइतियावत् । ते

अमुष्मिन्नादित्येसृप्ताःव्याप्ताः ॥ २ ॥ हृद्गतनाडीस्थभगवंतंप्राप्तस्यपापालेपमहिमानमाह ॥ तद्यत्रेति । तत् तदा । यत्र हरौ एतत्सुप्तः एषजीवः सुप्तः । समस्तःउपसंहृतेंद्रियः । अतएवबाह्यविक्षेपाभावात्संप्रसन्नःसम्यक्प्रसन्नः । स्वप्नं स्वाप्नवस्तुजातं नविजानाति । तदा आसुनाडीषु सुषुम्नाख्यनाडीस्थेहरौ।सृप्तःप्राप्तोभवति। तदाहसूत्रे तदभावोनाडीषुतच्छ्रुतेरात्मनिहेति। नाडीष्वितिबहुवचनंप्रतिदेहापेक्षया । तंनाडीस्थभगवतिसुप्तं । पाप्मा पापं । नस्पृशति संसृष्टंनभवति । तत्रहेतुःतेजसाहरि

तद्यत्रैतत्सुप्तःसमस्तःसंप्रसन्नःस्वप्नंनविजानात्यासुतदानाडीषुसृप्तोभवतितंनकश्चनपाप्मास्पृशति तेजसाहितदासंपन्नोभवति ॥ ३ ॥ अथयत्रैतदबलिमानंनीतोभवतितमभितआसीनाआहुर्जानासिमांजानासिमामितिसयावदस्माच्छरीरादनुत्क्रांतोभवतितावज्जानाति ॥ ४ ॥ अथयत्रै तस्माच्छरीरादुत्क्रामत्यथैतैरेवरश्मिभिरूर्ध्वआक्रमतेसओमितिवाहोद्वामीयतेसयावत्क्षिपेन्मनस्तावदादित्यंगच्छत्येतद्वैखलुलोकद्वारंविदुषांप्रपदनंनिरोधोऽविदुषां ॥ ५ ॥

णातदासुप्तोहि यस्मात् । संपन्नःतस्मादिति ॥३॥ नाडीस्थभगवदुपासनस्यफलमाह ॥ अथयत्रेति । अर्थांतरेअथपदं । यत्र यदा । एतत् एषहृद्गतेश्वरोपासकोज्ञानी । अबलिमानं ज्वरादिनादौर्बल्यं । नीतः प्राप्तो भवति मुमूर्षुर्भवतीतियावत् । तमुपतापिनमभितःपरिवार्यआसीनाःसंतोज्ञातयः । जानासिमांजानासिमामित्याहुःवदंति। सएवंतैःपृष्टःयावत् यदास्माच्छरीरादनुत्क्रांतोऽनिर्गतोभवति तावत्तदाजानाति ॥ ४ ॥ अथयत्र यदा । एतत् एषः । शरीरादुत्क्रामति । अथैतैर्नाडीगतैःरश्मिभि

रूर्ध्वआक्रमते गच्छति। तदाहसूत्रे । रश्म्यनुसारीति । सऊर्ध्वमाक्रममाणः । ओमितिवाहाओमितिनामहरिवाहकेनवायुनो द्धामीयते भद्रीक्रियतेसवायुः यावत् यदा। ज्ञानिनंनेतुंमनःक्षिपेत्कुर्वन्भवतितावत्तदादित्यंगच्छतिजीवःप्राप्नोति। आदित्यगतिःकुतइत्यतआह । एतद्वै आदित्यमंडलंवै ब्रह्म लोकद्वारं विदुषांप्रपदनं प्राप्यं । अविदुषांनिरोधः ॥५॥ हृदयस्थोपासको

तदेषश्लोकः । शतंचैकाचहृदयस्यनाड्यस्तासांमूर्धानमभिनिःसृतैका ॥ तयोर्ध्वमायन्नमृतत्वमेतिविष्वगन्याउत्क्रमणेभवंतिउत्क्रमणेभवंति ॥ ६ ॥ ६ ॥

यआत्मापहृतपाप्माविजरोविमृत्युर्विशोकोऽविजिघत्सोऽपिपासःसत्यकामःसत्यसंकल्पःसोन्वेष्टव्यःसविजिज्ञासितव्यःससर्वांश्चलोकानाप्नोतिससर्वांश्चकामान्यस्तमात्मानम(न्विष्य)नुविद्यविजानातीतिहप्रजापतिरुवाच ॥ १ ॥

नाडीस्थरश्मिभिर्गच्छन्सूर्यद्वारामुक्तोभवतीत्युक्तार्थेमंत्रमाह ॥ तदेषइति। तत्र उक्तेर्थे। हृदयस्यहृदयमभिव्याप्यस्थिताः। तासांमध्येमूर्धानमभिव्याप्य। निस्सृता स्थिता। विष्वगुत्क्रमणे लोकांतरमगने । अन्यामूर्धन्यनाडीतोन्याः। तदाहसूत्रकारः। हार्दानुगृहीतःशताधिकयेति । द्विरुक्तिरादरार्था ॥६॥६॥ ब्रह्मचर्यादिज्ञानसाधनमनुतिष्ठतांसर्वेषामस्तिज्ञानोदयइत्यतोयोग्यस्यैव नाऽयोग्यस्येत्येतदाख्यायिकयाह ॥ यआत्मेति। अन्वेषणंनामश्रवणादिरूपजिज्ञासैवेतिभावेनोक्तं । सवि

जिज्ञासितव्यइति । योधिकारी । तमुक्तरूपमात्मानमन्विष्य विजिज्ञास्य । विजानात्यपरोक्षतः । सज्ञानी । सर्वांश्चलोका नित्यादि प्रजापतिर्ब्रह्मोवाच ॥ १ ॥ तत्उभये देवाश्चासुराश्चेतिद्वौवर्गौ अनुबुध्यज्ञात्वोचुर्ह किमिति ॥ हंततमित्यादि । हंतहर्षे देवानामर्थेइंद्रोऽसुराणामर्थेविरोचनश्चाभिप्रवव्राजंजग्माम । तौहद्वावसंविदानौ अन्योन्यप्रीतिरहितौ । समित्पाणी

तद्धोभयेदेवासुराअनु(बुध्यहोचु)बुबुधिरे तेहोचुर्हंततमात्मानमन्विच्छामायमात्मानमन्विष्यसर्वा॑ंश्चलोकानाप्नोतिसर्वा॑ंश्चकामानितींद्रोहवै देवानामभिप्रवव्राजविरोचनोसुराणांतौ ह्यसंविदानावेवसमित्पाणीप्रजापतिसकाशमाजग्मतुः ॥ २ ॥ तौ(यद्वा)हद्वात्रिं॑शतंवर्षाणिब्रह्मचर्यमूषतुस्तौहप्रजापतिरुवाचकिमिच्छंतावववास्तमिति तौहोचतुर्यआत्मापहतपाप्मा विजरोविमृत्युर्विशोकोऽविजिघत्सोपिपासःसत्यकामःसत्यसंकल्पःसोन्वेष्टव्यःसविजिज्ञासितव्यःससर्वांश्चलोकानाप्नोतिसर्वा॑ंश्चकामान्यस्तमात्मानमनुविद्यविजानातीतिह भगवतोवचोवेदयंतेतमिच्छंतावववा(त्स्वे)(त्स)स्तमिति ॥ ३ ॥

प्रजापतिसकाशमाजग्मतुः ॥ २ ॥ तौयत् यदा । द्वात्रिंशतंद्वात्रिंशद्वर्षाणिब्रह्मचर्यंब्रह्मज्ञानमुद्दिश्योषतुःवासंकृतवंतौ । तदातौहकिमिच्छंतौअवास्तंवासमकुरुतमितिप्रजापतिरुवाच । ताविंद्रविरोचनावूचतुः । किमिति । य आत्मेत्यादिकंभगवतो

महानुभावस्यतववचोवाक्यंहरंतोव्यवहरंतोजनाःवेदयंते बोधयंति । इममात्मानंज्ञातुमिच्छंतावववात्स्वेति । अवात्समितिपाठेप्र त्येकमन्वयः । वासंकृतवंतौस्वइत्यर्थः ॥३॥ तौहप्रजापतिरुवाच किमिति तदाह ॥ यएषइति । दृश्यते दिव्यदृष्ट्या । चक्षुर्गतंप्रतिबिंबमेवात्मेतिमन्वानोविरोचनःपुनःपृच्छति ॥ अथयोयमिति । परिख्यायते । प्रतीयते आदर्शे दर्पणे । परिख्यायतइत्यन्वेति । एषः अबादिस्थितप्रतिबिंबरूपः । कतमइतिप्रश्नस्योत्तरमेषअक्षिगतएवसर्वेषुस्थलेषुपरिख्यायतइति ।

तौहप्रजापतिरुवाच यएषोंतरक्षणिपुरुषोदृश्यतेएषआत्मेतिहोवाचैतदमृतमभयमेतद्ब्रह्मेत्यथयोयं भगवोप्सुपरिख्यायतेयश्चायमादर्शेकतमएषइत्येषउएवैषुसर्वेष्वंतेषुपरिख्यायतइतिहोवाच ॥४॥७॥

उदशरावआत्मानमवेक्ष्य यदात्मनो(न)विजानीथस्तन्मेप्रब्रूतमिति तौहोदशरावेवेक्षांचक्रातेतौहप्रजापतिरुवाच किंपश्यथइतितौहोचतुः सर्वमेवेदमावांभगवआत्मानंपश्यावआलोमभ्यआनखेभ्यःप्रतिरूपमिति ॥ १ ॥

अंतेषु स्थलेषु । इंद्रस्तुप्रतिबिंबादन्यदेवब्रह्मेतिजानन्नपिअज्ञवद्विरोचनवदेवप्रश्नादिकमकरोदितिज्ञेयं ॥ ४ ॥ ७ ॥ तत्त्ववेदिविवक्षयादिव्यदृष्टिगोचरोक्षिगतएवभगवान्सर्वस्थलेषुपरिख्यायतेइतिब्रह्मणोक्तेपिसर्वत्राक्ष्यबादौस्थितःप्रतिबिंबएवात्मेतिव्यजानाद्विरोचनः । तत्त्वंज्ञातुंयोग्यतावश्यमपेक्षितेतिभावेनप्रतिबिंबोबिंबगुणेनगुणी बिंबदोषेणदुष्टः सकथंब्रह्मस्यादि

तिभावेनाह ॥ उदशरावेति । उदकपूर्णशरावेआत्मानंस्वशरीरमवेक्ष्यात्मनःसंबंधियद्विजानीथःपश्यथःतन्मेप्रब्रूतमितिप्रजापतिरुवाचेत्यर्थः । एवमुक्तौतावुदशरावेआत्मनोवेक्षांचक्राते । तौहप्रजापतिरुवाच किंपश्यथइति तौहोचतुःसर्वमेवेदं तद्व्यनक्ति । हेभगवः आवांआलोमभ्यआनखेभ्यःलोमनखाद्युपेतं । प्रतिरूपं प्रतिबिंबभूतमात्मानं । शरीरंपश्यावइतिहोचतुः ॥ १ ॥ तौहप्रजापतिःपुनरुवाच । किमिति । साध्वलंकृतौपरिष्कृतौअनुलेपादिमंतौभूत्वा । शिष्टंस्पष्टं ॥ २ ॥ यथैवे

तौहप्रजापतिरुवाचसाध्वलंकृतौसुवसनौपरिष्कृतौभूत्वोदशरावेवेक्ष्येथामितितौहसाध्वलंकृतौसुवसनौपरिष्कृतौभूत्वोदशरावेवेक्षांचक्रातेतौहप्रजापतिरुवाचकिंपश्यथइति ॥ २ ॥ तौहोचतुर्यथैवेदमावांभगवःसाध्वलंकृतौसुवसनौपरिष्कृतौस्वएवमेवेमौभगवःसाध्वलंकृतौसुवसनौपरिष्कृतावितिएषआत्मेतिहोवाचैतदमृतमभयमेतद्ब्रह्मेतितौहशांतहृदयौप्रवव्रजतुः ॥३॥

दमितिसामान्येनोक्तंव्यनक्ति ॥ साध्वलंकृताविल्यादि । स्वःभवावःइमौप्रतिबिंबौ । हेभगवन् इतिहोचतुरित्यन्वयः । एवंदेहगुणेनगुणोपेतः तथातुल्यन्यायतयातद्दोषेणदोषयुक्तएषः प्रतिबिंबः । आत्मा । एतदमृतमभयमितिकाकुस्वरेणप्रजापतिरुवाचह । कथमात्माकथममृतमभयमित्यर्थः । एवंकाक्वोक्तमजानंतौताविंद्रविरोचनौयथास्थितप्रतिबिंबमेवब्रह्मेतिजानं

तौशांतहृदयौब्रह्मवेदिनौप्रवव्रजतुर्जग्मतुः ॥ ३ ॥ गच्छंतौतावन्वीक्ष्यप्रजापतिःस्वस्यमध्यस्थतांज्ञापयन्नुवाच । किमिति । आत्मानमनुपलभ्य तस्यविवरणमननुविद्याज्ञात्वा । व्रजतःसकाशात्यतरे ये एतदुपनिषदः एतद्रहस्योपदेशवंतः । भविष्यंतिदेवावाअसुरावातेपराभविष्यंति पराजयवंतोभवंतीत्युवाचेतिपूर्वेणान्वयः । सएवमुक्तोविरोचनःशांतहृदयःमयात्माज्ञात

तौहान्वीक्ष्यप्रजापतिरुवाचानुपलभ्यात्मानमननुविद्यव्रजतोयतरएतदुपनिषदोभविष्यंतिदेवावासुरावातेपराभविष्यंतीतिसहशांतहृदयएव विरोचनोसुरान्जगामतेभ्योहैतामुपनिषदंप्रोवाचात्मैवेहमहय्यआत्मापरिचर्यआत्मानमेवेहमहयन्नात्मानंपरिचरन्नुभौलोकाववाप्नोतीमंचामुंचेति ॥ ४ ॥ तस्मादप्यद्येहाददानमश्रद्दधानमयजमानमाहुरासुरोबतेत्यसुराणाꣳह्येषोपनिषत्प्रेतस्यशरीरंभिक्षयावसनेनालंकारेणेतिसꣳस्कुर्वंत्येतेनह्यमुंलोकंजेष्यंतोमन्यंते ॥ ५ ॥ ८ ॥

इतिबुद्धिमानेवासुरान्जगाम तेभ्यःएतांउपनिषदं । प्रतिबिंबमेवब्रह्म देहालंकारादौसतिब्रह्मणएवतद्भवतीत्येतद्रहस्यंप्रोवाच । तदेवविशदमाह ॥ आत्मैवेति । स्वदेहएव । महय्यःपूज्यः । आत्मानमेव देहमेव । महयन् पूजयन् । इतिप्रोवाचेत्यन्वयः ॥ ४ ॥ तस्माद्देहएवपूज्यइत्यस्यासुरपक्षत्वादेव । अपि अद्यापीहाददानमश्रद्दधानमयजमानंयज्ञादिकमकुर्वंतंस्वात्मभोगमात्रासक्तंजनमाहुःप्राज्ञाः । अयमासुरोऽसुरस्वभावो बतकष्टमिति । एषोपनिषत्यज्ञाद्यननुष्ठानादिकमसुराणांरह

॥१२०॥

स्यं । हियतोतइतिविरोचनेनोपदिष्टाअसुराअद्यापिप्रेतस्यशरीरं । भिक्षया अन्नपानेन गंधमाल्यादिना वसनेनालंकारेण । इतिशब्द आद्यर्थः । अलंकारादिनासंस्कुर्वंति भूषयंति । एतेप्रेतदेहमलंकुर्वंतोजनाःअमुंलोकंपरलोकंजेष्यंतःप्राप्स्यंतइतिमन्यंते ॥ ५ ॥ ८ ॥ अथानंतरं । इंद्रोदेवानप्राप्यैव । एतद्वक्ष्यमाणं भयंददर्श । तदाह । यथैवखल्वयमिति । अयंप्रतिबिंबःस्वा

अथहेंद्रोप्राप्यैवदेवानेतद्भयंददर्शयथैवखल्वयमस्मिञ्छरीरेसाध्वलंकृतेसाध्वलंकृतोभवतिसुवसनेसुवसनःपरिष्कृतेपरिष्कृतएवमेवायमस्मिन्नंधेंधोभवतिस्रामेस्रामःपरिवृक्णेपरिवृक्णोस्यैवशरीरस्यनाशमन्वेषनश्यतिनाहमत्रभोग्यंपश्यामीति ॥ १ ॥ ससमित्पाणिःपुनरेयायतंहप्रजापतिरुवाच मघवन्यच्छांतहृदयःप्राव्राजीःसार्धंविरोचनेनकिमिच्छन्पुनरागमइतिसहोवाच यथैवखल्वयंभगवोस्मिञ्छरीरेसाध्वलंकृतेसाध्वलंकृतोभवतिसुवसनेसुवसनःपरिष्कृतेपरिष्कृतएवमेवायमस्मिन्नंधेंधोभवतिस्रामेस्रामःपरिवृक्णेपरिवृक्णोस्यैवशरीरस्यनाशमन्वेषनश्यति नाहमत्रभोज्यंपश्यामीति ॥ २ ॥

मे कुष्ठादिनाविवर्णे । परिवृक्णे च्छिन्नावयवे । अत्रप्रतिबिंबंब्रह्मेत्यत्र । भोग्यमुपादेयंनपश्यामीत्यालोच्य ॥ १ ॥ समित्पाणिःसःइंद्रःपुनःप्रजापतिमेयाय प्राप । तंहेत्यादिव्यक्तं । आगमःआगतवानसीत्युवाचेत्यन्वयः । सइंद्रउवाच । तदाह ॥

यथैवेति । अयं प्रतिबिंबः । पश्यामीत्युवाचेंद्रइतिपूर्वेणान्वयः । प्रजापतिराह ॥ एवमेवेत्यादिना ॥ २ ॥ एतंतु वक्ष्य
माणंतु सइंद्रः । तस्मैइंद्रायोवाचब्रह्मा ॥ ३ ॥ ९ ॥ तदाह । यएषइति । यएषभगवान् । स्वप्नेकंठदेशे । स्वप्नावस्थायां
स्वाप्नपदार्थप्रदर्शकःसन् । महीयमानः पूज्यमानश्चरति एषआत्मेत्याद्युवाच । सइंद्रः । ब्रह्मोक्तंस्वप्नावस्थाप्रवर्तकंजानन्न

**एवमेवैषमघवन्निति होवाचैतंत्वेवतेभूयोनुव्याख्यास्यामिवसापराणिद्वात्रिंशतंवर्षाणीतिसहा
पराणिद्वात्रिंशतंवर्षाण्युवासतस्मैसहोवाच ॥ ३ ॥ ९ ॥**

**यएषस्वप्नेमहीयमानश्चरत्येषआत्मेतिहोवाचैतदमृतमभयमेतद्ब्रह्मेतिसहशांतहृदयःप्रवव्राजसहा
प्राप्यैवदेवानेतद्भयंददर्श तद्यद्पीदंशरीरमंधंभवत्यनंधःसभवतियदिस्राममस्रामोनैवैषोस्यदो
षेणदुष्यति ॥ १ ॥ नवधेनास्यहन्यतेनास्यस्रामेणस्रामोघ्नंतित्वेवैनंविच्छादयंतीवाप्रियवेत्तेवभ
वत्यपिरोदितीवनाहमत्रभोग्यंपश्यामीति ॥ २ ॥**

प्यसुरमोहनायस्वप्नेदृश्योजीवएवात्मेत्युवाचप्रजापतिरितिमन्वानइवदेवानप्राप्यैवैतद्भयंददर्श । तदाह ॥ तद्यद्पीति ।
यद्यपीदं शरीरमंधंस्रामंचेदपिसस्वप्नेमहीयमानोजीवोंधादिर्नभवति । अस्यदेहस्यदोषवधादिनानदोषवधादिभाक् । तत्
तर्ह्यपि ॥ १ ॥ एनंस्वप्नेमहीयमानंस्वप्नद्रष्टारंघ्नंतितु घ्नंतीव । विच्छादयंतीवादंतीव । अप्रियवेत्तेव अप्रियंलब्धेव । अप्रियं

वेदितेतिवा । भवति । अत्र ब्रह्मोक्तेर्थे । भोग्यमुपादेयं ॥ २ ॥ ससमित्पाणिरित्यादिपूर्ववद्व्यक्तं ॥ ४ ॥ १० ॥ तस्मैसहो
वाचेत्युक्तं किमुक्तमिंद्रायप्रजापतिनेत्यतआह ॥ तद्यत्रेति । तदेतत् सएवजीवः । यत्र यस्मिन् । हरौ सुप्तः स्वापंप्राप्तः ।

ससमित्पाणिःपुनरेयायतꣳहप्रजापतिरुवाचमघवन्यच्छांतहृदयःप्राव्राजीःकिमिच्छन्पुनरागम
इतिसहोवाचतद्यद्यपीदंभगवःशरीरमंधंभवत्यनंधःसभवतियदिस्रामस्रामोनैवैषोस्यदोषेणदु
ष्यति॥ ३ ॥ नवधेनास्यहन्यतेनास्यस्रामेणस्रामोघ्नंतित्वेवैनंविच्छादयंतीवाप्रियवेत्तेवभत्यपिरो
दितीवनाहमत्रभोग्यंपश्यामीत्येवमेवैषमघवन्निति होवाचैतंत्वेवतेभूयोनुव्याख्यास्यामिवसा
पराणिद्वात्रिꣳशतंवर्षाणीतिसहापराणिद्वात्रिꣳशतंवर्षाण्युवासतस्मैसहोवाच ॥ ४ ॥ १० ॥
तद्यत्रैतत्सुप्तःसमस्तःसंप्रसन्नःस्वप्नंनविजानात्येषआत्मेतिहोवाचैतदमृतमभयमेतद्ब्रह्मेतिसहशां
तहृदयःप्रवव्राजसहाप्राप्यैवदेवानेतद्भयंददर्श नाहंखल्वयमेवꣳसंप्रत्यात्मानंजानात्ययमहमस्मी
तिनोएवेमानिभूतानिविनाशमेवापीतोभवतिनाहमत्रभोग्यंपश्यामीति ॥ १ ॥

समस्तः उपसंहृतेंद्रियः । अतएवसंप्रसन्नः प्रसादयुक्तः । स्वप्नंनविजानाति सुषुप्तिंप्राप्नोतीत्यर्थः । एषआत्मेत्युवाचब्रह्मा । सइंद्रः
सुप्त्यवस्थाप्रवर्तकोभगवान्जीवादन्योस्तिआत्मेतिब्रह्मोक्तंजानन्नप्यसुरमोहायजीवादन्यंनपश्यामि । यत्रसुप्तौजीवएषआत्मे

तिकथमुवाचब्रह्मेति जीवादन्यमपश्यन्निव अजानन्निवच। देवानप्राप्यैवैतद्भयंददर्श। तदाह॥ **नाहमिति**। अहंखलुसुप्तः। अयमहमस्मीतिनजानाति नजानामि व्यत्ययात्। एवंब्रह्मणोक्तप्रकारेणाधिकरणभूतमात्मानंनजानामि। इमानिभूतानिचन्नो एवजानंत्यतोनास्त्येवाधारभूतआत्मेति। तर्हिंअस्तुजीवःपरमात्मनिसुप्तावेकीभूतइति। यद्यपीतोएकीभूतोभवति तर्हिंशं सुखं विनैवस्यात्। सुप्तौसुखानुभवहीनएवस्यादितियावत्। नचवाच्यंसुखानुभवहीनःस्यादिति। एतावंतंकालंसुखमहम

ससमित्पाणिःपुनरेयायतꣳहप्रजापतिरुवाचमघवन्यच्छांतहृदयःप्राव्राजीःकिमिच्छन्पुनरागमइ तिसहोवाचनाहंखल्वयंभगवएवꣳसंप्रत्यात्मानंजानात्ययमहमस्मीतिनोएवेमानिभूतानिविना शमेवापीतोभवतिनाहमत्रभोग्यंपश्यामीति ॥ २ ॥ एवमेवैषमघवन्निर्तिहोवाचैतंत्वेवतेभूयो नुव्याख्यास्यामिनोएवान्यत्रैतस्माद्वसापराणिपंचवर्षाणीतिसहापराणिपंचवर्षाण्युवासतान्ये कशतंसंपेदुरेतत्तद्यदाहुरेकशतꣳहवैवर्षाणिमघवान्प्रजापतौब्रह्मचर्यमुवासतस्मैसहोवाच ॥३॥११॥

स्वाप्समितिसुप्त्युत्थितस्यपरामर्शोनस्यात्। अत्र ब्रह्मोक्तेर्थे। भोग्यमुपादेयं ॥ १ ॥ इत्यालोच्यसमित्पाणिरित्यादिप्राग्व त्व्यक्तं ॥ २ ॥ एतस्मादात्मनोअन्यत्र अन्यत्। नोएव नैवास्त्युपदेष्टव्यं एतंत्वेवतेभूयः पुनःअनुव्याख्यास्यामीतियोज्यं। तानिइंद्रेणप्रजापतौब्रह्मज्ञानार्थमुषितानिवर्षाणिएकशतं एकोत्तरशतं। संपेदुः संपन्नान्यभूवन्। एकशतंवर्षाणिमघवान्प्र

जापतौब्रह्मचर्यमुवासेतियदाहुःप्राज्ञाः तदेतत्पूर्वोक्तप्रकारेणज्ञातव्यं ॥ ३ ॥ ११ ॥ यएषोंतरिक्षणीत्यादिनाजीवस्यजाग्रत्स्वप्नसुषुप्त्यवस्थाप्रवर्तकोहरिरित्युपदिश्यप्रकारांतरेणतस्यजीवाद्वैलक्षण्यमुपपादयति ॥ मघवन्नित्यादिना । तत्रतावत् जरामृत्युपरीतशरीरवत्त्वतद्राहित्यलक्षणंजीवब्रह्मणोर्वैलक्षण्यमादावाह ॥ मघवन्निति । हेमघवन्निदंजीवशरीरं मृत्युना आत्तं व्याप्तमतोमर्त्यंविनाशि । तच्छरीरकोजीवोपिविनाश्येव । ततूजीवशरीरंअशरीरस्य प्राकृतदेहहीनस्यातएवामृतस्या

मघवन्मर्त्यंवा वइदꣳशरीरमात्तंमृत्युनातदस्यामृतस्याशरीरस्यात्मनोधिष्ठानमात्तोवैसशरीरः प्रियाप्रियाभ्यांनहवैसशरीरस्यसतःप्रियाप्रिययोरपहतिरस्त्यशरीरंवावसंतंनप्रियाप्रियेस्पृशतः॥१॥ अशरीरोवायुरभ्रंविद्युत्स्तनयित्नुरशरीराण्येतानितद्यथैतान्यमुष्मादाकाशात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यंते ॥ २ ॥

विनाशिनआत्मनोहरेरधिष्ठानं । जीवेशयोःप्रियाप्रियस्पृष्टत्वतदस्पृष्टत्वरूपंवालक्षणांतरमाह ॥ आत्तइति । सशरीरोजीवः । प्रियाप्रियाभ्यांपरेणप्राप्यसुखदुःखाभ्यामात्तःआक्रांतः । प्रसिद्धमेतदित्याह ॥ नहवाइति । अपहतिर्हानिर्नास्ति । हवैप्रसिद्धं । वावेत्यवधारणे । अशरीरंसंतंहरिंनैवस्पृशतइतिवैलक्षण्यमित्यर्थः ॥ १ ॥ जीवन्मुक्तान्वाय्वादीनपिप्रियाप्रियेनस्पृशतःकिमुविष्णुमशरीरंइतिभावेनाह ॥ अशरीरोवायुरिति । वायुर्मुख्यवायुःअशरीरः । अभ्रं आप्नोतिव्याप्नोति

जगदित्यपूशब्दितेनहरिणाभ्रियमाणत्वादभ्रं ब्रह्मा। विशेषेणद्योततइतिविद्युन्नाम्नीभारती स्तनयित्नुः। सर्वशब्दमानित्वा तृस्तनयित्नुनाम्नीसरस्वती। इत्येतानित्रीण्यशरीराणिवायुश्चाशरीरः वाय्वादयश्चत्वारोदेहवंतोपितदभिमानाभावादशरीराण्येव तादृशान्यपिप्रियाप्रियेनस्पृशतःकिमुपरेशमितिवाक्यशेषः। अत्रयद्यपिब्रह्मवाय्वोःपरेणेयंभगवताप्राप्यंप्रियमस्ति। भारतीसरस्वत्योस्तुभगवत्प्राप्यंस्वस्वभर्तृप्राप्यंचास्तिसुखं तथापितदन्येनप्राप्यंसुखंनेतिप्रियस्पृष्टिश्चतुर्णानेत्युक्तं मुक्तोपीशप्रसादादेवभोगान्भुंक्ते। अतोपिजीवेशयोर्वैलक्षण्यमित्याह॥ तद्यथेति। तन्निदर्शनंयथा। एतानिवाय्वभ्रविद्युत्स्तन

एवमेवैषसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतेसउत्तमःपुरुषःसतत्रपर्येतिजक्षन्क्रीडन्रममाणःस्त्रीभिर्वायानैर्वाज्ञातिभिर्वाज्ञातिभिर्वानोपजनꣳस्मरन्निदꣳशरीरꣳसयथा(प्रा)प्रयोग्यआचरणेयुक्तएवमेवायमस्मिन्शरीरेप्राणोयुक्तः॥ ३॥

यित्नुशब्दितानि अमुष्मादाकाशात्परमात्मनःसमुत्थाय उत्पद्यपरंज्योतिःपरमात्मानमेवोपसंपद्यस्वेनरूपेणनिजानंदानुभवरूपेणाभिनिष्पद्यंते॥ २॥ एवमेवैषज्ञानीजीवः। संप्रसादः सम्यक्भगवत्प्रसादयुक्तः। अस्माच्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरूपेण निजानंदानुभवरूपेणाभिनिष्पद्यते। उक्तवैलक्षण्यसिद्धमर्थमाह॥ सइति। यंप्राप्यमुक्तोभूत्सपरंज्योतिःशब्दोक्तः उत्तमःपुरुषः। समुक्तोजीवःतत्र भगवल्लोके। पर्येति परितःसंचरति। कथं जक्षन् भक्षयन्। क्रीडन्नित्यादि

ज्ञातिभिः सहमुक्तैः । अज्ञातिभिःपूर्वमुक्तैः । वयस्यैःसखिभिः । तदाहसूत्रकारः उत्तराच्चेदाविर्भूतस्वरूपस्त्विति । विहारो पदेशादितिच । रमणातिशयप्रकारमाह ॥ नोपजनमिति । उपजनं परिसरवर्तिजनं । शरीरं स्वशरीरंच । नस्मरन् रम तइतिरमणातिशयोक्तिः । पूर्वंतदेतच्छरीरमशरीरस्यात्मनोधिष्ठानमित्युक्तं । तत्रजीवोवाचक्षुरादिर्वास्तुतदधिष्ठातेत्यतोजीव स्यासामर्थ्याच्चक्षुरादेःकरणत्वान्नाधिष्ठातृत्वमितिसदृष्टांतमाह ॥ सयथेति । आचरणे रथप्रवर्तने । सबुद्धिस्थः । प्रायो ग्यःसारथिः । यानेयथानियुक्तःएवमेवायंप्राणोमुख्यवायुरस्मिन्शरीरेतत्प्रवर्तनाययुक्तः सारथित्वेननियुक्तः विष्णुस्तुरथि

अथयत्रैतदाकाशमनुविषण्णंचक्षुःसचाक्षुषःपुरुषोदर्शनायचक्षुरथयोवेदेदंजिघ्राणीतिसआत्मा गंधायघ्राणमथयोवेदेदमभिव्याहराणीतिसआत्माभिव्याहारायवागथयोवेदेदंशृणवानीति सआत्माश्रवणायश्रोत्रं ॥ ४ ॥

कवद्देहाधिष्ठातेत्युक्तमेव । जीवस्तुअन्यरथगवत्तिष्ठतीतिभावः ॥ ३ ॥ चक्षुरादेरन्यप्रयोज्यत्वरूपकरणत्वान्नदेहाधिष्ठातृ त्वमितिभावेनतस्यकरणत्वमाह ॥ अथयत्रैतदिति । एतच्चक्षुर्यत्र यदधीनंसत् । रश्मिभिराकाशमनुविषण्णमभिव्याप्तम स्ति । सचाक्षुषःचक्षुःस्वामीपुरुषःहरिः । देहाधिष्ठातारथिकवदितिभावः । दर्शनायचक्षुःकरणमितियावत् । नतुदेहाधिष्ठा त्रितिभावः । भगवान्स्वरूपेंद्रियैःसर्वभोगान्भोक्तुंशक्तोपिलीलयाजीवदेहमधिष्ठायस्वकीयेंद्रियमिलितैर्जीवदेहगतचक्षुरादीं

द्रियैः पुरुषभोग्यविषयान्सर्वान्भुङ्क्तइतितात्पर्यंज्ञेयं । ज्योतिराद्यधिष्ठानंतुतदामननादित्यत्र चक्षुरादिकरणानांभगवदीयत्वसमर्थनात् । अथयोदेहाधिष्ठाताविष्णुः इदंसुगंधंजिघ्राणीतिवेद । सआत्मा देहस्वामी । गंधाय तस्यगंधज्ञानाय घ्राणमित्यर्थः । एवमग्रेपिज्ञेयं ॥ ४ ॥ सआत्मेत्यनंतरंमननायमनइतिपूरणीयं । नकेवलंदेहाधिष्ठातृत्वमात्रंकिंतुमनआदींद्रियाण्यप्यधिष्ठायभोगान्भुङ्क्तइतिभावेनाह ॥ **दैवंमनः दैवंचक्षुरिति** । देवाधिष्ठितमित्यर्थः । यद्वादैवं तत्तदभिमानिदेवाधि

**अथयोवेदेदंमन्वानीतिसआत्मामनोस्य(दैवमनः)दैवंचक्षुःसवाएषएतेनदैवेनचक्षुषामनसैता
न्कामान्पश्यन्रमते ॥ ५ ॥ यएतेब्रह्मलोकेतंवाएतंदेवाआत्मानमुपासतेतस्मात्तेषाꣳसर्वेचलोका
आत्ताःसर्वेचकामाःसर्वाꣳश्चलोकानाप्नोतिसर्वाꣳश्चकामान्यस्तमात्मानमनुविद्यविजानातीति
हप्रजापतिरुवाचप्रजापतिरुवाच ॥ ६ ॥ १२ ॥**

ष्ठितमित्यर्थः । अन्येंद्रियेभ्यो जीवेंद्रियेभ्यः । अनयोःपरमात्मेंद्रियाभिमानिनोर्दीप्यमानत्वात् एतेदैवमनश्चक्षुषी भगवतो विषयभोगेमुख्यकारणमित्याह ॥ **सवाएषइति** ॥५॥ एवंहरिरेवजीवशरीरमधिष्ठाय सारथ्यादिरूपान्प्राणादीन्नियमयतीत्येवमुपासकस्यफलमितिहासपूर्वमाह॥**यएतइति** । ब्रह्मलोकेयएतेदेवाःतमेवमात्मानमुपासते तेषुदेवेषुरमतइत्यन्वयः । तस्मात्तदुपासनावत्त्वात्तेषांसर्वेलोकाआत्ताःप्राप्ताः योधिकारीतमात्मानमनुविद्य शास्त्रतोविचार्य । विजानात्यपरोक्षतः ।

सज्ञानीसर्वान्लोकान्सर्वांश्चकामानाप्नोतीतिप्र ... कंसर्वमनूद्योपसंहरत्युपनिषत् ॥ इतिहप्रजापतिरुवाचेति ॥ ॥६॥१२॥एवंशरीरहृद्गतस्योपास्तिमुक्त्वातत्साध्य ... यानांविश्वरूपोपास्तिमाह॥ श्यामादिति। श्यामात् हृद्गतरूपात्। तदुपासनयेतियावत् शबलं शबलवर्णं। चक्षुर्गतंविश्वरूपं। प्रपद्येउपास्यज्ञातवानस्मि। शबलाद्विश्वरूपानुग्रहात्। श्यामं

श्यामाच्छबलंप्रपद्येशबलाच्छ्यामंप्रपद्येऽश्वइवरोमाणिविधूयपापंचंद्रइवराहोर्मुखात्प्रमुच्यधूत्वाशरीरमकृतंकृतात्माब्रह्मलोकमभिसंभवामीत्यभिसंभवामीति ॥ १३ ॥

आकाशोवैनामनामरूपयोर्निर्वहितातेयदंतरातद्ब्रह्मतदमृतꣳसआत्माप्रजापतेःसभांवेश्मप्रपद्येयशोहंभवामिब्राह्मणानांयशोराज्ञांयशोविशांयशोहमनुप्रापत्सिसहाहंयशसांयशःश्वेतमदत्कमदत्कंश्वेतंलिंदुमाऽऽभिगांलिंदुमाऽऽभिगां ॥ १४ ॥

हृद्गतं। प्रपद्ये उपास्यज्ञातवान्प्राप्नुयामितिवा। एवंहृद्गताक्षिस्थयोरुपास्तिमुक्त्वातत्प्रार्थनाप्रकारमाह ॥ अश्वइवेति। अश्वोरोमाणीवाहंपापंविधूय राहोर्मुखाच्चंद्रइव शरीरंधूत्वा प्रमुच्य। कृतात्माहमकृतं नित्यं। ब्रह्मलोकमभिसंभवामीति द्विरुक्तिरादरार्था ॥खं०॥१३॥ पूर्वंयावान्वाअयमाकाशइतिव्याप्तोहरिःप्रकृतः। तदुपास्तिमाह ॥ आकाशइति। आसमंतात्काशतेप्रकाशतइत्याकाशनामाहरिः। नामरूपयोर्निर्वहिता शब्दप्रपंचार्थप्रपंचयोर्निर्वोढावैनामप्रसिद्धं। यत् तेनामरूपे अंतरा

विनावर्तते तत्ब्रह्म तदमृतंसआत्माइत्युपासितव्यमित्यर्थः। तदाहसूत्रे आकाशोर्थांतरत्वादिव्यपदेशादिति। तत्प्रार्थनाप्रकारमाह ॥ प्रजापतेरिति । भगवतःसभांवेश्मचप्रपद्ये। ब्राह्मणानांमध्ये यशो यशस्वीभवामि राज्ञांयशोयशस्वी विशां यशोहमनुप्रापत्सि प्राप्नुयां। सहाहं सोहं। यशसांयशः यशस्विनांयशोदाअहंस्यां । यद्वायशस्विनांयशोदातृश्वेतंश्वसनं इतंप्राप्तंश्वसनेस्थितं श्वसनगमितिकचिद्भाष्यपाठः। तदावायुगमित्यर्थः । अदत्कं अनुभूयमानसुखोपेतंलिंदुं रतिप्रदं ह

तद्धैतद्ब्रह्माप्रजापतयउवाचप्रजापतिर्मनवेमनुःप्रजाभ्यआचार्यकुलाद्वेदमधीत्ययथाविधानंगुरोः कर्मातिशेषेणाभिसमावृत्यकुटुंबे(बी)शुचौदेशेस्वाध्यायमधीयानोधार्मिकान्विदधदात्मनिसर्वेंद्रियाणिसंप्रतिष्ठाप्याहिंसन्सर्वाणिभूतान्यन्यत्रतीर्थेभ्यःसखल्वेवंवर्तयन्यावदायुषंब्रह्मलोकमभिसंपद्यतेनचपुनरावर्ततेनचपुनरावर्तते ॥ १५ ॥

रिमाभिगामभ्यगांप्राप्तवानस्मीतिचतुर्मुखउवाचेतियोज्यं। द्विरुक्तिरादरार्था ॥ खं० ॥ १४ ॥ आदरजननायएतदुपनिषत्प्रवर्तकानाहश्रुतिः ॥ तद्धैतदित्यादिना। तदेतद्ब्रह्माभगवान्। प्रजापतयेचतुर्मुखाय । सचस्वायंभुवमनवे। सचप्रजाभ्यउवाचेत्यर्थः । एवंपरंपरागतत्वादद्यतनोपि[illegible]दभ्यासीस्यादित्याशयेनैतदुपनिषदभ्यासिनोयमनियमोक्तिपूर्वमपुनरावृत्तिरूपंफलमाह ॥ आचार्येत्यादिना। [illegible]कुलाद्वेदमधीत्यसहार्थतोध्ययनंकृत्वा । यथाविधानंगुरोःकर्मअ

तिशेषेण निश्शेषेणाभिसमावृत्यसमाप्य । कुटुं[illegible]मेवर्तमानः । शुचौदेशेस्वाध्यायमधीयानः । धार्मिकान्धर्मसंबं धिनोविदधत् विशेषेणधारयन् । आत्मनिपरम[illegible] । सर्वेंद्रियाणिसम्यक्प्रतिष्ठाप्यसर्वेंद्रियाणिविषयेभ्यःप्रत्याहारेणनि रुध्यबहिर्वृत्तिकंचित्तंपरमात्मनिसम्यक्प्रतिष्ठाप्येतियावत् । तीर्थेभ्यःशास्त्रोक्तेभ्यःयत्रयज्ञादौहिंसाशास्त्रोक्ता ततोन्यत्रस र्वभूतान्यहिंसन्सखलुकुटुंबी । यावदायुषंएवंवर्तयन्वर्तमानःब्रह्मलोकमभिसंपद्यते । नचपुनरावर्तते तत्रैवनिजानंदमना

इतिश्रीमच्छांदोग्योपनिषदिअष्टमोध्यायः ॥८॥ आप्यायंतुममांगानिवाक्प्राणश्चक्षुःश्रोत्रम थोबलमिंद्रियाणिचसर्वाणिसर्वंब्रह्मौपनिषदंमाहंब्रह्मनिराकुर्यांमामाब्रह्मनिकरोदनिराकर णमस्त्वनिराकरणंमेस्तुतदात्मनिनिरतेयउपनिषत्सुधर्मास्तेमयिसंतु तेमयिसंतु ॥
॥ ॐशांतिःशांतिःशांतिः ॥ हरिःॐ ॥ इतिश्रीमच्छांदोग्योपनिषत्संपूर्णा ॥

रतमनुभवन्नास्तइति । पुनरुक्तिरादरार्था । एतच्चकृत्स्नगृहस्थाश्रमधर्मोपेतदेवविषयं तदाहसूत्रे कृत्स्नभावात्तुगृहिणोपसंहा रइति ॥ खं० ॥ १५ ॥ इतिच्छांदोग्योपनिषद्भाष्याद्युक्तार्थसंग्रहः । राघवेंद्रेणयतिनाकृतस्सज्जनसंविदे । समस्तगुणपूर्णेन श्रीप्राणपतिनेरितः । यदवोचमहंतेनप्रीणातुपुरुषोत्तमः ॥ इतिश्रीमच्छांदोग्योपनिषदर्थसंग्रहेसुधींद्रगुरुपादशिष्यराघवेंद्र यतिकृतेअष्टमोध्यायः ॥ ८ ॥ छ ॥

॥ इति श्रीमच्छांदोग्योपनिषत्खंडार्थसंग्रहः संपूर्णः ॥